आर.एन.आई. सं.58951/94

ISSN 0975 - 0061

# आरण्यकम्

अर्धवार्षिकी सन्दर्भिता संस्कृतशोधपत्रिका
(Bi-annual Refereed Sanskrit Research Journal)

विश्वविद्यालयानुदानायोगस्य( UGC )यत्नसूच्याम्( Carelist )अन्तर्भुक्ता

संस्कृतप्रसारपरिषद्
आरा (विहार:)

त्रयस्त्रिंशं वर्षम्-द्वितीयोऽङ्कः
सितम्बर 2025

## ‘आरण्यक’स्य नियमाः

1. संस्कृतप्रसारपरिषद्, आरा-पक्षत इदं षाण्मासिकी शोधपत्रिका संस्कृतेन चैत्र-आश्विनमासयोः (मार्च-सितम्बर) प्रकाश्यते। वर्षारम्भः चैत्रात् (मार्च तः)मन्यते।
2. ग्राहकत्वं पूर्णवर्षस्यैव स्वीक्रियते। मध्येवर्षं ग्राहकत्वं काङ्क्षतः पूर्णवर्षस्य शुल्कमपेक्ष्यते। तादृशाय ग्राहकाय वर्षस्य पूर्वप्रकाशितोऽङ्क उपलब्धौ सत्यां प्रेषयिष्यते।
3. वार्षिकं शुल्कम् द्विशतं (200) रूप्यकाणि। एकस्याङ्कस्य शुल्कम् एकशतं (100) रूप्यकाणि।
4. आजीवनं ग्राहकताशुल्कं द्विसहस्रं (2000) रूप्यकाणि।
5. शुल्कप्रेषणस्योपायाः-

   **(i) NEFT Banking**

   Bank - Indian Bank, Ara (Bihar)
   IFSC - IDIB000A047
   Name - Sanskrit Prasara Parishad
   Acc. No. - 552203784
   शुल्कं संप्रेष्य तस्य सन्देशसूचना (Message) अत्र देया-
   डॉ. नीलमणि पाठकः, दूरभाषः 8102327064
   Email-**neelmanipathak19@gmail.com**

   **(ii) बैंक ड्राफ्ट ‘संस्कृतप्रसारपरिषद्’** इति नाम्ना आरा (बिहार) नगरे व्यवहरणीयम्।
   **ड्राफ्ट प्रेषणस्थलम् -** डॉ. नीलमणि पाठकः, गणपति ज्वेलर्स के पीछे, महावीर स्थान, मौलाबाग, आरा (विहार)-802301
6. आरण्यकस्य बेबसाईट-**www.aranyakam.in**
7. विमर्शात्मका अनुसन्धानात्मकाश्च शास्त्रीया अप्रकाशितपूर्वा उच्चस्तरीया गम्भीराश्च मौलिका निबन्धाः प्रकाशनाय गृह्यन्ते।
8. काव्य-नाटक-चरित्रवर्णन-व्यङ्ग्य-हास्यसम्बद्धा नव्या रचना अत्र स्थानं न लभन्ते।
9. प्रकाशनाय प्रेषिताः सर्वविधा रचनाः शुद्धा एकस्मिन् पत्रपृष्ठे सुस्पष्टाक्षरैः लिखिताः टङ्किता वा स्युः। रचनाऽन्ते रचयितुः आवाससङ्केतः पदनिर्देशः ई-मेल संकेतः, दूरभाषसंख्या च उल्लिखिताः स्युः।
10. प्रकाशितसंस्कृतकाव्यनाटकाऽऽलोचनादिग्रन्थानां समीक्षार्थं सम्बद्धग्रन्थस्य प्रतिकृतिद्वयं सम्पादकं प्रति प्रेषणीयम्।
11. लेखकेभ्यः तत्प्रकाशितलेखानां पञ्च प्रतिरूपाण्यपि दीयन्ते।
12. लेखानां प्रकाशनस्य सम्पादनस्य च सर्वाधिकारः सम्पादकाधीनः।
13. ‘आरण्यक’सम्बद्धा सर्वविधा जिज्ञासा **प्रो. गोपबन्धु मिश्रः, संस्कृतविभागः, काशीहिन्दूविश्वविद्यालयः, वाराणसी (उ.प्र.)-221005 इति सङ्केतेन** (चल.) 9450870788 विधेया।
14. शोधलेखसम्प्रेषणं तत्सम्बद्धपत्रव्यवहारश्च
   Email- **gopabandhuh@gmail.com**
   **aranyakam94@gmail.com** इत्यनयोरन्यतरेण सङ्केतेन विधातव्यः।

# आरण्यकम्

संस्कृतप्रसारपरिषदः अर्धवार्षिकी सन्दर्भिता संस्कृतशोधपत्रिका

विश्वविद्यालयानुदानायोगस्य( UGC )यत्नसूच्याम्( Carelist )अन्तर्भुक्ता

वर्षाङ्कौ - त्रयस्त्रिंशं वर्षम् - द्वितीयोऽङ्कः

**चैत्रः, वि.सं.२०८२**

**सितम्बर २०२५**

**प्रतिवर्षं प्रकाशनकालः**
**चैत्रः, आश्विनः-विक्रमाब्दः**
**मार्च, सितम्बर**

*प्रत्यङ्कम् - 100 रूप्यकाणि* *वार्षिकं शुल्कं 200 रूप्यकाणि*

**परामर्शदात्री समितिः**

डॉ. उमाशङ्कर शर्मा 'ऋषिः', पटना
डॉ. राय अश्विनी कुमारः, बोधगया

❀

संस्थापकः

**स्व. पण्डित व्रजभूषण मिश्र 'आक्रान्तः'**

❀


सम्पादकः

**प्रो.गोपबन्धु मिश्रः**

पूर्वसंस्कृतविभागाध्यक्षः
काशीहिन्दूविश्वविद्यालयः, वाराणसी
पूर्वकुलपतिः
श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम् (गुजरात)
gopabandhuh@gmail.com

❀

सह-सम्पादकौ

**डॉ. सञ्जय कुमार चौबे**

sanjaychaubey.lbs@gmail.com

**डॉ. सुनीलकुमार प्रधानः**

sunilkumarp435@gmail.com


❀


प्रकाशिका

**संस्कृतप्रसारपरिषद्**

रामेश्वरलीलासदनम्
महावीरस्थानम्
मौलाबाग, आरा (विहारः) 802301

❀

संस्कृतप्रसारपरिषद्, आरा पक्षतः प्रो. गोपबन्धु मिश्रेण, दी महावीर प्रेस, बी.20/44, भेलूपुर, वाराणसी इत्याख्ये मुद्रणालये मुद्रितं प्रकाशितं च।


**प्रो. गोपबन्धु मिश्रः**
सम्पादकः

# सम्पादकीयम्

'**दिशः कालश्च सर्वेषां सदा कुर्वन्तु मङ्गलम्**' इति प्रातःस्मरणावसरे प्रार्थ्यते। पूर्वादयः चतस्रः दिशः, ऐशानादयः चत्वारः कोणाः, ऊर्ध्वम् अधश्च इति आहृत्य दश दिशः तथा च भूत–वर्तमान–भविष्यतः इति कालत्रितयमत्र मङ्गलकारि भूयासुरिति तात्पर्यम्। यद्यपि सर्वत्र सर्वदा च व्यापकत्वात् तथा च स्थावरजङ्गमनिर्विशेषेण सर्वस्यापि ताभ्यां व्याप्यत्वात् दिक्कालयोः अखण्डत्वम् अनस्वीकार्यम्, तथापि व्यावहारिकजगति पूर्वादेः प्रत्येकं दिशः तथा च भूतादेः प्रत्येकं कालखण्डस्य व्यवहारः प्रभावश्च सर्वेणाऽपि अवश्यमनुभूयमानो विषय एव। अत एव गीतायां श्रीभगवान् यथा सात्त्विकदानस्वरूपकथने–

**दातव्यमिति यद् दानं दीयतेऽनुपकारिणे।**
**देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम्।।** (गीता 17.20)

देशकालयोः वैशिष्ट्यमाह, तथैव

**अदेशकाले यद्दानमपात्रेभ्यश्च दीयते।**
**असत्कृतमवज्ञातं तत्तामसमुदाहृतम्।।** (गीता 17.22)

इति तामसदानस्वरूपविषयेऽपि देशकालयोः विशिष्टताम् उररीकरोति।

अर्थात् अखण्डे काले जीवन्तोऽपि जीवाः अपरिसीमितदिक्षु विचरन्तोऽपि स्वयं वर्तमानेन कालेन वर्तमानेन देशविशेषेण च सुतरां प्रभाविताः भवन्त्येव। कश्चिदपि जनः कियान् वा श्रेष्ठः विख्यातः अथवा कुख्यातः स्यात् सः एकस्मिन् काले शैशव–कौमार–यौवनजरादिषु कस्यामपि एकस्यामेव अवस्थायां भवति, किं च तस्मिन् काले सः ग्राम–नगर–पर्वत–प्रान्तरादिषु कुत्रचित् एकत्रैव भवति। किन्तु यस्यां कस्यामपि दिशि विद्यमानं देशविशेषं स गन्तुमिच्छेत् अथवा गच्छेत्, तथा च भूते वर्तमाने अथवा भविष्यत्काले केनापि कालावच्छेदेन सः जीवेत् सा दिक् स च कालः तस्य आत्मनः अभ्युदयाय निःश्रेयससिद्धये च भूयास्ताम्, तथा च तेन तत्तद्देशकालावच्छेदेन स्थितेन अपरस्य सर्वस्यापि सम्बद्धस्य मङ्गलं भूयादिति उपर्युक्ताया मङ्गलकामनायाः अस्याः अयमाशयः।

किं च कालस्य दुरतिक्रमत्वात् तथा च देशस्य स्थितिरूपादिव्यवहारादेः परिवर्तन-शीलत्वात् येन स्वस्य समये स्वस्य देशे च गौरवस्य अभ्युदयस्य च उत्तमाः क्षणाः दृष्टाः, तेनैव तस्यैव देशस्य चारित्रिकं पतनम्, व्यभिचरितं वृत्तम्, अवद्यकर्मसरणिः, साङ्कर्याश्रितद्वन्द्व-मोहावर्ते निमज्जनमपि दृष्टम्। त्रिभुवनख्याता स्वर्णमयी लङ्का अपि विध्वस्ता, आधुनिककाले 'एतस्य अभ्युदयसूर्यः कदापि अस्तं न याति' इति आभाणकेन अन्वितम् आङ्लशासनमपि तत्तद्देशेभ्यः अपसारितम्। भारतवर्षे आङ्लशासनात् प्राक् तत्समकालं च पर्याप्तां व्याप्तिं ख्यातिं कुख्यातिं च लभमाना लघु-लघुराज्यविशेषाः स्वतन्त्रताप्राप्तेः अनन्तरं भारतवर्षस्य

सम्प्रभुतायै आत्मसमर्पणं (प्रायशः अनिच्छयैव) कृतवन्तः एव, प्रबलप्रतापी रोमसम्राट् सिजरः स्वबन्धुनैव निहतः इत्येतादृशानि असंख्यातानि उदाहरणानि सन्ति। अतः एतेभ्यः नानाविधेभ्यः ऐतिहासिकप्रसङ्गेभ्यः अस्माभिः एतदेव शिक्षणं ग्राह्यं यत् यथाकालं यथादेशं च सर्वैरपि भावात्मकदृष्ट्या स्वकर्मणि प्रवर्तिभिः भवितव्यमिति।

महाकविः कालिदासः रघूणामन्वयवर्णनप्रसङ्गे कालभेदेन वृत्तिभेदमेवं वर्णयति–

**शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम्।**
**वार्द्धके मुनिवृत्तीनां योगानान्ते तनुत्यजाम्।।** (रघु. 1.8)

श्रीमद्भागवतेऽपि श्रीकृष्णस्य बाललीलातः आरभ्य कंसवधादीनि नानाविधानि वर्णनानि लभ्यन्ते एव। स्वतन्त्रतासंग्रामावधावपि अनेकेषां तत्तदद्भुतबलिदानिनां हुतात्मनां गौरवगाथाः अस्मान् सुतरां तदर्थं प्रेरयन्त्येव। यद्यपि कालधर्मावच्छेदेन तत्तद्देशेषु तत्तत्कालेषु ते विद्यमानाः आसन्, किन्तु तेषां दृष्टिः प्रयोगविधिश्च सर्वहिताय आसीदित्यतः सः कालः राष्ट्रस्य कृते 'गौरवरक्षाकालः' इत्येतद्धेतोः उत्तमः आसीदेव इति कथयितुं शक्यते।

संस्कृतवाङ्मयस्य प्राचीनकालादारभ्य अद्यतनं कालं यावत् विविधेषु शास्त्रीयविषयेषु अभ्युदयसाधकेषु प्रसङ्गेषु यथा प्रामुख्यं विद्यते, तथैव यथाकालं यथादेशं सर्वस्यापि निःश्रेयससिद्धये भूयिष्ठाः प्रसङ्गा विद्यमानाः सन्त्येव। तेनैव सह वेदादिशास्त्राणीव प्रभूताः पुराणेतिहासादिग्रन्थाः तथा च कान्तासम्मिततया उपदेशयुजां काव्यनाटकादीनां महती उत्कृष्टा परम्पराऽपि विद्यते। तत्र च अनेकासाम् इदानीं यावत् अप्रकाशितानाम् असम्पादितानां च संस्कृतभाषानिबद्धानां शारदा-नेवारी-मलयालम-उत्कल-बङ्गादि-लिपिगतानां पाण्डुलिपीनां महान् संग्रहोऽपि तत्तत्सम्पादनकर्मणि तत्तत्प्रकाशनप्रसङ्गे च प्रवर्त्तितुकामानाम् उत्तमानां विदुषां प्रतीक्षायां विद्यमानोऽस्ति।

'आरण्यकम्' इतीदं संस्कृतशोधपत्रं स्वयत्नेन तत्तद्विषयेषु इदानीमपि अनालोचितानाम् उत अत्यल्पम् आंशिकतया वा पर्यालोचितानां विषयम् उररीकर्तुं यतमानाः ये विद्वांसः सन्ति तेषां संस्कृतभाषानिबद्धानां शोधात्मकविमर्शविशेषाणां परिप्रकाशनाय यतमानं विद्यते।

शोधपत्रस्यास्य एषः वर्तमानोऽङ्कः तादृशानां कतिपयानां लेखानां समूहमादाय विदुषां तत्त्वज्ञानां शोधविमर्शकारिणां च पुरतः आत्मानम् उपस्थापयतीति एतस्मिन् विषये तेषां विदुषां यूनां विमर्शकारिणां सहभागं विमर्शं च आशास्य अत्रैव विरम्यते।

विदुषां वशंवदः
गोपबन्धु मिश्र
सम्पादकः, आरण्यकम्

# सूचीपत्रम्


| | विषयः | लेखकः | पृष्ठम् |
|---|---|---|---|
| 1. | अद्वैतवेदान्ते मायातत्त्वम् | डॉ. जानकीशरण आचार्यः<br>दर्शनसङ्कायाध्यक्षः<br>श्रीसोमनाथसंस्कृतविश्वविद्यालयः<br>वेरावलम्, गुजरातम् | 1-8 |
| 2. | वैदिकवाङ्मये शल्यक्रिया-विज्ञानम् | डॉ. शैलेश कुमार मिश्रः<br>सहायकाचार्यः<br>राजकीय संस्कृत महाविद्यालयः<br>राँची, (विनोबा भावे विश्वविद्यालयः) | 9-16 |
| 3. | सन्दिग्धशब्दानां साधुत्वासाधुत्व-विवेचने काव्यालङ्कारसूत्रवृत्ति-ग्रन्थः : एकमध्ययनम् | डॉ. मृत्युञ्जय गराँइ<br>सहायकप्राध्यापकः (अंशकालिकः),<br>संस्कृतविभागः<br>रामकृष्ण-महाविद्यालयः, मधुबनी, बिहारः | 17-26 |
| 4. | आस्तिकदर्शनेषु ज्ञानस्वरूपविमर्शः | डॉ. सन्दीप मल्लिकः<br>सहायकाचार्यः, संस्कृतविभागः<br>स्वामी निस्वम्बलानन्द गर्ल्स कॉलेज<br>हुगली, पश्चिम बङ्गः | 27-33 |
| 5. | किञ्चिद् रामायणीयम् | | 34 |
| 6. | अष्टाध्याय्यां वासरूपविधिविमर्शः | *डॉ. सोमवीरसिंघलः<br>**डॉ. ज्वलन्तकुमारश्च<br>*सहाचार्यः, संस्कृतविभागः,<br>दिल्ली विश्वविद्यालयः, दिल्ली<br>**पूर्वशोधच्छात्रः, संस्कृत-विभागः<br>दिल्लीविश्वविद्यालयः, दिल्ली | 35-43 |
| 7. | किञ्चिद् रामायणीयम् | | 44 |

| विषयः | लेखकः | पृष्ठम् |
|---|---|---|
| 8. **आधुनिकसंस्कृतकाव्यशास्त्रे काव्यकारणमीमांसा** | डॉ. सर्वेशकुमारशाण्डिल्यः<br>सहायकाचार्यः अध्यक्षश्च, संस्कृतविभागः<br>दयानन्द वैदिक कॉलेज, उरई<br>जालौन (उ.प्र.) | 45-54 |
| 9. **जैनदर्शने प्रमाणलक्षणविवेचनम्** | *श्रावणी मण्डलः<br>**शशांकशेखरपात्रश्च<br>*छात्रा, विद्यासागरविश्वविद्यालयः<br>**सहायकाध्यापकः, दूरशिक्षाविभागः<br>विद्यासागरविश्वविद्यालयः | 55-62 |
| 10. **न्यायदर्शने जीवशरीरनिरूपणम्** | किंकरदासः<br>अनुसन्धाता, न्यायविभागः<br>राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः | 63-72 |
| 11. **निरुक्तमीमांसयोर्नये देवता-स्वरूपपर्यालोचनम्** | अचिन्त्यकुमारपालः<br>शोधच्छात्रः<br>यादवपुरविश्वविद्यालयः | 73-82 |
| 12. **सांख्यदर्शनेऽन्तःकरणानि** | अलोकबेपारी<br>अनुसन्धाता, सांख्ययोगविभागः<br>राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः | 83-90 |


*

# अद्वैतवेदान्ते मायातत्त्वम्

**डॉ. जानकीशरण आचार्यः**

निर्विशेषात् स्वयम्प्रकाशाद् अद्वैताद् ब्रह्मणः सविशेषस्य सलक्षणस्य नानात्मकस्य जगतः उत्पत्तौ माया कारणमिति अद्वैतवेदान्ते स्वीक्रियते। शङ्करभगवत्पादैः माया–अविद्या-अज्ञान–अव्यक्तादिशब्दानां समानार्थकत्वं भाष्ये वर्णितम्।[1] भाष्यकारेण अर्वाचीनेषु आचार्येषु माया–अविद्ययोः तारतम्यस्य विषये जीवेश्वरस्वरूपवर्णनविषये अविद्या–माययोः आश्रयत्वविषये च सिद्धान्तभेदा दृश्यन्ते। तद्यथा भामतीमते अज्ञानविषयीकृतं चैतन्यम् ईश्वरः, अज्ञानाश्रयीभूतं चैतन्यं जीव इति। ईश्वरविषये आभासवादं जीवविषये प्रतिबिम्बवादं च स्वीकृत्य अज्ञानोपहितं बिम्बचैतन्यम् ईश्वरः, अन्तःकरणतत्संस्कारावच्छिन्नाज्ञानप्रतिबिम्बितं चैतन्यं जीवः इति विवरणप्रस्थाने। एवं तत्र माया–अविद्याशब्दयोः सूक्ष्मार्थभेदः सूचितः। जीवत्व-ईश्वरत्वप्रापकोपाधिस्तु अनादिभावरूपं त्रिगुणात्मकं सदसद्भ्यामनिवर्चनीयम् अज्ञानम्। तच्च अज्ञानं माया–अविद्याभेदेन द्विविधम्। शुद्धसत्त्वप्रधाना माया। मलिनसत्त्वप्रधाना अविद्या। मायोपहितं चैतन्यम् ईश्वरः, अविद्योपहितं चैतन्यं जीवः। मायाविवर्जिते ब्रह्मणः प्रवृत्तिर्न भवति। मायाशक्तिरेव अविद्यात्मिकां बीजशक्तिरव्यक्तनाम्ना व्यवह्रियते। इयं माया अग्नेरपृथग्भूता दाहिका शक्तिरिव परमेश्वराश्रिता अपृथग्भूता भवति। '**पादोऽस्य विश्वा भूतानि, त्रिपादस्यामृतं दिवि**'[2] इति श्रुत्यनुरोधात् इयं मायाशक्तिः ब्रह्मणः एकदेशवर्तिनी, न तु कृत्स्नवर्तिनी इति अङ्गीक्रियते वेदान्तसिद्धान्ते। यथा च बभाषिरे पञ्चदशीकाराः–

**न कृत्स्नब्रह्मवृत्तिः सा शक्तिः किन्त्वेकदेशभाक्।**
**घटशक्तिर्यथा भूमौ स्निग्धमृद्येव वर्तते॥**
**पादोऽस्य सर्वा भूतानि त्रिपादस्ति स्वयंप्रभः।**
**इत्येकदेशवृत्तित्वं मायाया वदति श्रुतिः॥**[3] इति।

इयं माया नित्यशुद्धबुद्धमुक्तस्वभावम् आत्मानमावृत्य तद्बलेनैव तद्विपरीतभावं विक्षिपति इति सङ्क्षेपशारीरककारैः अभाणि।[4] इयं मायाभिधाया अविद्यात्वं प्रमाणासहिष्णुत्वमेव।

अतः तर्कादिबलेन माया ज्ञातुं न पार्यते। '**अविद्याया अविद्यात्वमिदमेव तु लक्षणम्। मानाघातासहिष्णुत्वमसाधारणमिष्यते॥**'[5] इति। सूर्योदयकाले यथा तमसो नाशो दृश्यते तथा ज्ञानोदयकाले मायायाः प्रतीतिर्नश्यति—

**सेयं भ्रान्तिर्निरालम्बना सर्वन्यायविरोधिनी।**
**सहते न विचारं सा तमो यद्वद् दिवाकरम्॥**[6] इति।

आवरणविक्षेपभेदेन मायायाः शक्तिः द्विधा वर्तते। आभ्यामेव शक्तिभ्यां ब्रह्मणः वास्तविकं सद्रूपमाच्छाद्यते। अनया आवरणशक्त्या सच्चिदानन्दात्मकस्यात्मनः स्वरूपमानन्दाद्यात्मकम् आच्छाद्य कर्तृत्वभोक्तृत्वसुखदुःखमोहात्मकतुच्छभावना सम्भाव्यते। नवीनास्तु अद्वैतिनः अज्ञानस्य ज्ञानशक्तिः, क्रियाशक्तिश्चेति द्विधा वदन्ति। '**सत्त्वात् सञ्जायते ज्ञानम्**'[7] इति प्रामाण्याद् रजस्तमोभ्यामनभिभूतं सत्त्वं ज्ञानशक्तिः। क्रियाशक्तिस्तु आवरणविक्षेपभेदेन द्विविधा भवति। अत्र घटो नास्तीति व्यवहारहेतुः रजस्सत्त्वाभ्यामनभिभूतं तम आवरणशक्तिः। आकाशादिप्रपञ्चोत्पत्तिहेतुः तमस्तत्त्वाभ्यामभिभूतं रजो विक्षेपशक्तिः। '**यथोर्णनाभिः सृजते गृह्णते च**'[8] इति श्रुत्यनुरोधेन विक्षेपशक्तिमता अज्ञानेन उपहितस्यैव ईश्वरस्य जगत उपादानकारणता। अत्र मते आवरणशक्तिप्रधानम् अज्ञानमविद्या। विक्षेपशक्तिप्रधानमज्ञानं माया इत्युच्यते। इयमेव माया, तमः अविद्या, अव्यक्तमित्यादिशब्देन व्यवह्रियते।

एवञ्च मायां प्राचीना अद्वैताचार्याः एवं निरूपयन्ति—

माया

आवरणशक्तिः (ब्रह्मणः शुद्धस्वरूपम् आच्छादयति)

विक्षेपशक्तिः (शुद्धे ब्रह्मणि धर्मधर्मिभावम्, विषयविषयिभावम्, अनात्मबुद्धिं प्रपञ्चभावञ्च उत्पादयति)

मायाविषये नवीना अद्वैतिनः–

**अज्ञानम्**

ज्ञानशक्तिः

क्रियाशक्तिः

अविद्या (आवरणशक्तिः)

माया (विक्षेपशक्तिः)

अत्रेदानीं पूर्वोक्तं विचारं पुरस्कृत्य अद्वैतवेदान्ते मायास्वरूपं कथं निरूपितमिति किञ्चत् विव्रियते। वस्तुतः नामरूपादिविशिष्टस्य जगतो ब्रह्म उपादानमिति वेदान्तिनः

सङ्कीर्तयन्ति। किन्तु निर्विशेषं ब्रह्म सच्चिदानन्दस्वरूपप्रज्ञानघनमात्रम्। अतस्तस्य परिणामित्वं न सम्भवति। किन्तु '**यतो वा इमानि भूतानि जायन्ते**'[9] इत्यादि श्रुतयो ब्रह्म जगत्कारणमिति समामनन्ति। अपि च जगत्यस्मिन् यथा ब्रह्मणः सत्तास्फुरणे भासेते तथैव चैतन्यविलक्षणं जडत्वमपि भासते। एवं निर्गुणं निर्विशेषं ब्रह्म जगत्कारणं कथं भवेत् इति विचार्यमाणे तत्त्वविदः इदं सत्यम् आविष्कृतवन्तः यत् सत्त्वरजस्तमोगुणात्मकमायाशक्तिकारणेनैव ब्रह्म जगतः'उपादानं भवितुम् अर्हतीति। तथा च भवतः श्रुति–स्मृती– '**ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढाम्**'[10], '**दैवी ह्येषा गुणमयी मम माया दुरत्यया**'[11] इति। सूत्रकृता '**तदधीनत्वादर्थवत्**'[12] इति सूत्रेण कथितमर्थं भाष्यकारा एवं व्यवृण्वन्– '**अर्थवती हि सा। न हि तया विना परमेश्वरस्य स्त्रष्टृत्वं सिद्ध्यति, शक्तिरहितस्य तस्य प्रवृत्त्यनुपपत्तेः**'[13] इति। परमेश्वराश्रयया अविद्ययैव कृतं जगद्बीजमित्यपि जगदुः भाष्यकाराः '**अविद्यात्मिका हि बीजशक्तिरव्यक्तशब्दनिर्देश्या परमेश्वराश्रया मायामयी महासुप्तिः, यस्यां स्वरूपप्रतिबोधरहिताः शेरते संसारिणो जीवाः**'[14] इति।

श्रुतिस्मृतिषु वेदान्तदर्शने च इयं माया अविद्याशक्तिप्रधानशक्त्यक्षराज्ञानतमोऽग्रहणाव्याकृतादिशब्दैः बहुधा व्यपदिश्यते। पञ्चपादिकायां मायायाः चतुर्दश नामानि प्रोक्तानि। लोके तावद् अबाधितस्य सत्त्वम्, बाध्यमानस्य असत्यत्वं प्रसिद्धम्। यथा ऋतस्य अबाधितत्वम्, अनृतस्य बाधितत्वम्। यद्यपि इयं माया न परमार्थसती, तथापि न असती। इयं माया बाधितत्वान्न सद्रूपा। '**भूयश्चान्ते विश्वमायानिवृत्तिः**'[15], '**तरत्यविद्यां विततां हृदि यस्मिन्निवेशिते**', '**मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते**'[16] इत्यादिश्रुतिस्मृतिभ्योऽवगम्यते यदियं माया ब्रह्मज्ञानेन निवर्तते, अतः तस्या अबाधितत्वं सत्त्वं दुर्वचम्। न हि सद्वस्तु कदाचिन्निवर्त्यते यथा ब्रह्म। प्रतीतिविषयत्वात् नेयं माया असद्रूपा, न हि असत्पदार्थः कदाचित् प्रतीतिविषयो भवति, यथा शशशृङ्गम्। ज्ञानात्प्राक् माया कार्यरूपेण प्रतीयमानत्वेन तत्परिणामित्वेन अनुमितिविषयत्वेन च न शशविषाणवदसत्त्वम्। माया जगदाकारेण परिणता प्रतीतिविषया भवति। अतो माया असत्त्वमिति न सुवचम्। सत्त्वासत्त्वयोः व्याप्यवृत्तित्वेन कालभेदेन एकत्र स्वीकर्तुमशक्यत्वात् नापि सदसद्रूपा। दृष्टनष्टस्वरूपाणां स्वप्नेन्द्रजालिकपदार्थानामिव मायाया अपि सदसद्विलक्षणत्वरूपम्, अनिवर्चनीयत्वमिति यावत्। लोके तावद् अबाधितस्य सत्त्वम्, बाध्यमानस्य असत्यत्वं प्रसिद्धम्। यथा ऋतस्य अबाधितत्वम्, अनृतस्य बाधितत्वम्। '**नासदासीन्नो सदासीत्तदानीम्**'[17] इति श्रुतिरपि अस्याः सदसत्त्वविलक्षणतां ब्रवीति। एवमेव माया

ब्रह्मणो भिन्नाऽभिन्ना वा निर्वक्तुमशक्या। ब्रह्माभिन्नत्वे तस्या बाधायोगात् ब्रह्मणः कालत्रयाबाध्यत्वात्। नापि ब्रह्मणोऽत्यन्तभिन्ना, अद्वैतबोधकश्रुतिविरोधात्। भिन्नाभिन्नत्वं त्वेकत्र विरुद्धम्, अतः उभयरूपाऽपि न भवति। एवमेव इयं माया अनादित्वात् न सावयवा, सावयवत्वे जन्यत्वापत्तेः। नापि निरवयवा, परिणामासम्भवात्। सावयवत्वनिरवयत्वयोः एकत्र विरोधादेव न उभयात्मिकापि सम्भवति। अतः सत्त्वासत्त्वाभ्यां भिन्नत्वाभिन्नत्वाभ्यां साङ्गत्वानङ्गत्वाभ्यां निर्वक्तुमशक्यरूपा इयमनिर्वचनीयरूपा महाद्भुता अत्यन्ताश्चर्यरूपा च वर्तत इति। तदगादिषुः भगवत्पादाः—

**सन्नाप्यसन्नाप्युभयात्मिका नो भिन्नाप्यभिन्नाप्युभयात्मिका नो।**
**साङ्गाप्यनङ्गाप्युभयात्मिका नो महाद्भुताऽनिर्वचनीयरूपा।।**[18] इति।

अत एव मायोपाधिकं ब्रह्म जगज्जन्मादौ शक्तमिति सा शक्तिरित्युच्यते। तथा च श्रुतिः '**परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया**'[19] इति। अस्याः शक्तेः परत्वं स्वकार्यापेक्षया। शक्तिरेषा विचित्रकार्यकारित्वाद्विविधा। ऐतिह्यमात्रा सा न प्रमाणसिद्धा अत एव उक्तं श्रूयत इति। ज्ञानरूपेण बलेन या सृष्टिक्रिया सा अनादिमायात्मकत्वात् स्वाभाविकीति श्रुत्यर्थः। अमुमेवार्थं वार्तिककारा अपि एवं व्यवृण्वन्– '**आत्माऽविद्यैव नः शक्तिः सर्वशक्तस्य सर्जने**'[20] इति। तत्त्वप्रदीपकारा अपि प्रागुक्तं श्रुतिवाक्यं प्रमाणयन्त एवमवोचन् —

**पराऽस्य शक्तिर्विविधा सर्गाद्या भावशक्तयः।**
**इति श्रुतिस्मृतिमिता शक्तिः केन निवार्यते।।**[21] इति।

यद्यपि ब्रह्म निर्विशेषं तथापि निर्विशेषे ब्रह्मणि जगद्व्यापारं घटयतीति सा दुर्घटकारिणी माया। एतादृशी तस्य शक्तिः उदकादीनां द्रवत्वादिवत् स्वाभाविकी वर्तते। तथा च जगदुः विद्यारण्यमुनयः—

**द्रवत्वमुदके वह्नावौष्ण्यं काठिन्यमश्मनि।**
**मायाया दुर्घटत्वं च स्वतः सिध्यति नान्यतः।।**[22] इति।

तथा चेयं माया जडा, अत एव अपरा प्रकृतिरिति श्रीभगवानभाषत—

**भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च।**
**अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा।।**[23] इति।

अत्र जडवर्गेण स्वविकारेण सह माया प्रदर्शिता। 'मे प्रकृतिः' इति कथनात् मायेयं ब्रह्माश्रिता ब्रह्मोपाधिभूता इत्यर्थलाभः। तेन साङ्ख्याभिमतप्रधानस्य निरासः। तेषां मते तु प्रधानपदवाच्या प्रकृतिः स्वतन्त्रा। किन्त्विह वेदान्ते तु इयं माया ब्रह्माधीनत्वादस्वतन्त्रा।

तत्र मायाया जगदुपादानत्वं संसारहेतुत्वञ्चेत्थम्– प्राक् प्रथमाध्यायोक्तरीत्या अनाद्यनिर्वचनीय-त्रिगुणात्मिका प्रकृतिः माया अविद्या चेति द्विविधा। तत्र शुद्धसत्त्वप्रधाना, विक्षेपशक्तिप्रधाना वा माया। मलिनसत्त्वप्रधाना आवरणशक्तिप्रधाना वा अविद्या। तयोः प्रतिबिम्बितं चैतन्यं क्रमेण ईश्वरो जीवश्च इत्याख्यायेते। तथा चोक्तं श्रुतौ – '**जीवेशावाभासेन करोति माया अविद्या च स्वयमेव भवति**'[24] इति। वाक्येनानेन मायाऽविद्ययोरभेदोऽपि स्फुटीभवति। उभयोः लक्षणमपि अनिर्वचनीयत्वं ब्रह्मज्ञानप्रतिबन्धकत्वं भ्रमोत्पादकत्वं चेति समानमेव। अयं मायाशब्दो मणिमन्त्रादिवत् सत्यं वस्तु इति वक्तुं न शक्यते। यतो हि केवलमणिमन्त्रादिमति पुरुषे मायाशब्दो न प्रयुज्यते, किन्तु मन्त्रादिभ्यो मिथ्याकार्यं यदा जायते, तदैव मायाशब्दप्रयोगः। अतोऽयं मायाशब्दो मिथ्यावस्तुविषयकः। अत एव '**माया ह्येषा मया सृष्टा यन्मां पश्यसि नारद**'[25] इत्यादौ मिथ्याकार्ये मायाशब्दस्य प्रयोगः। तथा सति '**मायां तुं प्रकृतिं विद्यात्**'[26] इति श्रुत्या निखिलस्यापि प्रपञ्चस्य मायाकार्यत्वान्मिथ्यात्वं स्फुटं भवति। शुक्त्यादिषु रजतादीनामुपादानभूता अविद्याऽपि मायैव। ब्रह्मज्ञानेन निवर्तमानायामविद्यायां '**तस्याभिध्यानाद्योजनात्तत्त्वभावाद्भूयश्चान्ते विश्वमायानिवृत्तिः**'[27] इति रूपेण मायाशब्दः प्रयुज्यते। सर्वोपनिषद्रूपा भगवद्गीताऽपि तथैव दर्शयति। तथा हि तत्र '**अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः**'[28] इत्युपक्रम्य '**ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः**'[29] इत्युक्तं भवति। अत्र अज्ञानम् आत्मचैतन्यमावृणोति, किन्तु ज्ञानेन निवर्त्यत इति प्रोक्तम्। भाष्यकारेणापि बहुत्र मायाऽविद्ययोः सामानाधिकरण्यं प्रयुक्तम्।[30] विवेकचूडामणावपि दर्शितम्–

**अव्यक्तनाम्नी परमेशशक्तिरनाद्यविद्या त्रिगुणात्मिका परा।**
**कार्यानुमेया सुधियैव माया यया जगत्सर्वमिदं प्रसूयते।।**[31] इति।

एतदुक्तं भवति – सेयम् अव्यक्तनाम्नी परमेश्वरस्याचिन्त्याद्भुतशक्तिः माया रूपाद्यभावेन प्रत्यक्षगोचरत्वाभावेऽपि कार्यानुमेया भवति यथा शब्दादिभिः गगनादिकमनुमीयते। एतच्छक्त्य–नङ्गीकारे तु प्रागुक्तरीत्या निर्गुणस्य ब्रह्मणः स्रष्टृत्वासम्भवात्, निष्कारणं कार्योत्पत्त्ययोगात् '**इन्द्रो मायाभिः पुरुरूप ईयते**'[32] इत्यादिश्रुतिविरोधः। अतः कार्यानुमेयया अनया मायया सर्वं जगत् महत्तत्त्वादिब्रह्माण्डान्तं प्रसूयते। तथा च श्रुतिः '**मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्**'[33] इति, '**अस्मान्मायी सृजते विश्वमेतत्**'[34] इति च। एवन्निरूपितायामनादिप्रकृतौ मायायां यज्जगन्निर्माणशक्तिर्विद्यते। सृष्टेः प्राक् माया अव्याकृतनामरूपात्मिका विकारप्रयोजकजाड्यादिधर्मोपेता च तिष्ठति।

उपादानं च आरम्भि, परिणामि, विवर्ति चेति त्रिविधम्।[35] तर्हि ब्रह्मणो जगदुपादानत्वं

कीदृशम्? अत्रोच्यते– यथा परमाणूनामारम्भकत्वमस्ति तथा ब्रह्मण आरम्भकत्वं तावन्न सम्भवत्येव, अद्वितीयत्वात्। अतो वेदान्तेषु आरम्भवादस्य सुतरामनङ्गीकारात् परिणामविवर्तवादौ अवशिष्येते। नापि ब्रह्मणः परिणामित्वम्, तस्य कूटस्थचैतन्यरूपत्वात्। किन्तु ब्रह्मणो जगदुपादानत्वमविद्यया जगदाकारेण विवर्तमानत्वमेव। विशेषेण वर्तनं भानं विवर्तः। अर्थात् कारणस्य स्वयं किमपि विकारमनापद्य पूर्वावस्थामपरिहाय अन्यावस्थायामवभानं प्रतीतिः विवर्तो भवति। यथा रज्जुः स्वयं विकारमनापन्ना सर्प इव विशेषाकारेणावभासते। कुत एवं स्वीकरणीयम्? समाधीयते– '**तदैक्षत बहुस्यां प्रजायेय**'[36], '**यतो वा इमानि भूतानि जायन्ते**'[37] इत्यादिश्रुत्या जगतः अभिन्ननिमित्तोपादानकारणं ब्रह्मेवेत्यवगम्यते। किन्तु '**अस्थूलमनणु**'[38], '**नेति नेति**'[39] इत्यादिश्रुतिभिः निरस्तसमस्तविशेषं ब्रह्म उच्यते किल, तर्हि कथं निर्विशेषं सविशेषस्य प्रपञ्चस्य प्रकृतिरिति प्रश्नः समुदेति। अपि चान्यत्र '**मायां तु प्रकृतिं विद्यात्**'[40] इत्यादिश्रुतिभिः मायाया अपि प्रकृतित्वं जेगीयते, तथा च त्रिगुणात्मिकायास्तस्याः परिणामित्वमपि सम्भवितुमर्हति। मायाया जडत्वादिधर्मा अपि जगत्यनुवर्तन्त इति। अस्याः शङ्कायाः समाधानार्थं वेदान्तिभिः ब्रह्मणो मायायाश्चेति उभयोरपि उपादानत्वं स्वीक्रियते। तथा हि ब्रह्मण्यध्यस्ता विक्रियमाणा माया जगदाकारेण परिणमत इति सा परिणाम्युपादानम्, मायाऽधिष्ठानभूतं कूटस्थञ्च ब्रह्म जगदाकारेण विवर्तत इति विवर्तोपादानम्। तथापि तत्र परिणामवादो विवर्तवादस्य पूर्वभूमिः अतस्तस्य आश्रयः, उभयथाऽपि विवर्तकारणाज्ञानविषयत्वरूपं विवर्ताधिष्ठानत्वमविशिष्टमिति विवर्तवादे एव तात्पर्यम्, न तु परिणामवादे। यथोक्तं सङ्क्षेपशारीरककारैः– '**कृपणधीः परिणाममुदीक्षते क्षपितकल्मषधीस्तु विवर्तताम्**'[41] इति। तर्हि कः पुनर्विवर्त-परिणामयोर्भेदः? उच्यते– वस्तुनस्तत्समसत्ताकः कारणसलक्षणोऽन्यथाभावः परिणामः। यथा मृत्परिणामो घटो व्यावहारिकसत्ताकतया मृत्समसत्ताको जडत्वेन मृत्सलक्षणश्च। वस्तुनस्तदसमसत्ताकः कारणविलक्षणो वाऽन्यथाभावो विवर्तः। यथा शुक्तिरूप्यस्थले प्रातिभासिकस्य शुक्तिरजतस्य उपादानत्वेन प्रसिद्धम् अज्ञानापेक्षयान्यूनसत्ताकं रजतम्। एवं प्रपञ्चः पारमार्थिकचैतन्यस्वरूपात् स्वोपादानाद् ब्रह्मणो व्यावहारिकतया विषमसत्ताकः, जडत्वेन विलक्षणश्च। एतस्मात्कारणादेव प्रपञ्चे परिदृश्यमानाः सत्त्वजडत्वादिधर्मा अप्युपपद्यन्ते। तदेवोक्तम् –

**अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकम्।**
**आद्यं त्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयम्।।**[42] इति।

अतो विवर्तवादानुसारमद्वयचैतन्यकूटस्थरूपस्य ब्रह्मणः अज्ञानात्, तद्ब्रह्म द्वैतप्रपञ्चं

प्रति उपादानमिति कल्प्यते। अतो न तत्त्वतो ब्रह्म जगद्रूपमापद्यते, किन्तु केवलं जगद्रूपेण भासते। यथा शुक्तिरूप्यस्थले शुक्तिविषयकाज्ञानात् शुक्तौ रजताभावेऽपि रजतमस्तीति भासते, तद्वत्। यथा शुक्तिः तदवच्छिन्नं चैतन्यं वा रजताकारेण विवर्तते, तथैव ब्रह्म जगदाकारेण विवर्तते। तदभाषिषत पञ्चदशीकाराः –

**ततो निरंश आनन्दे विवर्तो जगदिष्यताम्।**
**मायाशक्तिः कल्पिका स्यादैन्द्रजालिकशक्तिवत्॥**[43] इति।

एवं रूपेण विवर्तवादे मायाया उपयोगस्तु विद्यत एव। विवर्तोपादानत्वादेव ब्रह्मणः प्रपञ्चोत्पत्त्यादिव्यापारेण नास्ति स्वरूपात् प्रच्युतिः।

एवमीश्वराश्रया जगद्विवर्तहेतुभूता विक्षेपशक्तिप्रधाना माया यथा रज्ज्वज्ञानं स्वावृतरज्जौ स्वशक्त्या सर्पादिकमुत्पादयति तथैव स्वावृतात्मनि विक्षेपशक्त्या आकाशादिप्रपञ्चमुद्भावयति। तथा चोक्तम् '**विक्षेपशक्तिर्लिङ्गादिब्रह्माण्डान्तं जगत् सृजेत्**'[44] इति। अविद्या तु जीवोपाधिभूता आवरणशक्तिप्रधाना। साऽऽवरणशक्तिः भेदबुद्धिजनकतया संसारहेतुः। यथा अल्पोऽपि मेघः अनेकयोजनायतमादित्यमण्डलं नयनपथपिधायकतया आवृणोति। यथोक्तम् –

**अन्तर्दृग्दृश्ययोर्भेदं बहिश्च ब्रह्मसर्गयोः।**
**आवृणोत्यपरा शक्तिः सा संसारस्य कारणम्॥**[45] इति।

तथा आवरणशक्तिरपि सच्चिदानन्दस्वरूपमावृणोति तदा जीवः आत्मानं कर्तृत्वभोक्तृत्वसुखदुःखमोहात्मकसंसारवन्तमात्मानं मत्वा मुह्यति शोचति च। तथा चात्र भवति श्रुतिस्मृती '**समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः**'[46], '**अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः**'[47] इति। सेयं माया सर्वान् जीवान् मोहयति। अतो मायावशं गतत्वादेव सर्वे जीवाः संसरन्ति।

'**माया च तमोरूपानुभूतिस्तदेतज्जडं मोहात्मकम्**'[48] इत्यनेन श्रुतिवाक्येन जाड्यमोहादयो मायाधर्मा अपि व्याख्याताः। एषा माया जीवान् प्रति आत्मस्वरूपम् आच्छादयन्त्यपि ब्रह्म न आवृणोति, तद्दृष्ट्या मायायाः कल्पनामात्रत्वात्। तथा च '**तस्मिंश्चान्यो मायया सन्निरुद्धः**'[49], '**तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो-ऽभिचाकशीति**'[50] इत्याद्याः श्रुतयो जीवस्यैव मायापाशावशङ्गतत्वं ब्रुवते। परमार्थरूपेण तु अद्वयब्रह्मण एव सत्यत्वात्, माया विद्वद्दृष्ट्या तुच्छा इति सिद्धान्तः इति शम्।।

*

## सन्दर्भाः


1. ब्रह्मसूत्रशाङ्करभाष्यम् 1.4.3.
2. छान्दोग्योपनिषत् 3.12.6
3. पञ्चदशी 2.54, 55
4. आच्छाद्य विक्षिपति संस्फुरदात्मरूपं
   जीवेश्वरत्वजगदाकृतिभिर्मृषैव।
   अज्ञानमावरणविभ्रमशक्तियोगाद्
   आत्मत्वमात्रविषयाश्रयताबलेन।।
   संक्षेपशारीरकम् 1.20
5. बृहदारण्यकोपनिषद्भाष्यवा. 1.1.181
6. नैष्कर्म्यसिद्धिः 3.66
7. भगवद्गीता 14.17
8. मुण्डकोपनिषद् 1.1.7
9. तैत्तिरीयोपनिषत् 3.1.1
10. श्वेताश्वतरोपनिषत् 1.3
11. भगवद्गीता 7.14
12. ब्रह्मसूत्रम् 1.4.3
13. ब्रह्मसूत्रशाङ्करभाष्यम् 1.4.3
14. ब्रह्मसूत्रशाङ्करभाष्यम् 1.4.3
15. श्वेताश्वतरोपनिषत् 1.10
16. भगवद्गीता 7.14
17. ऋग्वेदः 10.129.1
18. विवेकचूडामणिः 111
19. श्वेताश्वतरोपनिषत् 6.8
20. बृहदारण्यकोपनिषद्भाष्यवा.4.3.1784
21. तत्त्वप्रदीपिका 1.23
22. पञ्चदशी 6.135
23. भगवद्गीता 7.3
24. नृसिंहतापनीयोपनिषत् 9
25. महाभारतम् 12.339.45
26. श्वेताश्वतरोपनिषत् 4.10
27. श्वेताश्वतरोपनिषत् 1.10
28. भगवद्गीता 5.15
29. भगवद्गीता 5.16
30. द्रष्टव्यम्–भगवद्गीताशाङ्करभाष्यम् 9.10, ब्रह्मसूत्रशाङ्करभाष्यम् 1.4.3
31. विवेकचूडामणिः 110
32. ऋग्वेदः 6.47.18, बृहदारण्यकोपनिषत् 2.5.19
33. श्वेताश्वतरोपनिषत् 4.10
34. श्वेताश्वतरोपनिषत् 4.9
35. पञ्चदशी 13.6
36. तैत्तिरीयोपनिषत् 2.6.1
37. तैत्तिरीयोपनिषत् 3.1.1
38. बृहदारण्यकोपनिषत् 3.8.7, 3.8.8
39. बृहदारण्यकोपनिषत् 2.3.6
40. श्वेताश्वतरोपनिषत् 4.10
41. संक्षेपशारीरकम् 2.81
42. दृग्दृश्यविवेकः 20
43. पञ्चदशी 13.10
44. दृग्दृश्यविवेकः 13
45. दृग्दृश्यविवेकः 15
46. मुण्डकोपनिषद् 3.1.2
47. भगवद्गीता 5.15
48. नृसिंहतापनीयोपनिषत् 9
49. श्वेताश्वतरोपनिषत् 4.9
50. मुण्डकोपनिषद् 3.1.1


*

# वैदिकवाङ्मये शल्यक्रियाविज्ञानम्

**डॉ. शैलेश कुमार मिश्रः**

प्राचीनभारतीयचिकित्साविज्ञानस्य क्षेत्रे सर्वस्वीकृतमिदं तथ्यं यत् शल्यतन्त्रं नाम शास्त्रं चिकित्सातन्त्रेषु सर्वश्रेष्ठं वर्तते। आयुर्वेदस्याष्टाङ्गेषु शल्य–शालाक्य–कायचिकित्सा–कौमारभृत्यभूतविद्याऽगदतन्त्र–रसायन–वाजीकरणेत्यादिषु शल्यतन्त्रं प्रथमत्वेन परिगणितमस्ति–

**अष्टास्वपि आयुर्वेदतन्त्रेषु एतदेवाधिकमभिमतम्।**[1]

भारतवर्षे आयुर्वेदस्य आदिपुरुषः ऋषिः भरद्वाज आसीत्। देवभिषग् धन्वन्तरिः महर्षिभरद्वाजादेव शल्यशास्त्रमधीतवान् इति हरिवंशपुराणे उल्लिखितमस्ति। कतिपयेषामितिहासविदामभिमतमिदमपि वर्तते यद् धन्वन्तरिः शक्राच्छल्यशास्त्रमधीतवान्। धन्वन्तरिणा उपदिष्टो विश्वामित्रसुतः सुश्रुतः शल्यतन्त्रस्य सुविख्यातं ग्रन्थं सुश्रुतसंहितां विरचयामास–

**विश्वामित्रसुतः श्रीमान् सुश्रुतः परिपृच्छति।**[2]

सम्पूर्णज्ञानविज्ञानानाम् आदिमस्रोतांसि वर्तन्ते चत्वारो वेदाः। आयुर्वेदस्य प्रधानाङ्गमिदं शल्यतन्त्रं वेदेषु विशेषतया अथर्ववेदे वैशद्येनाख्यातमस्ति। वेदेषु यत्र तत्र 'शल्य' शब्दः प्रयुक्तो दृश्यते सोऽस्ति बाणफलकस्य बोधकः। शल्यशब्दः शल्, श्वल् (आशुगमने) धातोर्निष्पन्नो भवति–

**शल् श्वल् आशुगमने धातुस्तस्य शल्यमिति रूपम्।**[3]

आयुर्वेदे प्रयुक्तः शल्यशब्दः देहच्छेदन–भेदन–व्यधनकर्तनादिकर्मकारिणां लौहमयानां प्रकृतिनिर्मितानां वा शल्यानां वाचको वर्तते –

**सर्वशरीराबाधकरं शल्यम्।**[4]

एष एव शल्यशब्दः व्यापकत्वेन यत्र व्याख्यातः तस्यैव नामकरणं शल्यतन्त्रमिति कृतम्। शरीरे प्रविष्टं बाणफलकं निस्सारयितुं शल्यचिकित्सायाः आश्रयो गृह्यते इति

संकेतः अथर्ववेदस्य 'इषुनिष्कासनसूक्ते' प्राप्यते। शरीरे प्रविष्टं बाणं निस्सारयितुं मन्त्रोऽयं प्रयुज्यते –

**यां तो रुद्र इषुमास्यदङ्गेभ्यो हृदयाय च।**
**इदं तामद्य त्वद् वयं विषूचीं वि वृहामसि।।**
**यास्ते शतं धमनयोऽङ्गान्यनु विष्ठिताः।**
**तासां ते सर्वासां वयं निर्विषाणि ह्वयामसि।।**[5]

मन्त्रे बाणविद्धहृदयात् बाणनिस्सारणस्योल्लेखः मिलति यत्खलु शल्यक्रियां विना सर्वथा असम्भवमेव वर्तते। इषुनिष्कासनसूक्ते शल्यक्रियायाः संकेतो वर्तते। शल्यचिकित्सायाः अद्भुतश्चमत्कारी च प्रसङ्गः ऋग्वेदे समुपलभ्यते। तत्रोल्लेखो वर्तते यत् मानवशरीरे पशुशिरसः अस्थायि प्रत्यारोपणं विधीयते पुनश्च पूर्वतः सुरक्षितं तदेव मानवीयं शिरः प्रत्यारोप्यते–

**तद्वां नरा सनये दंस उग्रमाविष्कृणोमि तन्यतुर्न वृष्टिम्।**
**दध्यङ् ह यन्मध्वाथर्वणो वामश्वस्य शीर्ष्णा प्र यदीमुवाच।।**[6]

मन्त्रस्यास्य भाष्यं कुर्वता सायणाचार्येण आख्यायिका चैका उल्लिखिता–

अत्रेयमाख्यायिका। इन्द्रो दधीचे प्रवर्ग्यविद्यां मधुविद्यां चोपदिश्य यदिमामन्यस्मै वक्षसि शिरस्ते छेत्स्यामीत्युवाच। ततोऽश्विनावश्वस्य शिरश्छित्त्वा दधीचः शिरः प्रच्छिद्यान्यत्र निधाय तत्राश्व्यं शिरः प्रत्यधत्ताम्। तेन च दध्यङ् ऋचः सामानि यजूंषि च प्रवर्ग्यविषयाणि मधुविद्याप्रतिपादकं ब्राह्मणं चाश्विनावध्यापयामासतुः। तदिन्द्रो ज्ञात्वा वज्रेण तच्छिरोऽच्छिनत्। अथाश्विनौ तस्य स्वकीयं मानुषं शिरः प्रत्यधत्तामिति शाट्यायनवाजसनेययोः प्रपञ्चेनोक्तम्।।[7]

सायणो प्रवदति यदिन्द्रः महर्षेः अथर्वणः पुत्रं दधीचिं प्रवर्ग्यविद्यां मधुविद्यां चोपदिष्टवान्। उपदेशानन्तरमिदमपि चोक्तवान् यदेषा विद्या न कस्मैचित् प्रदातव्या। यदि त्वम् अन्यस्मै कस्मैचिदपि एनां गुह्यमधुविद्यां प्रकाशयिष्यसि चेत्तव शिरश्छेदं करिष्यामीति। दधीचिमुनेः मधुविद्यां ज्ञातुम् देवभिषजौ अश्विनीकुमारौ एकमुपायं कृतवन्तौ। महर्षेस्तद्विद्यामवगम्य तौ तस्य शिरश्छेदं विहाय सुरक्षितं कृतवन्तौ अश्वस्य चैकं शिरः छित्त्वा प्रत्यारोपयतां च। एतद् ज्ञात्वा शक्रः स्ववचनानुसारं दधीचिमुनेः शिरः छिन्नवान् यद् अश्वस्य शिरः आसीत्। पुनश्च मधुविद्याविदौ अश्विनीकुमारौ महर्षेः स्वकीयं सुरक्षितं शिरः प्रत्यारोपितवन्तौ।

प्रसङ्गेनानेन इदं सिध्यति यद् अश्विनीकुमारौ शल्यतन्त्रस्य महान्तौ ज्ञातारौ आस्ताम्, यतो हि सफलं शिरःप्रत्यारोपणं ताभ्यां विहितम्। आख्यायिकयाऽनया अन्यानि अपि कानिचित्तथ्यानि प्रकटीभवन्ति। अत्र इदं ध्यातव्यं स्याद्यत् छिन्नमपि शिरः सुरक्षितं कर्तुं शक्यते पुनः प्रत्यारोपणं च तस्य विधातुं शक्यम्। इदमपि ध्यातव्यमस्ति यद् मानवशरीरे मानवेतरप्राणिनां शिरः प्रत्यारोपणेनापि तस्य व्यक्तित्वं न परिवर्तते। यदि शिरःप्रत्यारोपणं सम्भवति स्म तर्हि एतदपि स्वीकरणीयं यत् अन्यानि शल्यकर्माणि सरलतया सम्पाद्यानि स्युः। प्रसङ्गोऽयं महर्षिसुश्रुतप्रणीतसिद्धान्तालोके अवलोकनीयो वर्तते।

महर्षिः सुश्रुतः अस्मच्छरीरस्थानां 'मर्म'स्थलानामुल्लेखं करोति। मारयन्तीति मर्माणि इति वदति सुश्रुतसंहिताभाष्यकारः डल्हणाचार्यः। अपि च मरणकारित्वान्मर्म इति महर्षिवाग्भटः। मर्मशब्दस्य अर्थोऽस्ति शरीरस्य तत्स्थानं यत्रोपघातेन मरणं भवति। सुश्रुतस्य वचनमिदं वर्तते यत् मर्मसु न केवलं प्राणास्तिष्ठन्ति अपितु शरीरस्योपादानभूतानां त्रिधातूनां मूलानि सत्त्वादीनि अपि तत्रैव भवन्ति –

**मर्माणि मांससिरास्नाय्वस्थिसन्धिसन्निपाताः।**

**तेषु स्वभावत एव विशेषेण प्राणास्तिष्ठन्ति॥**[8]

सुश्रुतेन सप्तोत्तरशतं मर्मस्थलं प्रोक्तम् –

सप्तोत्तरं मर्मशतम्, तानि मर्माणि पञ्चात्मकानि भवन्ति तद्यथा– मांसमर्माणि, सिरामर्माणि, स्नायुमर्माणि, अस्थिमर्माणि, सन्धिमर्माणि चेति। तत्रैकादश मांसमर्माणि, एकचत्वारिंशत् सिरामर्माणि, सप्तविंशतिः स्नायुमर्माणि, अष्टावस्थिमर्माणि विंशतिः सन्धिमर्माणि चेति।[9]

जत्र्वस्थिनः (Collar bone) ऊर्ध्वस्थितानां कण्ठग्रीवयोः मर्मणां चर्चां कुर्वता सुश्रुतेन प्रोक्तमस्ति–

अत ऊर्ध्वमूर्ध्वजत्रुगतानि व्याख्यास्यामः। तत्र कण्ठनाडीमुभयतश्चतस्रो धमन्यो द्वे नीले द्वे च मन्ये व्यत्यासेन तत्र मूकता स्वरवैकृतमरसग्राहिता च, ग्रीवायामुभयतश्चतस्रः सिरा मातृकाः तत्र सद्योमरणं, शिरोग्रीवयोः सन्धाने कृकाटिके तत्र चलमूर्धता, कर्णपृष्ठतोऽधः संश्रिते विधुरे तत्र बाधिर्यं ....।[10]

सुश्रुतः प्रवदति यत् कण्ठनाडीमुभयतः चतस्रः धमन्यः सन्ति। नीला मन्या चेत्याख्ये द्वे द्वे। शिरोग्रीवयोः संयोजिके द्वे कृकाटिकाख्ये नाड्यौ ग्रीवामुभयतः स्तः।

ईसातः सहस्रवर्षेभ्यः प्राग्विद्यमान आचार्यः सुश्रुतः प्राणाघातस्य यानि सप्तोत्तरशतं

मर्मस्थलानि विस्तरेण चर्चीत तत्तत्स्थानीयधमनीनाडीनामपि उल्लेखं करोति। अनेन सिध्यतीदं यत् प्राचीनभारतवर्षे शिरःप्रत्यारोपणं विधीयते स्म यतो हि मर्मस्थलानामाघातं विनैव विधीयमानेन शल्यकर्मणा शरीरे वाञ्छितं परिवर्तनं कर्तुं शक्यते स्म। अत्र मर्मस्थलानां सूक्ष्मातिसूक्ष्मं विवरणं महत्त्वपूर्णमस्ति। महर्षिः सुश्रुतो मर्मविज्ञानं शल्यतन्त्रस्य अर्धाङ्गं स्वीकरोति। तस्य तात्पर्यमिदं यन्मर्मज्ञानादृते शल्यशास्त्रस्य ज्ञानं भवितुं नार्हति –

**मर्माणि शल्यविषयार्धमुदाहरन्ति यस्माच्च मर्मसु हता न भवन्ति सद्यः।**
**जीवन्ति तत्र यदि वैद्यगुणेन केचित् तं प्राप्नुवन्ति विकलत्वमसंशयं हि।।**[11]

सुश्रुतसंहितोक्तानामेतेषां मर्मविज्ञानगततथ्यानां सूक्ष्मविवेचनमिदं प्रमाणीकरोति यत् तस्मिन् काले शिरःप्रत्यारोपणं भवति स्म इति नात्र शङ्कालेशः। शल्यक्रियया सम्बद्धः अन्योऽप्येकः प्रसङ्गः ऋग्वेदे उपलभ्यते। ऋग्वेदीया ऋचा इयमस्ति –

**चरित्रं हि वेरिवाच्छेदि पर्णमाजा खेलस्य परितक्म्यायाम्।**
**सद्यो जङ्घामायसीं विश्पलायै धने हिते सर्तवे प्रत्यधत्तम्।।**[12]

मन्त्रस्यास्य भाष्यं कुर्वता सायणाचार्येण निगदितं यत् कोऽपि खेलनामधेयो राजा आसीत्। महर्षिः अगस्त्यः तस्य पुरोहितः आसीत्। विश्पला इत्याख्या राज्ञः काचन सम्बन्धिनी आसीत्। सङ्ग्रामे रिपुभिः विश्पलायाः पादौ छिन्नौ। अगस्त्यमुनिः देवभिषजोः अश्विनीकुमारयोः स्तुतिं विधाय तयोराह्वानं च कृतवान्। ताभ्यां देवभिषग्भ्याम् विश्पलायाः कृते अयोमयी जङ्घा प्रत्यारोपिता। लौहविनिर्मितजङ्घायाः संस्थापनमपि शल्यक्रियायाः उत्तममुदाहरणमस्ति।

अथर्ववेदस्य मूत्रमोचनसूक्ते मूत्रनिस्सारणस्योपायाः उल्लिखिताः सन्ति। मूत्रनिस्सारणेऽवरोधो भवेच्चेत् तर्हि शलाकाप्रवेशेन अर्थात् शल्यक्रियया मूत्रनिस्सारणस्यापि उल्लेखस्तत्र प्राप्यते–

**यदान्त्रेषु गवीन्योर्यद्वस्तावधि संश्रुतम्।**
**एवा ते मूत्रं मुच्यतां बहिर्बालिति सर्वकम्।।**
**प्र ते भिनद्मि मेहनं वत्रं वेशन्त्या इव।**
**एवा ते मूत्रं मुच्यतां बहिर्बालिति सर्वकम्।।**[13]

मन्त्रस्य अभिप्रायोऽयं वर्तते यन्मूत्रवाहिनीनाडीषु मूत्राशये आन्त्रेषु च विद्यमानं दूषितजलम् (मूत्रं) अनेन चिकित्साविधिना सवेगं शब्दयत् शरीराद् बहिर्गच्छति। शलाकया अवरुद्धो मूत्रमार्गो यदा अवरोधरहितः क्रियते तदा अवरुद्धं मूत्रम् उदरस्था अन्येऽपि विकाराश्च

शीघ्रतया बहिर्गच्छन्ति यथा हि बन्धध्वंसात् जलाशयस्य जलं सत्वरं बहिर्गच्छति। अथर्ववेदे एव 'रुधिरस्रावनिवर्तनधमनीबन्धनसूक्तम्' समुपलभ्यते यत्र आयुर्वेदोल्लिखिताः सिराधमन्यश्च वर्णिताः। अत्र सिरा हिरा इत्यभिहिता। तदानीन्तनकाले कथं नाडीबन्धनेन रक्तस्रावः अवरुध्यते स्म इत्युल्लेखः शल्यक्रियाविज्ञानस्य उन्नतावस्थां सूचयति।

**शतस्य धमनीनां सहस्रस्य हिराणाम्।**
**अस्थुरिन्मध्यमा इमाः साकमन्या अरंसत॥**[14]

ऋषिरत्र हृदयगतशतसङ्ख्याकानां प्रधाननाडीनामुल्लेखं करोति। कठोपनिषदि अपि एकाधिकैकशतानां हृदयस्थनाडीनां चर्चा वर्तते यासु एका मूर्धानं भित्त्वा बहिर्गता। तस्याः ऊर्ध्वगमनं विधाय पुरुषः अमरत्वं लभते इति ऋषिः वदति–

**शतं चैका हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका।**
**तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ति॥**[15]

प्रश्नोपनिषदि नाडीव्यवस्थायाः अस्याः सूक्ष्मतरं विश्लेषणं विहितम्–

हृदि ह्येष आत्मा। अत्रैतदेकशतं नाडीनां तासां शतं शतमेवैकस्यां द्वासप्ततिर्द्वासप्ततिः, प्रतिशाखं नाडीसहस्राणि भवन्त्यासु व्यानश्चरति।।[16]

अर्थात् एष आत्मा हृदयेऽवस्थितः। हृदयदेशेऽस्मिन् एकशतं नाड्यः वर्तन्ते। तासां प्रत्येकं शतं शतं शाखाः सन्ति यत्र प्रत्येकशाखायां द्वासप्ततिः द्वासप्ततिः नाड्यः सन्ति। तासु नाडीषु व्यानः सञ्चरति। अथर्ववेदस्य एको मन्त्रः अस्ति –

**परि वः सिकतावती धनूर्बृहत्यक्रमीत्।**
**तिष्ठतेलयता सु कम्॥**[17]

अस्मिन् मन्त्रे 'सिकतावती' नाडीनामुल्लेखः वर्तते। सायणाचार्यः सिकतावतीनाडीः इमाः अश्मरीरोगोत्पादिकाः इति कथयति–

**यद् वा अश्मर्याख्यो व्याधिविशेषो यस्माद् उत्पद्यते सा नाडी सिकतावती।**[18]

अत्रैव एकस्मिन् मन्त्रे धनूः शब्देन मूत्राशयस्था नाडी सङ्केतिता–

**धनूः धनुर्वद् वक्रो मूत्राशयो नाडीविशेषः।**[19]

उपर्युल्लिखितमन्त्रेषु हृदयगतानां शताधिकनाडीनामुल्लेखः अश्मरीरोगसम्बद्धानां नाडीनां मूत्राशयस्य धनुर्वद्वक्रनाडीनां चर्चा शरीररचनायाश्च विशिष्टज्ञानमयः उल्लेखः इदं सूचयति यत् तत्कालीनचिकित्साशास्त्रे शल्यक्रियाविज्ञानं सर्वथा उन्नतमासीत्।

पौरुषस्य वीर्यनिर्माणविषयकानामङ्गानां वा स्पष्टोल्लेखः अथर्ववेदे लभ्यते–

**क्लीबं कृध्योपशिनमथो कुरीरिणं कृधि।**
**अथास्येन्द्रो गावध्यामुभे भिनत्त्वाण्ड्यौ।।**[20]

अत्र मन्त्रे ओषधिभिः शत्रोरण्डयुगलं विभिद्य तं पौरुषहीनं क्लीबं कर्तुं च प्रार्थना कृता। अत्र प्रयुक्ता 'अण्ड्यौ' इति द्विवचनान्ता संज्ञा वृषणयुगलं सूचयति। अनेन ज्ञायते यत् अथर्ववेदस्य मन्त्रद्रष्टा शरीरक्रियाविज्ञानस्यापि श्रेष्ठः ज्ञाता आसीत्।

शल्यक्रियासु व्रणानां सीवनं कथं भवति स्म इत्यस्यापि संकेतः अथर्ववेदस्य रोहिणीवनस्पतिसूक्ते मिलति–

**सं ते मज्जा मज्ज्ञा भवतु समु ते परुषा परुः।**
**सं ते मांसस्य विस्रस्तं समस्थ्यपि रोहतु।।**
**मज्जा मज्ज्ञा सं धीयतां चर्मणा चर्म रोहतु।**
**असृक् ते अस्थि रोहतु मांसं मांसेन रोहतु।।**
**यदि कर्तं पतित्वा संशश्रे यदि वाश्मा प्रहृतो जघान।**
**ऋभू रथस्येवाङ्गानि सं दधत् परुषा परुः।।**[21]

आघाताऽऽहतं कञ्चिन्मनुष्यं सम्बोधयन्ती ऋचेयं प्रवदति यत् भवच्छरीरस्था छिन्ना मज्जा पुनरपि वृद्धिमवाप्य सुखकरी भवेत्। मांसास्थ्नां छिन्नभिन्नविभागाः युज्यन्ताम्। छिन्नभिन्नमज्जया मज्जां मांसेन मांसं चर्मणा चर्म च युज्यन्ताम्। निशितशस्त्रजन्यं पाषाणाऽऽघातजन्यं वा व्रणं स्यात् यथा हि कुशलशिल्पी रथाङ्गानि योजयति तद्वदेव सर्वाणि अङ्गानि युज्यन्ताम्। अत्र मांसेन मांसस्य चर्मणा चर्मणः योजनं व्रणानां सीवनक्रियां द्योतयति।

शल्यतन्त्रे व्रणचिकित्सायाः अपि उल्लेखोऽथर्ववेदे प्राप्यते। अथर्ववेदस्य लाक्षासूक्ते लाक्षौषधिभिः व्रणचिकित्साविधिः निरूपितः–

**यद् दण्डेन यदिष्वा यद् वारुर्हरसा कृतम्।**
**तस्य त्वमसि निष्कृतिः सेमं निष्कृधि पूरुषम्।।**[22]

अत्र ऋषिः औषधिं सम्बोधयन् प्रवदति यद् दण्डैः बाणैः घर्षणैर्वा यानि व्रणानि जातानि तेषां सर्वेषां कृते हे लाक्षा–औषधे भवती एव उपायभूता।

प्रसवक्रियायां योनिभेदनस्योल्लेखः अपि शल्यक्रियायाः एकमन्यदुदाहरणमस्ति यद्

अथर्ववेदे प्राप्यते–

**वि ते भिनद्मि मेहनं वि योनिं वि गवीनिके।**

**वि मातरं च पुत्रं च वि कुमारं जरायुणा व जरायु पद्यताम्॥**[23]

प्रसूतां सम्बोधयन् मन्त्रेस्मिन् ऋषिः प्रवदति यन्निर्विघ्नप्रसवाय गर्भमार्गं योनिं नाडीश्च विशेषतया अपावृणोमि। मातरं शिशुं च गर्भनालाद् वियोजयामि।'वि भिनद्मि' पदं विशेषतया भेदनस्य छेदनस्य वा वाचकं वर्तते यत्खलु शल्यक्रियामेव द्योतयति।

वेदेषु वर्णितेषु शल्यक्रियाविषयकदृष्टान्तेषु एव विश्वस्य प्राचीनतमशल्यक्रियाविज्ञानस्य बीजानि सन्ति। यद्यपि कालघर्षणेन वैदिककालीनं शल्यतन्त्रं विलुप्तप्रायं वर्तते किन्तु वैदिकर्षीणामाचार्याणां च प्रेरणया विलक्षणदृष्टिसमुद्भूतं शल्यतन्त्रम् आचार्यसुश्रुतप्रणीता सुश्रुतसंहिता शल्यक्रियाविज्ञानस्य आदिमो ग्रन्थः सञ्जातः अखिलविश्वस्य शल्यतन्त्रविदां कण्ठहार इव राराज्यते च। पाश्चात्त्यचिकित्सापद्धतिः यद्यपीदानीं समुन्नता वर्तते किन्तु तस्याधारोऽपि भारतीयं शारीरशास्त्रमेव वर्तते। शरीररचनाविषयकाणां पारिभाषिकशब्दावलीनां कतिपयैरुदाहरणैरेव एतत्तथ्यं सिध्यति यथा – भारतीयशरीररचनाविज्ञानानुसारं मस्तिष्कस्य द्वौ विभागौ शिरोब्रह्म शिरोविलोमः चेत्यभिधीयेते। पाश्चात्त्यशरीररचनाविज्ञानस्य शब्दावली द्वयोर्ध्वन्यात्मकमनुकरणं करोति। तत्र शिरोब्रह्म Cerebrum इति शिरोविलोमः Cerebellum चेति अभिहितौ। एवमेव हृत् हृद् वा Heart इति संज्ञया अभिहितम्। स्पष्टमेवेदं यन्नामान्तरणादपि पाश्चात्त्यनामसु भारतीयनाम्नां ध्वनिरस्त्येव।

निष्कर्षतः एतद्वक्तुं शक्यते यच्छल्यक्रियायाः बहूनि निदर्शनानि शिरःप्रत्यारोपणमिव जटिलतमा शल्यक्रिया च एतद् द्योतयति यदस्माकं दिव्यदृष्टिसम्पन्नाः वैदिकर्षयः शरीररचनायाः शल्यतन्त्रस्य च अत्युन्नतसिद्धान्तानां वेत्तार आसन् वेदाश्च शल्यतन्त्रस्य आदिमस्रोतांसि वर्तन्ते इति नात्र सन्देहलवोऽपीति शम्।

*

**सन्दर्भाः**


1. सुश्रुतसंहितायाम् सूत्रस्थाने 1.18
2. तत्रैव – उत्तरतन्त्रे, 66.3
3. तत्रैव – सूत्रस्थाने – 26.3
4. तत्रैव– सूत्रस्थाने – 26.5
5. अथर्ववेदे– 6.9.4.1–2
6. ऋग्वेदे – 1.116.12
7. तत्रैव– 1.116.12 मन्त्रस्य सायणभाष्ये
8. सुश्रुतसंहितायाम् – शारीरस्थाने – 6.15
9. तत्रैव– शारीरस्थाने – 6.3–4
10. तत्रैव – शारीरस्थाने – 6.27
11. तत्रैव – शारीरस्थाने – 6.33
12. ऋग्वेदे – 1.116.15
13. अथर्ववेदे– 1.1.3.6–7
14. तत्रैव– 1.4.3.3
15. कठोपनिषदि 2.3.16
16. प्रश्नोपनिषदि 3.6
17. अथर्ववेद 1.4.3.4
18. तत्रैव - 1.4.3.4 मन्त्रस्य सायणभाष्ये
19. तत्रैव - 1.4.3.4 मन्त्रस्य सायणभाष्ये
20. तत्रैव– 6.13.7.2
21. तत्रैव– 4.3.2.3, 4, 7
22. तत्रैव– 5.1.5.4
23. तत्रैव– 1.3.1.5


*

# सन्दिग्धशब्दानां साधुत्वासाधुत्वविवेचने काव्यालङ्कारसूत्रवृत्तिग्रन्थः : एकमध्ययनम्

डा. मृत्युञ्जय गराँइ

**प्रबन्धसारः**

भाषायां तावत् साधुशब्दज्ञानं सदापेक्षितम्। व्याकरणशास्त्रात्तु तत् ज्ञानं सम्यक्तया परिप्राप्यते। सुनिश्चितशब्दचयनैरेव काव्यशरीरस्य विनिर्माणं भवति। यथोक्तं भामहेन– '**शब्दार्थौ सहितौ काव्यम्**' (काव्यालङ्कारः1/16) इति। अत एव सुकाव्यनिर्माणाय साधुशब्दज्ञानं तावदपरिहार्यम्। काव्ये कस्तावत् शब्दः प्रयोक्तव्यः को वा परिहरणीय इत्येवं संशयः सदा वर्तते। कारणादस्मात् वामनाचार्येण काव्यालङ्कारसूत्रवृत्तौ पञ्चमेऽधिकरणे शब्दशुद्धिरपि पर्यालोचिता। तत्र सन्दिग्धशब्दानां साधुत्वासाधुत्वं संक्षेपेण प्रतिपादितम्। नवीनं कविगणं प्रति एषा आलोचना तावत् कामधेनुतुल्या। तथापि व्याकरणदृष्ट्येयमालोचना शुद्धाऽस्ति न वेति संशयो जायते। विश्लेषणशैलीमाश्रित्य संशयनिवारणेऽत्र प्रयत्नः कृतः।

**सङ्केतशब्दाः**

सूत्रम्, वृत्तिः, अलङ्कारशास्त्रम्, व्याकरणम्, प्रत्ययः, समासः, वार्तिकम्, गणसूत्रम्, प्रथनम्, वृद्धसंज्ञा, वृद्धिः, गुणः, अनुबन्धः, सुबन्तम्, प्रातिपदिकम्।

**उपोद्घातः**

अलङ्कारशास्त्रीयरचनारीतिः सुप्राचीनकालादारभ्य साम्प्रतिककालं यावत् प्रवाहशीला विराजते संस्कृतभाषायाम्। काव्यसिद्धान्तानां मर्मार्थं सुखेन बोधयितुं काले काले विद्वद्भिर्बहवोऽलङ्कारग्रन्थाः प्रणीताः। तत्र बहुषु समुपलभ्यमानेष्वपि 'काव्यालङ्कारसूत्रवृत्तिः' इति ग्रन्थस्य स्थानमनवद्यमिति मन्यते विपश्चिद्भिः। काव्यात्मतत्त्वसन्धाने रीतितत्त्वस्थापने ग्रन्थस्यास्य महती भूमिकाऽतीव प्रशंसनीया। 'काव्यालङ्कारसूत्रवृत्तिः' इत्येकैव कृतिः समुपलभ्यते वामनाचार्यस्य। अनया एव तु तस्य कीर्तिः सर्वत्र परिव्याप्ता।

'काव्यालङ्कारसूत्रवृत्तिः' इति ग्रन्थे पञ्च अधिकरणानि द्वादशभिरध्यायैः विभक्तानि सन्ति। तत्र 'प्रायोगिकम्' इति पञ्चमेऽधिकरणे शब्दशुद्धिरूपविषयो वर्णितोऽस्ति। वस्तुतोऽयं ग्रन्थस्तु अलङ्कारग्रन्थः। तथापि ग्रन्थस्यास्य अन्तिमेऽधिकरणे नवीनकविगणम् उद्दिश्य शब्दानां साधुत्वासाधुत्वज्ञानं प्रतिपादितम्। काव्ये शब्दचयनं खल्वतीव महत्त्वपूर्णम्। यथोक्तं वामनाचार्येण–

**'शुद्धानि हि पदानि निष्कम्पैः कविभिः प्रयुज्यन्ते।'**[1]

अपरं तु व्याकरणशास्त्रेऽपि कथितम्–

**'एकः शब्दः सम्यग्ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके च कामधुग् भवति।'**[2] शब्दानां साधुत्वासाधुत्वज्ञानं तावत् व्याकरणग्रन्थे प्रतिपाद्यते। '**शब्दस्मृतेः शब्दशुद्धिः**' (का.सू.वृ.1/3/4) इति वामनाचार्यस्याप्यभिप्रायः। तथापि केषाञ्चन सन्दिग्धशब्दानां साधुत्वासाधुत्वं ज्ञानमत्रापि निर्णीतम्। वस्तुतः केचित् शब्दाः सामान्यदृष्ट्या शुद्धाः प्रतीयन्ते परन्तु व्याकरणनिकाये तेषामसाधुत्वं विद्यते। अपि च कतिपयशब्दाः शुद्धाः वर्तन्ते तथापि अज्ञानवशात् तेषां प्रयोगो नाङ्गीक्रियते। एवं केषाञ्चन शब्दानां साधुत्वासाधुत्वं तत्रभवता वामनाचार्येण संक्षेपेण निरूपितम्। प्रस्तुते लेखेऽस्मिन् विश्लेषणशैलीमाश्रित्य तेषां कतिपयेषामालोचनं सम्यक्तया विधीयते।

**1. तृणकाष्ठम् / काष्ठतृणम्**

संस्कृतभाषायां 'तृणकाष्ठम्' 'काष्ठतृणम्' वेति पदद्वयस्य प्रयोगविषये तावत् सन्देह उपजायते। 'तृणानि च काष्ठानि च'– इत्यस्मिन् विग्रहे '**विभाषा वृक्षमृगतृणधान्यव्यञ्जनपशुशकुन्यश्ववडवपूर्वापराधरोत्तराणाम्**' (2/4/12)[3] इति सूत्रेण तथा '**फलसेनावनस्पतिमृगशकुनिक्षुद्रजन्तुधान्यतृणानां बहुप्रकृतिरेव द्वन्द्व एकवदिति वाच्यम्**' (वा. 1540) इति वार्तिकेन 'तृणानि' 'काष्ठानि' च समर्थसुबन्तपदद्वयस्य मध्ये विकल्पे समाहारद्वन्द्वसमासः एकवत् च भवति। अनन्तरं प्रातिपदिकत्वात् '**सुपो धातुप्रातिपदिकयोः**' (2/4/71) सूत्रेण समर्थपदद्वयस्य सुपः लोपो भवति। '**अल्पाच्तरम्**' (2/2/34) इत्यनेन अल्पाच्तरं पदं द्वन्द्वे पूर्वं प्रयोज्यम्। परन्तु अत्र विग्रहस्थपदद्वये समाक्षराणि परिदृश्यन्ते। अतएव '**लघ्वक्षरं पूर्वम्**' (वा. 1413) अनेन वार्तिकेन लघ्वक्षरविशिष्टपदस्य पूर्वनिपातो भवति। नियमस्यास्य पालनं तु सदा करणीयम्। अन्यथा व्यभिचारोऽपभ्रंशः वा परिलक्ष्यते। यथोक्तं वामनेन–

'**पूर्वनिपातेऽपभ्रंशो रक्ष्यः**'(का.सू.वृ.5/2/21)

सूत्रस्यास्य वृत्तौ च तेनोक्तं स्पष्टतया–

'काष्ठतृणं, तृणकाष्ठमिति यदृच्छया पूर्वनिपातं कुर्वन्ति। तत्रापभ्रंशो रक्ष्यः परिहरणीयः। अनित्यत्वज्ञापनं तु न सर्वविषयमिति।'

अर्थात् समासेऽस्मिन् समर्थपदद्वयस्य मध्ये 'तृणम्' इति लघ्वक्षरपदस्य पूर्वनिपातः करणीयः। तदनन्तरं क्लीबलिङ्गत्वे एकवचने 'तृणकाष्ठम्' इति पदं प्राप्तम्। भाषायां पदमिदं तु प्रयोक्तव्यम्। कदापि 'काष्ठतृणम्' इति पदं न कर्तव्यम्।

**2. हस्ताग्रम् / अग्रहस्तः**

'हस्ताग्रम्' 'अग्रहस्तः' चेति पदयुगलस्य बहुविधप्रयोगो दृश्यतेऽस्माकं देवभाषायाम्। सामान्यदृष्ट्या उभयस्य प्रयोगविषये कश्चित् संशयो जायते। परन्तु व्याकरणशृङ्खलायाम् उभयप्रयोगः एव शुद्धोऽस्ति। समासगता विविधता केवलमत्र परिलक्ष्यते। वस्तुतोऽत्र समासद्वयस्य पूर्वनिपातविषये महान् संशयोऽस्ति। एकस्मिन् पदे 'हस्त' शब्दस्य पूर्वनिपातः, अपरे तु 'अग्र' शब्दस्य पूर्वनिपातः। एवं पूर्वनिपातस्य पृथक्ता कथं सम्भवति? केषाञ्चन मते 'हस्ताग्रम्' 'अग्रहस्तः' इति पदद्वयमाहिताग्निगणपठितम्। अतः 'वाहिताग्न्यादिषु' (2/2/37) इति सूत्रेण विकल्पेनात्र पूर्वनिपातः मन्यते। परन्तु एतत् न युक्तम्। अनेन सूत्रेण केवलम् आहिताग्निगणपठितानां निष्ठान्तशब्दानामेव पूर्वनिपातो भवति। यथोक्तं सूत्रस्यास्य काशिकावृत्तौ–

**'निष्ठा इति पूर्वनिपाते प्राप्ते विकल्प उच्यते।'**

परन्तु 'हस्त' शब्दोऽत्र निष्ठान्तः नास्ति। हस्धातोः तन्–प्रत्ययेन निष्पन्नोऽयं 'हस्त' शब्दः। एवम् 'अग्र' शब्दोऽपि निष्ठान्तो नास्ति। अत एवात्र 'हस्ताग्रम्' 'अग्रहस्तः' इति पदद्वयं कथं सम्भवति? प्रसङ्गेऽस्मिन् वामनाचार्येणोक्तम्–

'**हस्ताग्राग्रहस्तादयो गुणगुणिनोर्भेदाभेदात्।**' (का.सू.वृ.5/2/20)

सूत्रस्यास्य स्पष्टीकरणाय वृत्तौ च तेनोक्तम्–

**'हस्ताग्रम्, अग्रहस्तः, पुष्पाग्रम्, अग्रपुष्पमित्यादयः प्रयोगाः कथम्? आहिताग्न्यादिष्वपाठात्। पाठे वा तदनियमः स्यात्। आह, गुणगुणिनोर्भेदाभेदात्। तत्र भेदाद् हस्ताग्रादयः। अभेदादग्रहस्तादयः।'**

अर्थात् वामनाचार्यस्य मते, 'हस्ताग्रम्' 'अग्रहस्तः' इत्यादीनि पदानि तु गुणगुणिनोः भेदाभेदात् प्रयुक्तानि। परार्थत्वसादृश्यादत्र गुणगुणिनौ अवयवावयविनौ भवतः। तयोर्भेदविवक्षायां हस्ताग्रादयः। तदा 'हस्तस्य अग्रम्'– इत्यस्मिन् विग्रहे षष्ठीसमासो भवति।

पुनश्चाभेदविवक्षायां तु हस्ताग्रादयो भवन्ति। तदा समानाधिकरणतत्पुरुषसमासो भवति। सर्वङ्कषाटीकायां मल्लिनाथेनापि एवं व्याख्या समर्थिता। '**तरुकिसलयजालमग्रहस्तैः**' (शिशु.7/29) इति पद्यस्य 'अग्रहस्तैः' इति पदव्याख्यायां मल्लिनाथेनोक्तम्–

'**अग्राणि च ते हस्ताश्चेति समानाधिकरणसमासः।** अत एव '**हस्ताग्रा-ग्रहस्तादयो गुणगुणिनोर्भेदाभेदात्**' इति वामनः।'

अत एव 'हस्ताग्रम्' 'अग्रहस्तः' इति पदयुगलस्य प्रयोगस्तु व्याकरणदृष्ट्या शुद्धोऽस्ति।

**3. गुणविस्तारः / गुणविस्तरः**

'काव्यालंकारसूत्रवृत्तिः' इति ग्रन्थे 'गुणविस्तारः' 'गुणविस्तरः' इति पदद्वयस्य साधुत्वासाधुत्वं प्रतिपादितम्। सामान्यदृष्ट्याऽत्र '**ऋदोरप्**' (3/3/57) सूत्रेण ऋकारान्तात् स्तृ–धातोः[4] अप्– प्रत्ययेन 'गुणविस्तरः' इति पदस्य साधुत्वं प्रतिभाति। परन्तु अत्र अप्–प्रत्ययस्य प्रयोगः न भविष्यति। प्रथनस्य विस्तारस्य वा गम्यमानताऽत्रास्ति। तथा च प्रथनं शब्दविषयं न भवति। अत एव स्तृ–धातोर्विशब्दे उपपदे '**प्रथने वावशब्दे**' (3/3/33)[5] इत्यनेन सूत्रेणात्र घञ् प्रत्ययो भवति। अनन्तरमनुबन्धलोपे '**गुण विस्तृ अ**' इति जाते, '**अचो ञ्णिति**' (7/2/115)[6] सूत्रेण स्तृधातोर्वृद्ध्या विभक्तियोगे च 'गुणविस्तारः' इति पदं निष्पद्यते। पदमिदं तु सदा शुद्धं भाषायां प्रयोक्तव्यं चेति। 'गुणविस्तरः' इति पदस्य प्रयोगस्तावत् चिन्त्यः। तथोक्तं वामनेन–

'**गुणविस्तरादयश्चिन्त्याः।**' (का.सू.वृ.5/3/39)

सूत्रस्य व्याख्यायामपि तेनोक्तम्–

'**गुणविस्तरः, व्याक्षेपविस्तर इत्यादयः प्रयोगाश्चिन्त्याः। 'प्रथने वावशब्दे' इति घञ्प्रसङ्गात्।**'

**4. शबला / शबली**

शबलशब्दस्तावत् वर्णवाचकः। 'शप आक्रोशे' इति धातोः कल्–प्रत्यये निष्पन्नोऽयं शब्दः। प्रत्ययेन तु मध्योदात्तोऽनुदात्तान्तश्च शबलशब्दः। यथोक्तं न्यासटीकायाम्–

'**शबलीति। 'शप आक्रोशे', 'कलस्तृपश्च' इति 'शपेर्बश्च' इति कलप्रत्ययः, पकारस्य बकारः, प्रत्ययाद्युदात्तत्वेन मध्योदात्तः शबलशब्दः।**'[7]

अत एव '**अन्यतो ङीष्**' (4/1/40) इत्यनेन सूत्रेणात्र शबलशब्दे खलु ङीष्–प्रत्ययस्य प्राप्तिरस्ति। ङीष्–प्रत्ययादत्र '**अजाद्यतष्टाप्**' (4/1/14) सूत्रेण विहितस्य

टाप्–प्रत्ययस्य प्रयोगः न भविष्यति। अर्थात् 'शबल + टाप् = शबला' इत्येवं रूपमशुद्धमस्ति। अपरं तु शबलशब्दात् ङीष्– प्रत्यये, अनुबन्धलोपे, '**यस्येति च**' (6/4/148)[9] इति सूत्रेण शब्दस्यान्तिमस्य अ–कारस्य लोपे, विभक्तिकार्ये च 'शबली' इत्येवं निष्पन्नं पदं शुद्धमस्ति। भाषायां तु पदमिदं प्रयोक्तव्यम्। वामनाचार्यस्यैवानुरूपं मतं दृश्यते–

'**शबलादिभ्यः स्त्रियां टापोऽप्राप्तिः।**' (का.सू.वृ. 5/2/45)

वृत्तौ तु दृश्यते–

'**उपस्त्रोतः स्वस्थस्थितमहिषशृङ्गाग्रशबलाः।**
**स्त्रवन्तीनां जाताः प्रमुदितविहङ्गास्तटभुवः॥**'
'**भ्रमरोत्करकल्माषाः कुसुमानां समृद्धयः।**'

इत्यादिषु स्त्रियां टापोऽप्राप्तिः। 'अन्यतो ङीष्' इति ङीष्– विधानात्। तेन शबली कल्माषीति भवति।'

**5. कार्तिकीयः / कार्तिकिकः**

'कार्तिकीयो नभस्वान्' इत्येवं प्रयोगस्तावत् संस्कृतभाषायां समीचीनोऽस्ति न वेति विषये महान् संशयो दृश्यते। अस्मिन् स्थले 'कार्तिक' इति शब्दः '**वृद्धिर्यस्याचामादिस्त-द्वृद्धम्**' (1/1/73)[10]

इति सूत्रेण वृद्धसंज्ञा प्राप्नोति। कारणादस्मात् '**वृद्धाच्छः**' (4/2/114)[11] इत्यनेनात्र 'कार्तिक' इति शब्दे शैषिकः छः प्रत्ययो भवति। तदनन्तरमनुबन्धलोपे, '**आयनेयीनीयियः फढखच्छघां प्रत्ययादीनाम्**' (7/1/2) सूत्रेण छ–प्रत्ययस्थाने इयादेशे च 'कार्तिकीय'–शब्दः निष्पद्यते। परन्तु 'कार्तिकिकः' इत्यत्र छ–प्रत्ययस्याभावः वर्तते। 'कार्तिक' इति शब्दस्तावत् कालवाचकः। अत एव '**कालाट्ठञ्**' (4/3/11)[12] इति सूत्रेण कालविशेषवाचिनः कार्तिकप्रातिपदिकात् ठञ् प्रत्ययो भवति शैषिकः। वृद्धसंज्ञाऽपि अत्र बाध्यते। यथोक्तं काशिकायाम्–

'**कालविशेषवाचिनः प्रातिपदिकात् ठञ् प्रत्ययो भवति शैषिकः। अणोऽपवादः। वृद्धात् तु छं परत्वाद् बाधते।**'

अत एवात्र ठञ्–प्रत्यये, अनुबन्धलोपे, '**ठस्येकः**' (7/3/50) सूत्रेण ठञ्–प्रत्ययस्थाने इगादेशे, विभक्तिकार्ये च 'कार्तिकिकः' इति पदस्य प्रयोगो भवति। पदमिदं तु समीचीनं व्याकरणसम्मतं च। भाषायां पदस्यास्य प्रयोगः खलु कर्तव्यः। कार्तिकीयस्य

प्रयोगः न तु प्रमादविरहितः। एवमुक्तं वामनेन–

**'कार्तिकीय इति ठञ् दुर्धरः।'** (का.सू.वृ.5/2/49)

वृत्तौ अपि चोक्तम्–

'**कार्तिकीय नभस्वान्**' इत्यत्र '**कालाट्ठञ्**' इति ठञ् दुर्धरः।

**6. दारवम् / दारुमयम्**

'दारवं पात्रम्' इत्यस्मिन् वाक्ये प्रयुक्तं दारवं पदं तु अनुसन्धेयम्। 'दारुण इदम्' इत्येवमर्थे '**तस्येदम्**'(4/3/120)[13] सूत्रेण 'दारु' इति षष्ठ्यन्तप्रातिपदिकात् अण् प्रत्ययो विहितः। तदनन्तरमनुबन्धलोपे, यण्सन्धौ, विभक्तियोगे च दारवं पदं निष्पन्नम्। व्याकरणशृङ्खलायां पदमिदं तु अशुद्धमस्ति। अस्मिन् स्थले '**तस्येदम्**' (4/3/120) सूत्रस्य प्रयोगः नैवोचितः। 'दारु' इति शब्दस्तावत् वृद्धसंज्ञकः। अतोऽत्र '**वृद्धाच्छः**' (4/2/114) इत्यनेन छप्रत्ययस्य विधानमस्ति। अनेन छप्रत्ययेन पदमिदं तु दार्वीयं भविष्यति।

वस्तुतस्तु 'दारु' शब्दस्य वृद्धसंज्ञकत्वात् '**नित्यं वृद्धशरादिभ्यः**' (4/3/144)[14] सूत्रेणावयवार्थे नित्यं मयट् प्रत्ययो भविष्यति। अत एव मयट्–प्रत्यये कृतेऽनुबन्धलोपे विभक्तिकार्ये च 'दारुमयम्' इति पदं निष्पद्यते। पदमिदं तु शुद्धं भाषायां प्रयोक्तव्यं च। अपरं तु 'दारवम्' इति पदं वैयाकरणैः गर्हितम्। वामनाचार्येण एवं व्याख्या समर्थिता। 'काव्यालङ्कारसूत्रवृत्तिः' इति ग्रन्थे तेनोक्तम्–

'**दारवशब्दो दुष्प्रयुक्तः।**' (का.सू.वृ.5/2/53)

सूत्रस्यास्य वृत्तौ अपि तेनोक्तम्–

**'दारवं पात्रमिति दारवशब्दो दुष्प्रयुक्तः। 'नित्यं वृद्धशरादिभ्यः' इति मयटा भवितव्यम्। ननु विकारावयवोरर्थयोर्मयड् विधीयते। अत्र तु दारुण इदमिति विवक्षायां दारवमिति भविष्यति। नैतदेवम्। 'वृद्धाच्छः' इति छविधानात्।'**

अत एव संस्कृतभाषायां 'दारुमयम्' इति पदं खलु शुद्धम्, अपितु 'दारवम्' इति पदमशुद्धमिति वक्तुं शक्यते।

**7. अपाङ्गेनेत्रा / अपाङ्गनेत्रा**

'अपाङ्गेनेत्रा' 'अपाङ्गनेत्रा' चेति संस्कृतपदद्वयस्य मध्ये शुद्धताविषये कश्चित् सन्देहः जायते। वामनाचार्येण पदद्वयस्य साधुत्वासाधुत्वं प्रदर्शितम्। 'अपाङ्गे नेत्रं यस्याः, सा'

इत्यस्मिन् विग्रहे '**अनेकमन्यपदार्थे**' (2/2/24) सूत्रेण 'अपाङ्गे' 'नेत्रम्' चेति समर्थसुबन्तपदद्वयस्य मध्ये बहुव्रीहिसमासो भवति। अनन्तरं '**सुपो धातुप्रातिपदिकयोः**' (2/4/71) इत्यनेन समस्यमानपदद्वयस्य सुपः लोपप्राप्तिरासीत्। परन्तु '**अमूर्धमस्त-कात्स्वाङ्गादकामे**' (6/3/12)[15] इति सूत्रेण मूर्धमस्तकवर्जितात् स्वाङ्गादुत्तरस्याः सप्तम्या अकामे उत्तरपदेऽलुग् भविष्यति। अर्थात् 'अपाङ्गे' इत्यस्य सप्तम्या अलुगत्र भवति। अत एव सप्तम्या अलुकि, स्त्रियां टापि कृते 'अपाङ्गेनेत्रा' इति पदं निष्पन्नम्। पदमिदं तु व्याकरणदृष्ट्या शुद्धम्। अत्र सप्तम्याः लुक् कदापि न स्यात्। यस्मात् 'अपाङ्गनेत्रा' पदं तु नैव समीचीनम्। एवमेव वामनाचार्यस्याभिमतम्–

'**अपाङ्गनेत्रेति लुगलभ्यः।**' (का.सू.वृ.5/2/70)

वृत्तौ अपि तेनोक्तम्– '**अपाङ्गे नेत्रं यस्याः सेयमपाङ्गनेत्रेत्यत्र लुगलभ्यः। 'अमूर्धमस्त-कात्स्वाङ्गादकामे' इति सप्तम्या अलुग्विधानात्।**'

अत एव भाषायां तु 'अपाङ्गेनेत्रा' इत्येवं शुद्धं पदमेव तावत् प्रयोक्तव्यम्।

**8. निशम्य / निशमय्य**

'निशम्य' 'निशमय्य' चेति शब्दद्वयं संस्कृतभाषायां बहुत्र परिदृश्यते। सामान्यदृष्ट्या तु शब्दद्वयस्य प्रयोगक्षेत्रे सन्देहो जायते। नि-उपसर्गपूर्वकात् दिवादेः शम्–धातोः '**समासेऽनञ्पूर्वे क्त्वो ल्यप्**' (7/1/37)[16] इत्यनेन सूत्रेण ल्यप् प्रत्यययोगे 'निशम्य' शब्दो निष्पन्नो भवति। तर्हि 'निशमय्य' इत्येवं पदं कथं सिद्ध्येत्? विवक्षायामस्यामुच्यते, नि-उपसर्गपूर्वकात् शमेर्ण्यन्तात् क्त्वो ल्यपि कृते '**ल्यपि लघुपूर्वात्**' (6/4/56)[17] इत्यनेन णेरयादेशः। एवं प्रकारेण 'निशमय्य' शब्दः निष्पद्यते। शब्दद्वयं तु श्रवणार्थकम्। तथापि उभयस्य मध्ये किञ्चिदन्तरं दृश्यते। पदद्वयेऽस्मिन् गणभेदः प्रकृतिभेदः वास्ति। प्रथमे पदे दिवादिगणीयः शम्–धातुरस्ति, द्वितीये तु अस्ति चुरादिगणीयः शम्–धातुः। प्रकृतिभेदादेव ईदृशी भिन्नता। एवं वैसादृश्यं प्रतिपादयितुं वामनाचार्येणोक्तम्–

'**निशम्यनिशमय्यशब्दौ प्रकृतिभेदात्।**' (का.सू.वृ.5/2/75)

किं बहुना, सूत्रस्यास्य वृत्तौ अपि स्पष्टीक्रियते तेन– '**निशम्य निशमय्येत्यतौ शब्दौ श्रुत्वेत्येतस्मिन्नर्थे। शमेः ल्यपि 'ल्यपि लघुपूर्वात्' इत्ययादेशे सति निशमय्येति भवितव्यम्, न निशम्येति। आह– प्रकृतिभेदात्। शमैर्दैवादिकस्य निशम्येति रूपम्। 'शमो दर्शने' इति चुरादौ णिचि मित्संज्ञकस्य निशमय्येति रूपम्।**'

अपरं तु भट्टमल्लेनापि शब्दद्वयस्य मध्ये प्रकृतिगतभेदः एव विवक्षितः। तथोक्तं 'आख्यातचन्द्रिका' इत्यस्य ग्रन्थस्य प्रथमकाण्डस्य बुद्धिवर्गे भट्टमल्लेन–

**चष्टे छन्दसि सम्पश्यत्यात्मने स्यादकर्मकः।**

**शृणोत्याकर्णयति च तद्वन्निशमयत्यपि।।**

**निशम्यतीति श्रवणे घ्राणे जिघ्रति शिङ्घति।**

**स्पृशत्यामृशति स्पर्शे छुपत्यालभते च षट्।।**[18]

अत एव व्याकरणदृष्ट्या पदद्वयमेव शुद्धम्। तथापि प्रकृतिगतभेदोऽत्र स्पष्टतया प्रकटितः। प्रकृतिभेदनिर्णयेऽस्मिन् वामनमतं तु न युक्तम्। 'कविप्रिया' इति वृत्तौ तु "...'**शमो दर्शने**' इति **चुरादौ णिचि मित्संज्ञकस्य निशमय्येति रूपम्**" इत्येवं वामनेन कथितम्। परन्तु चुरादौ धातुरयं हि 'शम लक्ष आलोचने' इत्येवमर्थे पठितः, न तु दर्शने। तथा च धातोरस्य '**नान्ये मितोऽहेतौ**' (गणसू. 198) इत्यनेन मित्संज्ञा निषिद्धा भवति। तथोक्तं सिद्धान्तकौमुद्याम्–

**"शम लक्ष आलोचने। 'नान्ये मितः–' इति मित्वनिषेधः।"**[19]

वस्तुतः 'निशमय्य' इत्यत्र 'शम दर्शने' इत्येवं भ्वादिगणीयधातुस्तु युक्तः। भट्टोजिदीक्षितस्यापि एवमभिप्रायः। यथोक्तं तेन सिद्धान्तकौमुद्याम्–

**'शमो दर्शने। शाम्यतिर्दशने मिन्न स्यात्। निशामयति रूपम्। अन्यत्र तु 'प्रणयिनो निशमय्य वधूः कथाः। कथं तर्हि 'निशामय तदुत्पत्तिं विस्तराद्गदतो मम' इति। शम आलोचने इति चौरादिकस्य। धातूनामनेकार्थत्वाच्छ्रवणे वृत्तिः, शाम्यतिवत्।'**[20]

अत एव वामनाचार्यस्येयं व्याख्या न तु प्रमादविरहिता।

**९. गच्छती / गच्छन्ती**

'हरति हि वनराजिर्गच्छती श्यामभावम्' इत्येवं संस्कृतवाक्ये गच्छतीति पदं तावदनुसन्धेयम्। 'गच्छत्' इति शतृप्रत्ययान्तात् क्लीबलिङ्गात् शब्दात् '**स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्**' (4/1/2) सूत्रेणात्र औ विभक्तियुक्तोऽस्ति। अनन्तरं 'गच्छत् औ' इत्यवस्थायां '**नपुंसकाच्च**' (7/1/19) सूत्रेण औ–स्थाने शी आदेशो भवति। ततश्चानुबन्धलोपे '**शप्श्यनोर्नित्यम्**' (7/1/81)[21] इत्यनेन नित्यं नुमागमे, नकारस्यानुस्वारे, परसवर्णे च गच्छन्ती पदं

भवितव्यम्, न तु गच्छतीति। नुमागमस्यात्र निषेधः न भविष्यति। यथोक्तं वामनेन–

**'गच्छतीप्रभृतिष्वनिषेध्यो नुम्'** (का.सू.वृ.5/2/79)

वृत्तौ अपि तेन चोक्तम्–

**" 'हरति हि वनराजिर्गच्छती श्यामभावम्' इत्यादिषु गच्छतीप्रभृतिषु शब्देषु 'शप्श्यनोर्नित्यम्' इति नुमनिषेध्यो निषेद्धुमशक्यः।"**

अत एव 'गच्छन्ती' इति पदं तावत् वाक्ये सुप्रयोक्तव्यम्, न तु गच्छतीति पदम्।

**निष्कर्षः**

**'शब्दार्थौ सहितौ काव्यम्'** इति काव्यलक्षणमलङ्कारशास्त्रे प्रथितम्। रमणीयार्थप्रतिपादिकशब्दैरेव सुचारुकाव्यं विनिर्मितं भवति। शब्दचयने कवीनां सदा सतर्कताऽवलम्बनीया। अन्यथा काव्यं हास्यास्पदं भविष्यति। व्याकरणशास्त्रे साधुशब्दज्ञानस्योपदेशः परिदृश्यते। अत एव सर्वेषां कवीनां कृते व्याकरणज्ञान-मत्यावश्यकम्। वामनाचार्येणापि एवं मतं समुद्घोषितम्–

**'शब्दस्मृतेः शब्दशुद्धिः।'** (का.सू.वृ.1/3/4)

किं बहुना, काव्यालङ्कारसूत्रवृत्तौ तेनापि शब्दशुद्धेः आलोचना कृता। अत्रापि सन्दिग्धशब्दानां व्याकरणदृष्ट्या साधुत्वासाधुत्वं प्रतिपादितम्। एवमालोचना तु विशुद्धा पाणिनीयव्याकरणानुसारिणी। अष्टाध्यायीस्थितानां सूत्राणामुल्लेखः तेन पदे पदे कृतः। वार्तिकस्य भाष्यस्य चोल्लेखोऽप्यत्र न दुर्लभः। तथापि इयमालोचना न तु सम्पूर्णा दोषरहिता। कदाचित् कुत्रचित् ईषदनवधानताऽपि दृश्यतेऽस्मिन् ग्रन्थे। 'निशमय्य' इत्येवं पदालोचने किञ्चित् प्रामादिकत्वं वयं पश्यामः। यद्यपि एवमनवधानता तावदतीव स्वल्पा। वस्तुतः व्याकरणशास्त्रेऽप्रतिमं पाण्डित्यं विना एवं व्याकरणालोचना तु असम्भवा। अत एव संस्कृतभाषायामालङ्कारिको वामनाचार्यः खलु महावैयाकरणोऽप्यासीत्– इत्यत्र नास्ति संशयः।

*

## सन्दर्भाः

1. 'शब्दस्मृतेः शब्दशुद्धिः' (का.सू.वृ.1/3/4) सूत्रस्य कविप्रियावृत्तिः।

2. पातञ्जलमहाभाष्यस्य पस्पशाह्निकम्।
3. 'वृक्षादीनां सप्तानां द्वन्द्वः, अश्ववडवेत्यादि द्वन्द्वत्रयं च प्राग्वद्वा।' (सि.कौ./समासप्रकरणम्)।
4. 'स्तृञ् आच्छादने', धा.पा. 1243।
5. 'विपूर्वात् स्तृणातेर्घञ् स्यादशब्दविषये प्रथने।' (सि.कौ./उत्तरकृदन्तप्रकरणम्)।
6. 'अजन्ताङ्गस्य वृद्धिर्ञिति णिति च परे।' (ल.सि. कौ./अजन्तपुँल्लिङ्गाः)।
7. 'अन्यतो ङीष्' (4/1/40) सूत्रस्य काशिकायाः न्यासटीका।
8. 'तोपधभिन्नाद्वर्णवाचिनोऽनुदात्तान्तात् प्रातिपदिकात् स्त्रियां ङीप् स्यात्।' (सि.कौ./स्त्रीप्रत्यय–प्रकरणम्)।
9. 'इवर्णान्तस्य अवर्णान्तस्य च भस्य इकारे परे तद्धिते च लोपो भवति।' (काशिकावृत्तिः)।
10. 'यस्य समुदायस्याचां मध्ये आदिवृद्धिस्तद्वृद्धसंज्ञं स्यात्।' (ल.सि. कौ./ शैषिकाः)।
11. 'गोत्रे इति न अनुवर्तते। सामान्येन विधानम्। वृद्धात् प्रातिपदिकात् छः प्रत्ययो भवति शैषिकः।' (का.वृ.)।
12. 'कालविशेषवाचिनः प्रातिपदिकात् ठञ् प्रत्ययो भवति शैषिकः।' (का.वृ.)।
13. 'तस्येति षष्ठीसमर्थात् 'इदम्' इत्येतस्मिन्विषये यथाविहितं प्रत्ययो भवति।' (का.वृ.)।
14. 'भाषायामभक्ष्याच्छादनयोः' इत्येव। वृद्धेभ्यः प्रातिपदिकेभ्यः शरादिभ्यश्चाभक्ष्याच्छादन–योर्विकारावयवयोर्भाषायां विषये नित्यं मयट् प्रत्ययो भवति।' (का.वृ.)।
15. 'मूर्धमस्तकवर्जितात् स्वाङ्गादुत्तरस्याः सप्तम्या अकाम उत्तरपदेऽलुग्भवति।' (का.वृ.)।
16. समासेऽनञ्पूर्वे क्त्वा इत्येतस्य ल्यबित्ययमादेशो भवति। (काशिकावृत्तिः)।
17. 'लघुपूर्वात्परस्य णेरयादेशः स्यात् ल्यपि।' (सि. कौ./उत्तरकृदन्तप्रकरणम्)।
18. आख्यातचन्द्रिका, 1/2/54–55।
19. सिद्धान्तकौमुदी/चुरादिप्रकरणम्, पृ. 398 द्रष्टव्यम्।
20. सिद्धान्तकौमुदी/भ्वादिप्रकरणम्, पृ.193 द्रष्टव्यम्।
21. 'शप्श्यनोरात् परो यः शतुरवयवस्तदन्तस्य नित्यं नुम् शीनद्योः।'(ल.सि.कौ./हलन्तनपुंसक–लिङ्गाः)।

*

# आस्तिकदर्शनेषु ज्ञानस्वरूपविमर्शः

सन्दीप मल्लिकः

## प्रस्तावना

भारतीयदर्शनेषु ज्ञानस्य भूमिका अवश्यस्वीकार्या। पदार्थसम्बद्धं यथार्थज्ञानमेव दर्शनचर्चायामाशुप्रयोजनभूतम्। तत्त्वज्ञानं मोक्षलाभस्य हेतुभूतमिति भारतीयदर्शनेषु प्रायः समेषामेव सम्प्रदायानां सिद्धान्तः। सम्प्रदायभेदेन तत्त्वज्ञानोपायानामपि भेदः परिलक्ष्यते। भारतीयदर्शनेषु प्रायः समस्तसम्प्रदायाः स्वीकुर्वन्ति यत् ज्ञानमेव विषयं प्रकाशयतीति। ज्ञानस्य सत्तां विना विषयव्यवहारो न सम्भवति। यथार्थमेव ज्ञानं विषयं प्रकाशयति। जगति अखिलमेव ज्ञानेनैव प्रकाशितं भवति। न हि केवलं विषयमेव प्रकाशयति ज्ञानम् अपि च पदार्थानामस्तित्वमपि साधयति। अतः ज्ञानस्याभावे कस्यापि विषयस्य व्यवहारः कदापि न सम्भवति।

मीमांसकाः मन्यन्ते कर्मानुष्ठानेन अभ्युदयः सिद्ध्यति, ब्रह्मज्ञानेन मोक्षः सिद्ध्यतीति अद्वैतवादिनां सिद्धान्तः। यद्यपि सांख्यवैशेषिकाः नैयायिकाश्च पदार्थसम्बन्धितत्त्वज्ञानं मोक्षसाधनरूपेण स्वीकुर्वन्ति। दुःखस्यात्यन्तिको नाश एव न्यायवैशेषिकनये मोक्षः अपवर्गो वा।

## न्यायवैशेषिकदर्शने ज्ञानम्

न्यायदर्शने ज्ञानं पञ्चमप्रमेयरूपेण स्वीक्रियते। महर्षिगौतमेन न्यायसूत्रस्य प्रथमाध्याये पञ्चमाह्निके पञ्चदशसूत्रे पञ्चमप्रमेयस्य बुद्धेर्लक्षणप्रसङ्गे उक्तम्– '**बुद्धिरुपलब्धिर्ज्ञान-मित्यनर्थान्तरम्**'[1] इति। अर्थात् बुद्धिः, उपलब्धिः, ज्ञानञ्चेति पर्यायवाचिनः शब्दाः। ज्ञा–धातुः, बुध्–धातुः, उपपूर्वाद् लभ्–धातुश्च समानार्थकाः। अतः ज्ञानस्य नामान्तरं बुद्धिः उपलब्धिर्वा। एवं पर्यायशब्दैः लक्षणविधानस्य प्रमाणं प्राप्यते भाष्यवार्तिके। उद्द्योतकारेण भाष्यवार्तिके उक्तम्–

'**एतैश्च पर्यायशब्दैर्नान्यः पदार्थोऽभिधीयते इत्यसाधारणत्वात् लक्षणम्**'[2]

इति। उदयनाचार्येण बुद्धेर्लक्षणप्रसङ्गे उक्तम् – '**अर्थप्रकाशो बुद्धिः**'[3] इति। अर्थस्य प्रकाश एव बुद्धिः। तर्कभाषाग्रन्थे केशवमिश्रेण बुद्धिनिरूपणप्रसङ्गे आदौ पर्यायशब्दैः लक्षणं विहितं ततश्चोक्तं तेन अर्थप्रकाश एव बुद्धेः स्वरूपमिति। तन्मते बुद्धि–उपलब्धि–ज्ञान–प्रत्ययेत्यादिभिः पर्यायशब्दैः याऽवगम्यते सा बुद्धिरिति। अथवा **बुद्धिर्हि अर्थप्रकाश**[4] इति। अतिप्रसिद्धे तर्कसंग्रहग्रन्थेऽपि '**सर्वव्यवहारहेतुर्गुणो बुद्धिर्ज्ञानम्**' इति बुद्धेर्लक्षणेऽपि महर्षिगौतममनुसृत्य पर्यायशब्दैः लक्षणं निर्देशितम्।[5] वल्लभाचार्यरचितस्य न्यायलीलावतीग्रन्थस्य शङ्करमित्ररचितायां न्यायलीलावतीकण्ठाभरणाख्यायां टीकायां बुद्धेर्लक्षणप्रसङ्गे उक्तं–

'**इच्छासाक्षात्कारणात्मविशेषगुणवृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्त्वम्**'[6]इति।

न्यायवैशेषिकैः ज्ञानत्वजात्या ज्ञानस्य निर्दुष्टं लक्षणं विहितम्। किन्तु, ज्ञानं हि अर्थस्य विषयस्य वा प्रकाशस्वरूपं तदपि स्वीकृतं तैः। न्यायवैशेषिकनये गुणस्वरूपं ज्ञानं हि जन्यपदार्थः कार्यं वा। जन्यपदार्थाणां कारणसमूहैरुत्पन्नत्वात् ज्ञानस्यापि कारणानि अपेक्ष्यन्ते। न्यायवैशेषिकनये ज्ञानस्य गुणपदार्थत्वात् न हि तत् निराश्रयम्। गुणमात्रमेव द्रव्याश्रितम्। अतः ज्ञानस्य किं नाम द्रव्यम् आश्रयभूतं भवतीति विचार्यते। न्यायनये क्षित्यप्तेजोमरुद्व्योमसु पञ्चभूतेषु नहि ज्ञानं श्रयति ज्ञानस्य मानसप्रत्यक्षविषयत्वात्।[7] अत्र न्यायवैशेषिकाः क्रियापदेन उत्क्षेपणादिक्रियां निर्दिशन्ति। ज्ञानं न तादृशी क्रिया। ज्ञानक्रियायाः फलं ज्ञाततायाः आश्रयो भवति, तस्मादेव घटादिविषयः कर्मभूतो भवति। अनयैन ज्ञाततया ज्ञानम् अवगम्यते।

वैशेषिकसूत्रकार '**आत्मेन्द्रियार्थसन्निकर्षाद्यन्निष्पद्यते तदन्यत्**'[8], '**आत्मेन्द्रियार्थसन्निकर्षज्ञानस्य भावोऽभावश्च मनसो लिङ्गम्**'[9] इति सूत्रद्वयेन आत्मनः मनसा च प्रयोजनार्थं ज्ञानं निर्देशितवान्। वैशेषिकतन्त्रज्ञानं बुद्धिः उपलब्धिश्च पर्यायवाचकशब्दाः। प्रथमसूत्रानुसारं यदा आत्मा इन्द्रियाणि, इन्द्रियविषयैः सह संयुज्यते तदा यत् उत्पाद्यते तत् ज्ञानम्। पदार्थधर्मसंग्रहे प्रशस्तपादाचार्येणापि पर्यायशब्दैरेव बुद्धेर्लक्षणं विहितम्। तेनोक्तं– '**बुद्धिरुपलब्धिर्ज्ञानं प्रत्यय इति पर्यायाः**'[10] इति। वैशेषिकसूत्रे महर्षिः कणादः विद्यालक्षणमुवाच– '**अदुष्टं विद्या**'[11] इति। अर्थात् दोषरहितं ज्ञानमेव विद्या। अविद्यालक्षणञ्चोवाच– '**तद्दुष्टज्ञानम्**'[12] इति। अर्थात् दोषयुक्तं ज्ञानमविद्या। सप्तपदार्थीति ग्रन्थे शिवादित्यमिश्राचार्येण बुद्धेर्लक्षणं लक्षितम्– '**बुद्धित्वसामान्यवान् आत्माश्रयः प्रकाशो बुद्धिः**'[13] इति। अर्थात् बुद्धिर्हि बुद्धित्वजातेः आश्रयभूता आत्मनि विद्यमाना प्रकाशस्वरूपा इति। सुखादौ अवृत्तिः समस्तबुद्धिवृत्तिः जातिर्हि बुद्धित्वजातिः।

अतः बुद्धित्वजातेराश्रयभूता आत्मनि विद्यमाना प्रकाशस्वरूपा या विशिष्टगुणरूपा सा बुद्धिरिति।

## सांख्य–योगदर्शने ज्ञानम्

सांख्यमते बुद्धिः, उपलब्धिः ज्ञानञ्चेति न पर्यायवाचकाः शब्दाः। ते हि भिन्नार्थबोधकाः शब्दाः इति मतमनुसृत्यैव प्रकृतिः पुरुषश्चेति तत्त्वद्वयं प्रतिष्ठितम्। पुरुषः सर्वदा एकरूपः अपरिणामी वा, प्रकृतिश्च बहुरूपिणी परिणामिनी वा। जडपदार्थः नियतपरिवर्तनशीलः। जडश्च प्रकृतेः प्रथमा परिणामबुद्धिः। सांख्यैः बुद्धिर्हि महत्, सत्त्वं चित्तम् अन्तःकरणं वेति आख्यया आख्यायन्ते। एषा बुद्धिः अन्तःकरणं वा दर्पण इव निर्मलं संकोचविकासस्वभावं च। सा च चक्षुःकर्णादीन्द्रियैः बहिर्देशगमने समर्था, घटपटादिपदार्थानामाकारमपि धारयितुं समर्था। पदार्थेन सह चित्तस्य सम्बन्धोऽयं पदार्थाकारः परिणामः चित्तवृत्तिर्वा इत्युच्यते। बुद्धिः अन्तःकरणं वा चक्षुश्श्रोत्रादीन्द्रियैः बाह्यविषयं गृह्णातीति इन्द्रियाणि द्वाराणि इत्युच्यन्ते। अपि च, एतानि ज्ञानमुत्पदायन्तीति हेतोः ज्ञानोत्पादकानि ज्ञानेन्द्रियाणीति कथ्यन्ते। बुद्धेरन्तःकरणस्य वा स्वस्थाने अवस्थानपूर्विका बाह्यविषयाकारे परिणतिः विषयाकारान्तःकरणवृत्तिर्वा ज्ञानमित्युच्यते।

अत एवात्र दृश्यते सांख्यमते बुद्ध्युपलब्धिज्ञानशब्दाः न पर्यायवाचका इति। न्यायसूत्रकारेण न्यायसूत्रे एते शब्दाः पर्यायवाचकाः इति उक्त्वा एव सांख्यमतं खण्डितम्। किन्तु, सांख्यमते एते शब्दाः नाभिन्नार्थबोधकाः अपि न्यायवैशेषिकदर्शने इव अभिधानेऽपि पर्यायशब्दरूपेणैव एते विवेचिताः। अमरकोषाख्ये अभिधानेऽपि तत्तुल्यमेवोक्तम्– '**बुद्धिर्मनीषा धिषणा धीः प्रज्ञा शेमुषी मतिः। प्रेक्षोपलब्धिश्चित् संवित् प्रतिपज्ज्ञप्तिचेतनाः॥**'[14] इति। अर्थात् बुद्धिः, मनीषा, धिषणा, धीः, प्रज्ञा, शेमुषी, मतिः, उपलब्धिः, चित्, संवित्, प्रतिपद्, ज्ञप्तिः, चेतना इत्यादयः बुद्धिवाचकाः शब्दाः।

योगदर्शने चित्तवृत्तिरेव व्यावहारिकज्ञानमुच्यते। यद्यपि विषयप्रकाशनं मनसः स्वभावः, तथापि चित्तवृत्तिं विना ज्ञानं न सम्भवति। चित्तवृत्तिः मनसः विषयस्य स्वीकारः। चित्तवृत्तिः चितिशक्त्या प्रकटिता भवति। चितिशक्त्या सह अवशिष्टं बौद्धिकवृत्तिकं ज्ञानवृत्ति उच्यते। चित्तवृत्तिप्रकारविमर्शात् निष्पद्यते यत्, प्रमाणानि वृत्तयः क्लिष्टाक्लिष्टभेदेन द्विविधानि भवन्ति। प्रत्यक्षानुमानागमास्त्रयः चित्तप्रमाणस्वरूपम्। प्रमाणवृत्तयः अनधिगतविषयकं तथा अप्रमाणवृत्तयश्च अधिगतविषयकमेव। प्रमाणवृत्तिषु प्रत्यक्षमेव विशेषज्ञानप्रधानम्, अनुमानागमं च सामान्यज्ञानप्रधानं भवति।

**मीमांसा–वेदान्तदर्शने ज्ञानम्**

भाट्टमीमांसकाः केवलम् अर्थप्रकाश एव ज्ञानमिति न आख्यापयन्ति। तेषां नये अर्थप्रकाशो हि ज्ञानस्य कार्यस्वरूपः फलस्वरूपो वा। अर्थात् अर्थप्रकाशः ज्ञानरूपेण कारणेन उत्पद्यते। ज्ञानेनोत्पन्नः प्रकाशरूपो धर्मः तैः प्रकट्य–ज्ञानतेत्यादिभिः अभिधाभिः अभिधीयन्ते।[15] ज्ञानं तस्य कारणसमूहैः आत्मनि उत्पद्यते। भाट्टमते ज्ञाततायाः उत्पादकं हि ज्ञानं ज्ञातता च उभयोः गुणपदार्थः। भाट्टमतानुसारिणि मानमेयोदयाख्ये ग्रन्थे गुणनिरूपणप्रसङ्गे नारायणभट्टैः आदौ चतुर्विंशतिगुणानामुल्लेखो विहितः। तत्र ज्ञानस्य ज्ञाततायाश्चोभयोरेव उल्लेखः प्राप्यते।[16] आत्मनो विशेषगुणतया बुद्धि–सुख–दुःखेच्छा– द्वेष–प्रयत्नानामुल्लेखोऽस्ति।[17] अतः भाट्टमते बुद्धिर्ज्ञानं वा आत्मविशेषगुणः अर्थात् आत्मवृत्तिः। अपि च ज्ञातता हि विषयाश्रितो गुण इति तैः स्वीकृतम्।[18] अतः ज्ञानस्य ज्ञाततायाः च भिन्नाधिकरणत्वात् ते न समानभूते। भाट्टनये अर्थप्रकाशो न हि ज्ञानरूपः पदार्थः।[19] ज्ञानं हि क्रियायाः ज्ञाततायाश्च फलम्। एवं कारणादपि अर्थप्रकाशरूपा ज्ञातता तेषां नये न पदार्थभूता। पार्थसारथीमिश्रः शास्त्रदीपिकायां ज्ञानं सकर्मकक्रियां कथयति। यद्यपि ज्ञानं भाट्टगणैः गुणपदार्थतया स्वीकृतं तथापि तैः क्रियारूपेणापि स्वीकृतम्। ज्ञाधातोरर्थः हि ज्ञानमिति हतोः ज्ञानं क्रिया। मीमांसानये धातोरर्थमात्रमेव क्रिया स्यात्।[20] किन्तु अत्र न्यायवैशेषिकाः क्रियापदेन उत्क्षेपणादिक्रियां निर्दिशन्ति। ज्ञानं न तादृशी क्रिया। ज्ञानक्रियायाः फलं ज्ञाततायाः आश्रयः भवति, तस्मादेव घटादिविषयः कर्मभूतो भवति। अनयैव ज्ञाततया ज्ञानम् अवगम्यते। भाट्टनये क्रियामात्रमेव अतीन्द्रियम् अर्थात् प्रत्यक्षागोचरम्। ज्ञानस्य क्रियात्वात् तस्यापि प्रत्यक्षः सम्भवः। किन्तु ज्ञाने उत्पन्ने सति विषये ज्ञातता उत्पद्यते। ज्ञानं यथा विषयं प्रकाशयति तथैव विषये विद्यमानां ज्ञाततामपि प्रकाशयति। घटज्ञाने उत्पन्ने सति तज्ज्ञानं घटं प्रकाशयति, तत् घटे विद्यमानां घटत्वजातिं, रक्तादिरूपं यथा प्रकाशयति तथैव घटस्थां ज्ञाततामपि प्रकाशयति। प्रत्यक्षभूतायां ज्ञाततायां सत्यां ज्ञानम् अनुमीयते इति मीमांसासूत्रभाष्यकारेण शबरस्वामिना मन्यते। तन्मते विषये ज्ञाते सति एव तस्य कारणीभूतं ज्ञानमनुमीयते। ज्ञाते सति विषये प्राग्वर्ति ज्ञानं न हि केनापि अनुमीयते।[21]

किन्तु, कुमारिलभट्टेनोक्तम्– '**ज्ञानं हि अर्थापत्तिप्रमाणगम्यम्**'।[22] पूर्वं यज्ज्ञानमुत्पद्यते तस्य बोधकं न अनुमानम्, अर्थापत्तिस्तस्य बोधकः। ज्ञानाभावे सति ज्ञानत्वानुपपन्नत्वात् अर्थापत्त्या पूर्ववर्तिनः ज्ञानस्यानुसन्धानं क्रियते। श्लोकवार्तिकस्य व्याख्याकारेण पार्थसारथिमिश्रेण न्यायरत्नाकरटीकायामुक्तम् – '**अर्थापत्तिरेव ज्ञानग्राहकं प्रमाणमिति।**'[23]

तत्र भाट्टाः ज्ञानं क्रियारूपेण स्वीकुर्वन्ति इत्यस्मादेव तद् ज्ञानमप्रत्यक्षमिति वदन्ति। यतो तेषां नये या कापि क्रिया न प्रत्यक्षयोग्या। यतो हि भट्टनये ज्ञानस्य क्रियात्वात् न हि तज्ज्ञानं प्रत्यक्षप्रमाणगम्यम्। अर्थात् तत् परोक्षप्रमाणगम्यम्। मानसप्रत्यक्षयोग्यं हि ज्ञानमिति ते स्वीकुर्वन्ति। कस्मिन्नपि विषये ज्ञानस्य उत्पत्तावेव तत् विषयं प्रकाशयति। विषयप्रकाशकं च ज्ञानं व्यवसायः इति उच्यते। अपि च व्यवसायविषयकं ज्ञानम् अनुव्यवसायमिति उच्यते। यथा घटस्य ज्ञाने सति तस्याकारो भवति 'अयं घट' इति। ज्ञानमिदं व्यवसायः। घटज्ञानं च विषयीकृत्य यज्ज्ञानमुत्पद्यते तस्याकारो भवति– 'अहं जानामि यदयं घटः' इति। इदञ्च ज्ञानमनुव्यवसायः। अनेनैवानुव्यवसायेन ज्ञानम् अवगम्यते। अनुव्यवसायः नैयायिकैः प्रत्यक्षात्मक उच्यते। अत एव अत्र सिध्यति यत् ज्ञानस्य प्रत्यक्षं सिद्धमिति।

अद्वैतवेदान्ते ज्ञानशब्दस्य प्रयोगः आधिविद्यके अर्थे प्रमाणतात्त्विके चार्थे प्राप्यते। ब्रह्म हि ज्ञानपदस्य आध्यात्मिकः आधिविद्यकः अर्थः, तथैव प्रमितिचैतन्यं ज्ञानपदस्य प्रमाणतात्त्विकश्च अर्थः अस्ति। यद्यपि प्रमाणतत्त्वे ज्ञानमिति पदेन मुख्यतया प्रमितिचैतन्यं निर्दिश्यते, तथापि ज्ञानपदं गौणरूपेण प्रमाणचैतन्यम् अपि बोधयति प्रमाणचैतन्यम् इत्यभिहिते वृत्तिज्ञानमिति निर्दिष्टम्। अद्वैतमते वृत्तिः द्विविधा प्रत्यक्षा परोक्षा च। प्रत्यक्षवृत्तिः पुनः द्विविधा भवति चाक्षुषम् अचाक्षुषं च। अन्तःकरणम् चक्षुरिन्द्रियद्वारेण विषयं प्राप्य विषयाकारतां लभते। अन्तःकरणस्य एष विषयाकारेण परिणामः चाक्षुषान्तःकरणवृत्तिः इति कथ्यते। अद्वैतवेदान्तमते एतस्मिन् अन्तःकरणवृत्तौ प्रतिबिम्बितं चैतन्यमेव प्रमाणचैतन्यम् अस्ति। एतत् प्रमाणचैतन्यमेव गौणतया प्रमा यथार्थज्ञानं वा इति कथ्यते।[24]

वेदान्तदेशिकेन अर्थप्रकाश एव ज्ञानमिति कथितम्। यदेव खलु विषयं प्रकाशयति तदेव ज्ञानपदवाच्यं भवति। तस्य मतं हि ज्ञानं द्विविधं स्वरूपज्ञानं धर्मभूतज्ञानं च। जीवो हि ज्ञानस्वरूपः। एतद्धि स्वरूपज्ञानम्। घटादिविषयाणां ज्ञानं तु धर्मभूतज्ञानम्। एतौ उभौ ज्ञानप्रकारौ विषयं प्रकाशयतः। अत एव ज्ञानशब्देन उभयम् अपि व्यवहृतम्। तत्त्वमुक्ताकलापाख्ये ग्रन्थे वेदान्तदेशिकेन प्रदर्शितं यत् स्वरूपज्ञानं स्वेनैव स्वस्य प्रकाशं साधयति, तथा अन्यान् परान् अपि प्रकटयति। किन्तु धर्मभूतज्ञानं विषयान् केवलं जीवस्य समक्षम् उपस्थापयति, न तु प्रकाशयति।[25] वेदान्तदेशिकोऽपि नैयायिका इव ज्ञानम् आत्मनः गुणमात्रमेवेति न वदति। तन्मते ज्ञानं हि द्रव्यम्। अत्र उल्लेख्यं यत् न्यायवैशेषिकाणां वस्तुवादिनां मतानुसारं ज्ञानं हि गुणविशेषः। वेदान्तदेशिकेन ज्ञानं यद्यपि द्रव्यमिति कथितं, तथापि तत् आत्मगुणः इत्यपि प्रतिपादितम्। ज्ञानम् आत्मगुणविशेष

इति मतस्य तात्पर्यं हि यं विषयं समवलम्ब्य ज्ञानं जायते, ज्ञानं तस्य विषयस्य गुणः। यदा ज्ञानं गुण इति कथ्यते, तदा गुणशब्दस्य अर्थः धर्मस्वभावः, न तु नैयायिकानां सम्मतः द्रव्याश्रयी गुणः। वेदान्तदेशिकस्य मतानुसारं गुणः हि द्विविधः द्रव्यात्मकः गुणः केवलगुणमात्रं च। वेदान्तदेशिकः तु ज्ञानं द्रव्यात्मको गुण इति वदति, यतः एतत् द्रव्यमपि जीवस्य गुणः। किन्तु सत्त्वं रजः तमश्च केवलगुणमात्रम्। एते कदापि द्रव्यमिति पदेन वक्तुं न शक्यन्ते।[26] वेदान्तदेशिकस्य मतानुसारं, ज्ञानं न कदापि अद्रव्यमिति वक्तुं शक्यते, यतो हि एतत् प्रत्यक्षानुमानस्मृत्यादिनानाविधाकारावस्थां गृह्णाति।

किञ्च, वेदान्तेशिकस्य मतानुसारं धर्मभूतज्ञानम् ईश्वरजीवयोः उभयोः एव नित्यं सर्वव्यापि च। परन्तु संसारदशायां जीवस्य धर्मभूतज्ञानं कर्मप्रभावेण परिमितं सीमितं च भवति। विविधोपाधिपरिणामेन एतत् धर्मभूतज्ञानं सुखदुःखशोककामद्वेषप्रयनप्रत्यक्षानुमानोपमान-स्मरणसंशयभ्रममायादिरूपाकारेणाकारितं भवति। सर्वविधाः चित्तवृत्तयः धर्मभूतज्ञानेन प्रभाविताः भवन्ति।

*

## सन्दर्भाः


1. न्यायसूत्रम्, 1.1.15
2. न्यायभाष्यवार्तिकम्, न्यायसूत्रम्, 1.1.15, पृ. 435
3. लक्षणावली, पृ. 22
4. बुद्धिरुपलब्धिर्ज्ञानं प्रत्यय इत्यादिभिः पर्यायशब्दैः या अभिधीयते सा बुद्धिः। अर्थप्रकाशो वा बुद्धिः–तर्कभाषा, बुद्धिनिरूपणम्, पृ. 59
5. तर्कसंग्रहः, पृ. 203
6. न्यायलीलावतीकण्ठाभरणटीका, पृ. 409
7. बुद्ध्यादयो न गुणा भूतानां मानसप्रत्यक्षत्वात्। ये हि भूतानां गुणास्ते न मनसा गृह्यन्ते यथा रूपादयः। नापि दिक्कालमनसां गुणाः, विशेषगुणत्वात् – तर्कभाषा, आत्मनिरूपणम्, पृ. 2
8. वैशेषिकसूत्रम्, 3.1.18
9. वैशेषिकसूत्रम्, 3.2.1

10. प्रशस्तपादभाष्यम्, बुद्धिप्रकरणम्, पृ.297
11. वैशेषिकसूत्रम्, 9.2.12
12. वैशेषिकसूत्रम्, 9.2.12
13. सप्तपदार्थी, सूत्रम् – 86, पृ. 59
14. अमरकोषः, पृ.55
15. बुद्धिः पुनरर्थप्रकाशापरनामधेयप्रकट्यमानमेयोदयः, गुणप्रकरणम्, पृ. 253
16. रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वस्नेहबुद्धि-सुखदुःखेच्छाद्वेषप्रयत्नसंस्कारध्वनिप्राकट्यशक्तिभेदाच्चतुर्विंशतिविधः–मानमेयोदयः, गुणप्रकरणम्, पृ. 244
17. बुद्धिसुखदुःखेच्छाद्वेषप्रयत्ना आत्मविशेषगुणाः– मानमेयोदयः, गुणप्रकरणम्, पृ.253
18. प्राकट्याश्रयो विषयः– मानमेयोदयः, गुणप्रकरणम्, पृ. 261
19. न चागन्तुकं ज्ञानमेव प्रकाशपदार्थ इति वाच्यम्।– मानमेयोदयः, पृ.262
20. क्रियाधात्वर्थमात्रं–मीमांसाश्लोकवार्तिकम्, आत्मवादः, श्लोकसंख्या–75, पृ. 501
21. न हि ज्ञातेऽर्थे कश्चिद् बुद्धिमुपलभते, ज्ञाते त्वनुमानादवगच्छति – शबरभाष्यम्, मीमांसासासूत्रम्, 1.1.5, पृ. 32
22. नान्यथा ह्यर्थसद्भावो दृष्टः समुपपद्यते ज्ञानं चेन्नेत्यतः पश्चात् प्रमाणमुपजायते – मीमांसाश्लोकवार्तिकम्, शून्यवादः, श्लोकसंख्या 182, पृ. 227
23. अर्थापत्तिर्ज्ञानस्य प्रमाणम्, सा चार्थस्य ज्ञातत्वान्यथानुपपत्तिप्रभवा प्रागर्थस्य ज्ञातत्वाभावान्नोत्पद्यते, ज्ञाते त्वर्थे पश्चात् तज्ज्ञातत्वानुपपत्त्या अर्थापत्तिः प्रमाणमुपजायते–न्यायरत्नाकरः, मीमांसाश्लोकवार्तिकम्, शून्यवादः, श्लोकसंख्या 182
24. ज्ञानावच्छेदकत्वाद् वृत्तौ ज्ञानत्वोपचारः–वेदान्तपरिभाषा, पृ. 18/1–2
25. तत्त्वमुक्ताकलापः, 25
26. न्यायसिद्धाञ्जनम्, पृ. 554

*

## किञ्चिद् रामायणीयम्

**लङ्कायाम् अशोकवनिकायां कीदृशीं 'सीतां' वानरपुङ्गवः हनुमान् ददर्श?**

1. मलिनसंवीताम्, राक्षसीभिः समावृताम्।
2. उपवासकृशाम्, दीनाम्, निःश्वसन्तीं पुनः पुनः।
3. शुक्लपक्षादौ अमलां चन्द्ररेखाम् इव।
4. धूमजालेन पिनद्धां विभावसोः शिखाम् इव।
5. मन्दप्रख्यायमानेन रूपेण रुचिरप्रभाम्।
6. पीतेन एकेन क्लिष्टेन उत्तमवाससा संवीताम्, सपङ्काम् अनलङ्कारां विपद्मां पद्मिनीम् इव।
7. पीडितां दुःखसन्तप्तां परिक्षीणां तपस्विनीम्, अङ्गारकेण ग्रहेण पीडितां रोहिणीम् इव।
8. अश्रुपूर्णमुखीम्, अनशनेन कृशां च, शोकध्यानपराम्, नित्यं दुःखपरायणाम्।
9. प्रियं जनम् अपश्यन्तीम्, राक्षसगणं पश्यन्तीम्, स्वगणेन हीनां श्वगणाभिवृतां मृगीम् इव।
10. जघनं गतया एकया नीलनागाभया वेण्या नीरदापाये नीलया वनराज्या महीम् इव।
11. सुखार्हाम्, दुःखसन्तप्ताम्, व्यसनानाम् अकोविदाम्, विशालाक्षीम्, अधिकं मलिनां कृशाम्।
12. सर्वस्य जगतः पूर्णचन्द्रप्रभामिव इष्टाम्, भूमौ आसीनां सुतनुं नियतां तापसीम् इव।
13. निःश्वासबहुलाम्, भीरुं भुजगेन्द्रवधूमिव महता शोकजालेन विततेन न राजतीम्।
14. सन्दिग्धां स्मृतीम् इव, निपतिताम् ऋद्धिम् इव।
15. विहतां श्रद्धाम् इव, प्रतिहताम् आशाम् इव।
16. यथा सोपसर्गां सिद्धिम्, सकलुषां बुद्धिम् इव।
17. अभूतेन अपवादेन निपतितां कीर्तिम् इव।
18. रामोपरोधव्यथिताम्, रक्षोगणनिपीडिताम्, अबलाम्, मृगशावाक्षीं ततस्ततः वीक्षमाणाम्।
19. बाष्पाम्बुपरिपूर्णेन कृष्णवक्राक्षिपक्ष्मणा अप्रसन्नेन वदनेन पुनः पुनः निःश्वसन्तीम्।
20. मलपङ्कधरां दीनाम्, मण्डनार्हाम् अमण्डिताम्, कालमेघैः आवृतां नक्षत्रराजस्य प्रभाम् इव।
21. आम्नायानाम् अयोगेन प्रशिथिलां विद्याम् इव।
22. अनलङ्कृताम्, यथा संस्कारेण हीनाम् अर्थान्तरं गतां वाचम्।

    तां समीक्ष्य विशालाक्षीं राजपुत्रीमनिन्दिताम्
    
    तर्कयामास सीतेति कारणैरुपपादिभिः।।

रामायणम्, सुन्दरकाण्डम्, 15 सर्गः

# अष्टाध्याय्यां वासरूपविधिविमर्शः

**डॉ. सोमवीरसिंघलः डॉ. ज्वलन्तकुमारश्च**

**शोधसारः–**

उत्सर्गापवादविधौ हि उत्सर्गस्य अपवादसूत्रं नित्यमेव बाधको भवति। अपवादस्तु 'पूर्वपरनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयस्त्वम्' इति नियमेन उत्सर्गसूत्रेभ्यः सर्वातिशायी वर्त्तते। किन्त्विदं परिभाषासूत्रं 'वाऽसरूपोऽस्त्रियाम्' इति इमान् अपवादनियमानप्यतिशेते साधुप्रयोगजिघृक्षया पाणिनेर्धिया। उच्यते 'ण्वुल्तृचौ' इति सर्वेभ्यो धातुभ्यः ण्वुल्तृचौ प्रत्ययौ भवतः। उदाहरणम्–विक्षेपकः, विक्षेप्ता। एतदनन्तरं सूत्रं पठ्यते– 'इगुपधज्ञाप्रीकिरः कः' इति इगुपधेभ्यो धातुभ्यः जानातेः प्रीणातेः किरतेश्च कः प्रत्ययो भवति। उदाहरणम्–विक्षिपः।

किन्तु 'पूर्वपरनित्यान्तरङ्गानामुत्तरोत्तरं बलीयः' इति नियमेन परत्वात् 'इगुपधज्ञाप्रीकिरः कः' इति सूत्रस्य नियमापवादत्वात् क प्रत्यय एव प्राप्नोति।

अनिष्टोऽयं केवलः कः प्रत्ययः। इष्यन्ते हि त्रयोऽपि प्रत्ययाः साधुप्रयोगदृष्ट्या, तदत्र अनियमे नियमं विधातुं प्रकल्प्यते इयं परिभाषा वाऽसरूपोऽस्त्रियामिति।

अनया परिभाषया त्रिण्यपि रूपाणि सेत्स्यन्ति असरूपस्य अपवादप्रत्ययस्य विकल्पेन बाधकत्वात्। अत्र अस्त्रियामिति पदस्यार्थः स्त्रीप्रत्ययेषु नास्ति अपितु स्त्र्यधिकारं विहाय इति वर्त्तते। वाऽसरूपविधेः अनित्यत्वख्यापकानि अपवादभूतानि वा कानिचन वार्त्तिकानि निर्दिश्यन्ते–

1. ताच्छीलिकेषु वासरूपविधिर्न भवति।
2. क्तल्युट्तुमुन्खलर्थेषु वासरूपविधिर्न भवति।
3. लादेशेषु वासरूपविधिर्न भवति।

**कूटशब्दाः–** अष्टाध्यायी, वासरूपविधिः, असरूपः, अस्त्रियाम्, भाष्यम्, लादेशः, क्तल्युट्तुमुन्खलर्थः, उत्सर्गः, अपवादः, बलीयः, परिभाषा।

संज्ञा–परिभाषादिसूत्रभेदानां प्रकारान् मनसि निधाय आचार्येण महर्षिपाणिनिना शास्त्रस्य प्रवृत्त्यर्थं या व्यवस्था अङ्गीकृतेति उच्यते– साऽस्ति उत्सर्गापवादव्यवस्था। संस्कृतवाङ्मयमत्यन्तं विशालं वर्तते। अस्मिन् वाङ्मये संस्कृतव्याकरणस्य स्थानं मुख्यतमम्। व्याकरणशास्त्रं विपुलां शब्दराशिं स्वान्तः धारयति। किन्तु शब्दराशेः प्रतिपदपाठेन साधु अन्वाख्यानं दुष्करमासीत्।[1] अत एव पाणिनिना उत्सर्गापवादशैलीमाधृत्य व्याकरणशास्त्रं व्यधायि। शब्दसंरचनायाः सामान्यप्रवृत्तिः उत्सर्गसूत्रैः दर्श्यते अथ च विशेषप्रवृत्तिः सामान्यप्रवृत्तीनां बाधकत्वेनापवादसूत्रैः प्रदर्श्यते। यथा–उत्सर्गः–**कर्मण्यण्**(3.2.1) कुम्भकारः।

अपवादः–**आतोऽनुपसर्गे कः** (3.2.3) गोदः, कम्बलदः। आचार्येणोत्सर्गापवाद-शैलीमाश्रित्य शब्दलाघवेन सममनेकसदृशार्थद्योतने शब्दसमूहस्य विविधसंरचनात्मक-कृतीनामध्ययनमपि स्फुटं कृतम्। व्याकरणे सामान्यतोऽयं नियमो यत् 'उत्सर्गस्य अपवादः साक्षात् बाधको भवति' किन्तु सर्वत्रायं नियमः न संघटते यथा– **'वासरूपोऽस्त्रियाम्'** (3.1.94) अस्मिन् धात्वधिकारेऽसरूपोऽपवादप्रत्यय उत्सर्गस्य विकल्पेन बाधको भवति, स्त्र्यधिकारं वर्जयित्वा। समानरूपप्रत्ययस्तु नित्यं बाधको भवति।

सूत्रप्रकारः– **परिभाषासूत्रम्** – (कृदधिकारे उत्सर्गापवादमसम्बन्धज्ञापकपरिभाषा) सर्वत्र अपवादप्रत्यय उत्सर्गं नित्यं बाधते, किन्त्विह अपवादप्रत्ययोऽसरूपस्य उत्सर्गस्य विकल्पेन बाधको भवति इति। कथं ज्ञायते यत् परिभाषासूत्रमिदमिति? उच्यते– **ण्वुल्तृचौ** (3.1.133) – सर्वधातुभ्यो ण्वुल्तृचौ प्रत्ययौ भवतः। उदा.– विक्षेपकः, विक्षेप्ता। **इगुपधज्ञाप्रीकिरः कः**(3.1.135) – इगुपधेभ्यो धातुभ्यः जानीतेः प्रीणातेः किरतेश्च कः प्रत्ययो भवति। उदा.– विक्षिपः, बुधः, कृशः, प्रियः, किरः, ज्ञः।

अधुना **पूर्वपरनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः**[2] इति नियमेन परत्वात् **'इगुपधज्ञाप्रीकिरः कः'** इति सूत्रेण नित्यमपवादेन कप्रत्यय एव प्राप्नोति। अथ चापि–

'**येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवति**'[3] इत्यनेनापि नियमेन ण्वुल्तृचौ बाधित्वा कप्रत्यय एव प्रसज्यते। अनिष्टोऽयं केवलः क प्रत्ययः, इष्यन्ते हि त्रयोऽपि प्रत्ययाः तदत्र अनियमे नियमं विधातुं प्रकल्प्यते इयं परिभाषा– '**वाऽसरूपोऽस्त्रियामिति**'। तदनया परिभाषया असरूपोऽपवादप्रत्ययः विकल्पेन बाधते, येन त्रयोऽपि प्रत्ययाः सम्भाव्यन्ते यथा–

विक्षेपकः - ण्वुल्

विक्षेप्ता - तृच्

विक्षिपः - क

तदत्र अनियमे नियमकारिणी इति परिभाषायाः परिभाषापि सार्थिका भवति। **वाऽसरूपोऽस्त्रियाम्।** अत्र हि व्याकरणे नियमोऽस्ति यत् अपवादाः उत्सर्गान् बाधन्ते, परञ्च कुत्रचित् अपवादानपि विकल्पेन बाधित्वा उत्सर्गाः प्रवर्त्तन्ते। यथा व्याकरणे नियमोऽस्ति वाऽसरूपोऽस्त्रियामिति। तदत्र वाऽसरूपविधिमेवाभिलक्ष्य विज्ञापयिष्यते।

**वाऽसरूपोऽस्त्रियाम्**– अस्मिन् धात्वधिकारेऽसमानरूपः (असरूपाः) प्रत्ययोऽपवादो वा बाधको भवति (अपवादप्रत्ययाः उत्सर्गान् विकल्पेन बाधन्ते) स्त्र्यधिकारविहितप्रत्ययं वर्जयित्वा।[4] पूर्वपक्षी– ननु धात्वधिकारे विहिताः समेऽपि प्रत्ययाः असरूपा एव। यथा ण्वुल्, तृच्, क। तर्हि नास्ति काचिदिह विप्रतिपत्तिः।

उत्तरपक्षी– युक्तमाह। किन्तु यण्ण्यतोः कृत्ययोः बाधः सम्भवति, यतश्च भवदनुसारं तु इमौ असरूपत्वात् विकल्पेन भवेयुः, किन्तु अनुबन्धं विरहय्य एतयोः समानरूपत्वात् नित्यं बाधो भवति। अतः–

कृ - यत् - अचो यत् (3.1.97) (य)

कृ - ण्यत् - ऋहलोर्ण्यत् (3.1.124) (य)

कृ धातोः विहितः ण्यत् प्रत्ययः यतं नित्यं बाधते। कथं पुनः ज्ञायते यत् अनुबन्धान् वारयित्वा एव असरूपनिर्णयः कर्तव्यः इति? उच्यते– **नानुबन्धकृतमसारूप्यम्।**[5]

अनुबन्धेन कृतम्– अनुबन्धकृतम् अनुबन्धप्रयुक्तमित्यर्थः। समानं रूपं यस्य तत् सरूपम् तस्य भावः सारूप्यम्। न सारूप्यम् असारूप्यम् अनुबन्धकृतम् असारूप्यम्– असरूपता वाऽसरूपोऽस्त्रियाम् इति शास्त्रप्रवृत्तिप्रयोजकं न भवति। अनुबन्धविनिर्मुक्ते शब्दे यदि असारूप्यमस्ति, तदेव वासरूपोऽस्त्रियाम् इति शास्त्रप्रवृत्तिप्रयोजकं भवति इति परिभाषार्थः।

प्रकृते अण् (कर्मण्यण्) क (आतोऽनुपसर्गे कः) इति प्रत्यययोः अनुबन्धकृतमेव असारूप्यम् न तु अनुबन्धराहित्यकृतम्। अतः अत्र विकल्पेन बाधकत्वं न भवति अपितु नित्यबाधकत्वमेव। अत्र '**ददातिदधात्योर्विभाषा**' (3.1.139) इति सूत्रे विभाषाग्रहणं ज्ञापकम्।

सूत्रेणैतेन दाञो धाञश्च विभाषा 'श' प्रत्ययो भवति। णस्य अपवादः। यथा– ददः, दायः। दधः, धायः।

अत्र ज्ञापकं ददातिदधात्योर्विभाषा इत्यत्र णप्रत्ययबाधकस्य शप्रत्ययस्य विकल्पेन

विधानम्। अत्र ददातिदधात्योः आकारान्तधातुत्वेन **श्याद्व्यधास्रुसंस्र्वतीणव-सावह्वलिहश्लिषश्वसश्च** (3.1.141) इति सूत्रेण णप्रत्ययः सामान्यतया विहितः। एतत् विकल्पतया बाधित्वा पक्षे शप्रत्ययस्य सिद्धये ददातिदधात्योर्विभाषा इति परिभाषाग्रहणं कृतम् इति स्थितिः।

किन्तु अत्र ण–शप्रत्यययोः असारूप्यात् वाऽसरूपोऽस्त्रियाम् इति सूत्रेण स्वतः एव विकल्पेन बाधे सिद्धे तयोः विकल्पसिद्धये कृतं विभाषाग्रहणं व्यर्थम्। एवं व्यर्थं सद् विभाषाग्रहणं नानुबन्धकृतमसारूप्यम् इति परिभाषां ज्ञापयति।

अन्यत्र फलम्– गोदः, कम्बलदः इत्यादौ '**आतोऽनुपसर्गे कः**' इति (आकारान्तधातोः कर्मण्युपपदे कप्रत्ययेन) 'कर्मण्यण्' इति अणो नित्यं बाधसिद्धिः।

अस्त्रियाम् – सूत्रे पठिते अस्त्रियाम् इति पदेन विचार्यते यत् यदयं स्त्र्यधिकारः तृतीयाध्यायस्य '**स्त्रियां क्तिन्**' (3.3.94) इति सूत्रतो ग्रहीतव्यः अथवा चतुर्थाध्याये पठितः '**स्त्रियाम्**' (4.1.3) इति सूत्रात् ग्रहीतव्यः। अथ चापि चतुर्थाध्याये पठितस्य स्त्रियामिति सूत्रस्य अनुवृत्तिः अधिकसूत्रेषु प्रसृता भवति।

अत्र त्वैष निर्णयो यत् वासरूपोऽस्त्रियाम् इति सूत्रस्याधिकारः तृतीयाध्यायपरिसमाप्तेरेव वर्तते, अतः '**स्त्रियाम्**' इति पदस्य अधिकारोऽपि तृतीयाध्यायस्य तृतीयपादे पठितस्य '**स्त्रियां क्तिन्**' इति सूत्रादेव अधिकर्तव्यः। तदसौ अधिकारः '**स्त्रियां क्तिन्**' (3.3.112) इत्यारभ्य '**आक्रोशे नञ्यनिः**' इति सूत्रपर्यन्तं याति। तस्यैव अधिकारस्य अत्र ग्रहणम्। तेष्वष्टादशसूत्रेष्वेव अधिकारोऽयं प्रवर्तते। तत्र ह्यसरूपाः अपवादाः उत्सर्गान् नित्यमेव बाधन्ते न तु विकल्पेन।

**सूत्रादस्मात् नियमास्त्रयो ज्ञाताः–**

1. उत्सर्गप्रत्ययोऽपवादप्रत्ययश्च यदि अनुबन्धरहितो भूत्वा समानरूपो भवति तर्हि तत्र केवलः अपवादप्रत्यय एव प्रवर्तते अर्थात् सोऽपवादप्रत्ययः उत्सर्गप्रत्ययं नित्यमेव बाधते। यथा अण्–क प्रत्ययौ प्रदर्शितावेव।

2. यद्युत्सर्गप्रत्ययोऽपवादप्रत्ययश्च असरूपौ तर्हि तत्रापवादप्रत्ययः विकल्पेन प्रसज्यते पक्षे चोत्सर्गप्रत्ययोऽपि भवति। अतः उत्सर्गापवादानां सर्वेषां प्रत्ययानां रूपाणि सिद्ध्यन्ति। यथा– विक्षेपकः, विक्षेप्ता, विक्षिपः। उपरि तत् प्रदर्शितमेव।

3. एषा हि विकल्पप्रक्रिया '**स्त्रियां क्तिन्**' इति सूत्राधिकारे ये प्रत्ययाः विहिताः, तेषु न प्रसज्यते। तत्र नित्यापवादप्रसक्तेः एकमेव रूपं सिद्ध्यति। यथा 'चिकीर्षा' इति

प्रयोगे 'स्त्रियां क्तिन्' इति सूत्रेण क्तिन् विहितः तदपवादभूतश्च **अ प्रत्ययात्**[6] इति सूत्रेण अप्रत्ययोऽपि विहितः। अत्र तु पूर्ववत् अपवादः विकल्पेन बाधको न भवति अपितु उत्सर्गं नित्यमेव बाधते स्त्र्यधिकारे अतः 'चिकीर्षा, इत्यत्र अकारप्रत्ययः एव भवति। केवलं स्त्र्यधिकारे एव इयं परिभाषा न प्रवर्तते। किं तर्हि? अन्येष्वपि स्थलेषु यथा–

**1. ताच्छीलिकेषु वासरूपविधिर्नास्ति।**[7] ताच्छीलादिषु अर्थेषु 'आ क्वेस्तच्छील' (3.2.134) इत्यत आरभ्य भ्राजभास. (3.2.177) इति सूत्रं यावत्) इति तच्छीलादयः। तत्र ण्वुल्तृचौ इति ण्वुलोऽपवादः तृन् (3.2.135) सूत्रेण तृन् प्रत्ययो विधीयते। 'तृन् ण्वुलौ धात्वधिकारे स्तः असरूपावपि।' तेन हि वाऽसरूपोऽस्त्रियाम् इति नियमेन ण्वुलपि उत्सर्गभूतः पक्षे स्यात्, परञ्चाग्रे आचार्यः तृनः अपवादभूतं 'वुञ्' प्रत्ययं पठति। 'निन्दहिंसक्लिशखाद' (3.2.146) इति। किमर्थमेवमाचार्यः पठति? यतः यानि कार्याणि वुञि भविष्यन्ति, तानि ण्वुल्यपि भविष्यन्ति यानि रूपाणि ण्वुल्पक्षे सेत्स्यन्ति, तान्येव वुञ्पक्षेऽपि। केवलम् 'असूयकः' इत्येकमेव रूपं स्वरभेदत्वात् भिन्नं भवति 'ञ्नित्यादिर्नित्यम्' (6.1.197) इति सूत्रस्य प्रवृत्तेः। तदेवमेकस्य प्रयोगस्य कृते त्वाचार्यः सूत्रं न करिष्यतीति (नैकं प्रयोजनं सूत्रारम्भं प्रेरयतीति महाभाष्यकारः) तदेवं वुञ्विधानं व्यर्थं सत् ज्ञापयति इमां ज्ञापकसिद्धां परिभाषाम्– ताच्छीलिकेषु सर्व एव तृजादयो वाऽसरूपेण न भवन्ति। तेन ण्वुल् प्रत्ययो न प्राप्तः, वुञो विधानं च सार्थकमभूत्।

2. धात्वधिकारे हि सर्वत्र वासरूपोऽस्त्रियाम् इत्यनुवर्तते। तर्हि– हसितं हसनं वा छात्रस्य शोभनम् इति।

क्त - हसितम्।

ल्युट् - हसनम्।

क्तल्युट्प्रत्यययोर्विषये 'भावे' (3.3.18) इति सूत्रेण प्राप्तः घञ्प्रत्ययोऽपि स्यात्। इच्छति भोक्तुम् इत्यादौ 'इच्छार्थेषु लिङ्लोटौ' (3.3.157) इति सूत्रेण 'लिङ्लोटौ' अपि स्याताम्।

अथ चापि ईषत्पानः सोमो भवता इत्यत्र पानो ल्युट् स्थाने 'ईषदुःसुषु' (3.3.126) इति सूत्रेण खल् स्यात् इत्येवमादयः प्रत्ययाः असरूपोपसर्गत्वात् पक्षे प्राप्नुवन्ति। तदसौ अनिष्टप्रसङ्गः। तदेवं दोषमपाकर्तुं भवत्येषा परिभाषा –

**क्तल्युट्तुमुन्खलर्थेषु वासरूपविधिर्नास्ति।**[8]

क्त, ल्युट्, तुमुन्, खलर्थ इत्येतेषां प्रत्ययानां विषये सरूपा उत्सर्गभूताः प्रत्ययाः

पक्षे न भवन्ति तस्माद्धि हसितं, हसनम् इत्यादीनां प्रयोगाणां विषये घञादयः उत्सर्गप्रत्ययाः न भवन्ति। **अर्हे कृत्यतृचश्च** (3.3.169) इत्यत्र 'कृत्यतृच्' ग्रहणमस्य ज्ञापकम्, तथाहि अर्हे इत्येतस्मिन्नर्थे लिङेव विधेयः (अर्हे लिङ्) इत्येव वक्तव्यम्। वासरूपोऽस्त्रियाम् इति नियमेन लिङा सहैव असरूपत्वात् कृत्यतृचावपि भविष्यतः। अर्हेऽर्थे तत्पुनः कृत्यतृज्-ग्रहणं ज्ञापयति इमां परिभाषाम्– **क्तल्युट्तुमुन्खलर्थेषु वासरूपविधिर्नास्ति।** अत्र काशिकाकारः– अथ कस्माद् अर्हे कृत्यतृचो विधीयन्ते, यावता समासेन विहितत्वात् अर्हेऽपि भविष्यन्ति? योऽयमिह लिङ् विधीयते, तेन बाधा मा भूदिति। वासरूप-विधिश्चानित्यः।[9]

**3. लादेशेषु वासरूपविधिर्न भवति।**[10] '**हशश्वतोर्लङ् च**' (3.2.116) इति सूत्रेण भूतानद्यतनपरोक्षकाले लिङ्लिटौ विधीयेते। तत्र लङ्लिङादेशयोरसरूप-त्वादनन्तरेणैव वासरूपविधित्वात् स्वत एव लङ् समावेशः स्यात् एवं च सूत्रे लङ्ग्रहणं व्यर्थं भवति। तच्च व्यर्थीभूय ज्ञापयतीमां ज्ञापकसिद्धां परिभाषाम्– **लादेशेषु वासरूपविधिर्न भवति।** अर्थस्तु स्पष्ट एव। ततश्च लङ्ग्रहणं सार्थकं भवति। यदीयं परिभाषा न स्यात्तर्हि भिन्नलकाराणां स्थाने भिन्नाः एव लकारादेशाः स्युः येन हि इतरेतराश्रयदोषः समुद्भवेत्। लादेशेषु असरूपविधेरभावादेव '**लटः शतृशानचावप्रथमासमानाधिकरणे**' (3.2.124) इत्यस्मिन् सूत्रे '**नन्वोर्विभाषा**' (3.2.121) इत्यतः विभाषायाः अनुवृत्तिः मन्यते। यदि लादेशेष्वपि वासरूपविधिः स्यात् ततः लिङ्समावेशार्थं विभाषानुवृत्तिरपार्थिकी स्यादित्येवमाद्यनेकं प्रयोजनं बोद्धव्यमिति **महाभाष्यदिशा विवेचनम्– वासरूपोऽस्त्रियाम्।**

**आक्षेपः**– स्त्रियामभिधेयायां वासरूपविधिर्न भवतीति कथं ज्ञायते? अथवा स्त्रियामभिधेयायां इत्यभिप्रायः स्त्रीप्रत्ययेष्विति वर्तते? यतश्च स्त्रियामिति अभिधेयसप्तमी। स्त्रियामिति उच्चार्य ये प्रत्ययाः विधीयन्ते तेषु वासरूपो न भवतीति सन्दिहानः पृच्छति।

**समाधानम्**– प्रथमं यदिदमुच्यते स्त्रियामभिधेयायां वासरूपविधिर्न भवति इति मैवं यतश्च–

लव्य - यत्। (अचो यत् 3.1.97)

लवितव्या - तव्यत्। (तव्यत्तव्यानीयः 3.1.96)

स्त्रियां हि अभिधेयायां यत्तव्यतौ असरूपावपि सन्तौ विकल्पेन बाधकौ भवतः, अस्यायमाशयः यदिह वासरूपविधिः प्रवर्तते स्त्रियाम् अभिधेयायाम्।

अपरं यदिदमुच्यते सूत्रे पठितस्य 'अस्त्रियाम्' इत्यस्य अभिप्रायः स्त्रीप्रत्ययेषु वासरूपविधिर्न भवतीति तदप्ययुक्तम्, यतः–

व्यावक्रोशी - णच्। (कर्मव्यतिहारे णच् स्त्रियाम् 3.3.43)

व्यावक्रुष्टिः - क्तिन्। (स्त्रियां क्तिन् 3.3.94)

व्यावक्रोशी इत्यत्र हि कर्मव्यतिहारे गम्यमाने धातोः णच् प्रत्ययो भवति स्त्रीलिङ्गे। व्यावक्रुष्टिः इत्यत्र तु 'स्त्रियां क्तिन्' सूत्रेण क्तिन् प्रत्ययः।

उभावपि स्त्रीप्रत्ययौ यदिदं सूत्रेऽस्त्रियामिति पठ्यते तेन हि स्त्रीप्रत्ययेषु वासरूपविधिर्न भवतीति गम्यते चेत् अत्रापि णचा क्तिनो बाधः नित्यं प्राप्नोति तेन हि स्त्रीप्रत्ययेष्वपि वासरूपविधिः भवति।

तर्हि वासरूपोऽस्त्रियाम् इत्यत्र यदसौ अस्त्रियाम् इत्युच्यते नापि अस्यार्थः स्त्रियामभिधेयायां वासरूपविधिर्नास्ति इत्यस्ति अथ च स्त्रीप्रत्ययेषु अपि वासरूपविधिर्न भवति इत्यपि वर्तते। किं तर्हि? सिद्धान्तभाष्यम्– स्त्रीग्रहणं स्वरयिष्यते।[11] तत्र स्वरितेनाधिकारगतिर्भवतीति।[12] तेन हि स्त्रियामित्यधिकृत्य ये प्रत्ययाः विहितास्तेषां प्रतिषेधो विज्ञास्यते।

**प्रदीपकारस्तु– स्त्रियां क्तिन्** इत्यस्मिन् स्त्र्यधिकारे ये उत्सर्गापवादास्तेषु अपवादः उत्सर्गस्य नित्यमेव बाधकः सेत्स्यति, अन्यत्र धात्वधिकारे तु अपवादः उत्सर्गं विकल्पेन बाधिष्यते।[13]

**सूत्रप्रयोजनाधिकरणम्–** यदसौ असरूपस्य वा वचनं क्रियते। किमर्थं पुनरिदमुच्यते। तत्राह- असरूपस्य वावचनमुत्सर्गस्य बाधकविषयेऽनिवृत्त्यर्थम्।

असरूपस्य वा वचनं क्रियते। उत्सर्गस्य बाधकविषये अनिवृत्तिः यथा स्यादिति। तव्यत्तव्यानीयरः उत्सर्गाः तेषाम् अजन्ताद्यत् (अचो यत्) इत्यपवादः।

चेतव्यम् - तव्यत्।

चेयम् - यत्।

उभावपि यथा स्यातामिति असरूपस्य वावचनं क्रियते। नैतदस्ति प्रयोजनम्। अजन्ताद्यत् विधीयते। हलन्तात् ण्यत् विधीयते– 1. अचो यत्, 2. ऋहलोर्ण्यत्।

एतावन्तश्च धातवो अजन्ताश्च हलताश्च। तस्मात्तव्यदादयो वा वचनात् भविष्यन्ति। अथवा ण्वुल्तृचौ उत्सर्गौ पचादिभ्योऽजपि अपवादः।

पचतीति– पचः[14] पक्ता, पाचकः इत्यपि यथा स्यादिति। क्रियते असरूपस्य वा वचनम्।

एतदपि नास्ति प्रयोजनम्। वक्ष्यति– अजपि सर्वधातुभ्यो वक्तव्यः।[15] एवं तर्हि मन्तव्यम् ण्वुल्तृचौ च उत्सर्गाः। तेषामिगुपधज्ञाप्रीकिरः कः इति कोऽपवादः। विक्षिपः। विलिखः। विक्षेपकः। विक्षेप्ता इत्यपि यथा स्यात्। इति वा वचनप्रयोजनम्।

**असरूप इति किम्–** तत्राह कैयटः– असरूपशब्देन भिन्नरूप उच्यते।[16] तस्य च भिन्नरूपत्वं उत्सर्गापेक्षया भवतीति। रूपवन्तः प्रत्ययाश्च उत्सर्गापेक्षया अथवा अपवादरूपेण विकल्पेन बाधकाः भविष्यन्ति, किन्तु क्विबादीनां समावेशो न प्राप्नोति। सर्वापहारिलोपत्वात्। ग्रामणीः-ग्रामनायकः इति। न ह्येते रूपवन्तः क्विबादयः। उच्यते एतेऽपि रूपवन्तः। कस्यामवस्थायाम् उपदेशावस्थायाम्। प्रदीपकारस्तु आह–

**प्रत्यासत्तिन्यायादुपदेशावस्थायामसारूप्यमाश्रीयते।**[17]

यद्येवम्, उपदेशावस्थायाम् असारूप्यमाश्रीयते चेत् अनुबन्धभिन्नेषु विभाषाप्रसङ्गः प्राप्नोति।[18] '**कर्मण्यण्**' '**आतोऽनुपसर्गे कः**' इति वासरूपत्वात् क विषये अणपि प्राप्नोति। परिहरति त्विमं दोषम् अनुबन्धस्य अनेकान्तत्वात्। यतश्च परिभाषापि वर्तते अनेकान्ता अनुबन्धाः।[19]

उच्यते प्–ञ्–ङ्–क् इत्येवमादयोऽनुबन्धाः यैः धात्वादिभिः सह सम्बद्धाः संयुक्ता वा भवन्ति न ते तेषाम् एकान्ताः– अवयवाः मन्यन्ते। अपितु तेऽनुबन्धास्तेभ्यो धात्वादिभ्यः पृथगेव भवन्ति।

ननु च एकान्ता अपि अनुबन्धाः भवन्ति[20] (अवयवाः अपि मन्यन्ते यथा श् इत् यस्य शित्, कित् इत्येवमादयः।) अत्र महाभाष्यकारो ब्रूते– एकान्तेषु च न दोषः। आचार्यप्रवृत्तिर्ज्ञापयति– **नानुबन्धकृतमसारूप्य**मिति। यदयं ददातिदधात्योर्विभाषां शास्ति।

**शंका–** असरूपो वा बाधको भवतीति उच्यते। उपदेशे हि सर्वस्यैव असारूप्यं वर्तते इत्यतोऽसरूपग्रहणमनर्थकं स्यात्?

**समाधानत एवं विज्ञास्यामः–** क्वचिद्येऽसरूपा इति अनुबन्धभिन्नाश्च प्रयोगे सरूपाः। अथवा असरूपपदेन सारूप्यभाववान् उच्यते इत्याहुः।[21] इत्ययं वासरूपविधिः महाभाष्यदिशा शङ्कासमाधानसंवलितः प्रस्तुतः।

**निष्कर्षः–** एतस्मिन् धात्वधिकारे समानरूपा अपवादप्रत्ययाः उत्सर्गप्रत्ययानां विकल्पेन बाधका भवन्ति स्त्रियाः अधिकारं वर्जयित्वा। शास्त्रं तु द्विविधम्– उत्सर्गोऽपवादश्च।

सामान्यतया प्रवर्तक उत्सर्गः विशेषेण प्रवर्तकोऽपवादः। आरम्भत एव अयं नियमो विद्यते यदुत्सर्गसूत्रमपवादसूत्रं नित्यमेव बाधते। किन्त्वत्र उत्सर्गशास्त्रस्य अपवादसूत्रं विकल्पेन बाधकं भवति। अर्थात् उभयोः उत्सर्गापवादशास्त्रयोः प्रवृत्तिर्भवति। उत्सर्गशास्त्रविहिताः सामान्यप्रत्ययाः अपि भवन्ति अपवादशास्त्रविहिताश्च विशेषप्रत्यया अपि। अत्रेदं ध्येयं यदुत्सर्गापवादप्रत्यययोः रूपं समानं न स्यात्। समानरूपे सति उत्सर्गशास्त्रमपवादशास्त्रं नित्यमेव बाधते उभयोः प्रत्यययोः समानरूपे सति अपवादशास्त्रमुत्सर्गं नित्यमेव बाधते। सूत्रे चेदिदमस्त्रियामिति पठ्यते तेनेदं ज्ञायते यत् स्त्रियाम् इति सूत्राधिकारे विहितानां प्रत्ययानां सन्दर्भे अयं नियमो न प्रवर्तते।

*

## सन्दर्भाः


1. महाभाष्य–पस्पशाह्निकम्
2. परिभाषा सं., 39
3. परिभाषा सं., 51
4. काशिका, 3.2.94
5. परिभाषा सं. 8
6. प्रत्ययान्तेभ्यो धातुभ्यः स्त्रियामकारप्रत्ययो भवति। अ. 3.1.102
7. परिभाषा सं. 59
8. परिभाषा सं. 60
9. काशिका, 3.3.169
10. परिभाषा सं. 61
11. महाभाष्यम्, 3.1.94
12. स्वरितेनाधिकार, 1.3.11
13. महाभाष्यप्रदीपः, 3.1.94
14. पा. अष्टा., 3.1.134
15. पचादिशकृतिगः करोतेर्घटेश्चाच् प्रयोगात्। सिद्धान्तकौमुदी, 2892
16. महाभाष्यप्रदीपः, 3.1.94
17. तत्रैव-कैयटः
18. महाभाष्य, इष्टिः
19. परिभाषा सं., 4
20. परिभाषा सं., 5
21. उद्योते नागेश, 3.1.94
22. परिभाषा सं., 6


*

## किञ्चिद् रामायणीयम्

**लङ्कायाम् अशोकवनिकायां दुःखपरिक्लिष्टां सीतां वीक्ष्य हनुमतः सीताविषयिणी कीदृशी उदात्ता धारणा समुत्पन्ना?**

1. गुरुविनीतस्य लक्ष्मणस्य गुरुप्रिया मान्या सीता हि यदि दुःखार्ता, (तर्हि) **कालो हि दुरतिक्रमः।**

2. **राघववैदेह्योः दाम्पत्यस्य अनुपमता–**

तुल्यशीलवयोवृत्तां तुल्याभिजनलक्षणाम्।
राघवोऽर्हति वैदेहीं तं चेयमसितेक्षणा।। (सुन्दर. 16.5)

3. **सीतायाः तथाविधं वैशिष्ट्यम्–**

(क) अस्याः विशालाक्ष्याः हेतोः रामेण महाबलो वाली हतः, कबन्धः निपातितः, विराधश्च हतः। भीमकर्मणां रक्षसां चतुर्दशसहस्राणि जनस्थाने निहतानि, खरः निहतः, त्रिशिराश्च निपातितः, दूषणश्च हतः।

(ख) सुग्रीवः वानराणां वालिपालितं दुर्लभम् ऐश्वर्यं प्राप्तवान्।

(ग) मया (हनुमता) नदनदीपतिः श्रीमान् सागरः आक्रान्तः, लङ्कापुरी चेयं निरीक्षिता।

4. **सीतायाः कृते यदि रामः–**

समुद्रान्तां मेदिनीं जगच्चापि परिवर्तयेत् तर्हि तद् युक्तम् एव।

5. **सीतायाः इदमपि वैशिष्ट्यम्, असामान्यत्वं च–**

(क) इयं धर्मशीलस्य महात्मनः मैथिलराजस्य जनकस्य सुता, भर्तृदृढव्रता।

(ख) हलमुखक्षते क्षेत्रे मेदिनीं भित्त्वा (इयम्) उत्थिता।

(ग) विक्रान्तस्य आर्यशीलस्य संयुगेषु अनिवर्तिनः यशस्विनः राज्ञः दशरथस्य एषा ज्येष्ठा स्नुषा।

(घ) धर्मज्ञस्य कृतज्ञस्य विदितात्मनः रामस्य इयं सा दयिता भार्या (सम्प्रति राक्षसीवशमागता)।

(ङ) इयं भर्तृस्नेहबलात् सर्वान् भोगान् परित्यज्य कष्टानि अचिन्तयित्वा निर्जनं वनं प्रविष्टा।

(च) इयं फलमूलेन संतुष्टा, भर्तृशुश्रूषणे रता, वनेऽपि भवने यथा तथा परां प्रीतिं भजते।

**सेयं कनकवर्णाङ्गी नित्यं सुस्मितभाषिणी।**
**सहते यातनामेतामनर्थानामभागिनी।।** (सुन्दर. 16.21)

रामायणम्, सुन्दरकाण्डम्, 16 सर्गः

# आधुनिकसंस्कृतकाव्यशास्त्रे काव्यकारणमीमांसा

**डॉ. सर्वेशकुमारशाण्डिल्यः**

**'न काव्यार्थविरामोऽस्ति, यदि स्यात् प्रतिभागुणः'** (ध्वन्यालोकः 4/6) इति नवमशताब्द्याः कश्मीरवास्तव्यस्य आनन्दवर्धनाचार्यस्य विचारवैचित्र्येण प्रतिभागुणेन सहृदयानां चेतसि शब्दार्थयुगलरूपस्य चमत्कारकारिकाव्यरसानन्दस्य प्राप्तेः विरामो नास्ति। एतदेव वैलक्षण्यं प्रतिभाविशिष्टस्य काव्यस्य। संस्कृतवाङ्मये आचार्यराजशेखरेण **''पञ्चमी साहित्यविद्या इति यायावरीयः''** समुद्घोषिता। अस्यां विद्यायां कविः प्रजापतिरूपेण विराजते यः समग्रमपि विश्वं स्वकल्पनाशक्तिकौशलेन यथेच्छति तथा परिवर्तयति। यथोक्तम् अग्निपुराणे–

**अपारे काव्यसंसारे कविरेकः प्रजापतिः।**
**यथास्मै रोचते विश्वं तथेदं परिवर्तते।।**[1]

सा च नवनवोन्मेषशालिनी नवरसैः रुचिरा सृष्टिः, ब्रह्मणः दृश्यमानं जगतः भिन्ना विलक्षणा च प्रतीयते। एतदेव प्रावोचत् मम्मटाचार्यः काव्यप्रकाशे–

**नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतन्त्राम्।**
**नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयति।।**[2]

कवेः कर्म काव्यमिति। तस्य नियामकं शास्त्रं काव्यशास्त्रं संस्कृतभाषायामेव निबद्धं वर्तते। अस्माकं संस्कृतभाषा अखिलभारतीया अन्ताराष्ट्रिया च भाषाऽस्तीति। एतस्याः गुणगौरवं प्रायः समग्रमपि विश्वस्मिन् सर्वत्र संदृश्यते। भारतराष्ट्रस्य प्रत्येकस्मिन् जनपदे मण्डले राज्ये च संस्कृतभाषाविदः आचार्याः विद्वांसश्च अस्याः सेवायामुपरमन्ते। आवैदिककालादेव अद्यावधिं यावत् नवीनसम्भावनानां नवनवसिद्धान्तानां युगप्रवर्तकानामभिनव-विचाराणामुपन्यासः संस्कृतवाङ्मये प्रायः दृश्यते। आधुनिककाव्यशास्त्रे युगानुकूलस्य साहित्यस्य नियमनाय शास्त्रस्यापि विधानं गवेषणा च आचार्यैः क्रियते। आधुनिकसाहित्य-शास्त्रपरम्परायाम् एकोनविंशतिशताब्द्याः आरम्भाद् विविधाः विद्वांसः समभवन् भवन्ति

चेदानीम्। तैः स्वोपन्यासैः नवीनैः कलेवरैः विचारैश्च काव्यशास्त्रीयसिद्धान्ताः समुद्घाटिताः। काव्यशास्त्रीयोपस्थापनासु काव्यकारणस्य, काव्यप्रयोजनस्य, काव्यलक्षणस्य, काव्यात्म-प्रस्थानस्य, रसदोषगुणालङ्कारादीनाञ्च सन्दर्भाः विचार्यन्ते आचार्यैः। अस्मिन् शोधपत्रे प्राक्तनस्य काव्यशास्त्रस्यालोके आधुनिककाव्यशास्त्रे काव्यकारणस्य चिन्तनं विधास्यते।

हेतुशब्दस्यार्थो भवति कारणम्। काव्यस्य हेतुः अर्थात् क्रियते अनेनेति कारणं काव्यसर्जनस्याधारभूतं तत्त्वमिति। कस्मिंश्चिदपि मनुष्ये काव्यरचनायाः सामर्थ्यं जनयति तत् काव्यकारणं काव्यहेतुनाम्ना विधीयते। अत्राधुनिककाव्यशास्त्रिणां काव्यकारणस्य निरूपणात्पूर्वं प्राचीनानां संस्कृतकाव्यशास्त्रिणां दृष्ट्या काव्यस्य कारणमुपस्थाप्यते।

**आचार्यो भामहः–** शब्दार्थौ सहितौ काव्यमित्युक्तेः प्रकाशकस्याचार्यस्य भामहस्य चिन्तने गुरोः परामर्शात् जडचित्तोऽपि शास्त्राध्ययने सामर्थ्यं धारयितुमर्हति, परन्तु काव्यस्य रचना केवलं प्रतिभाशालिना एव कर्तुं शक्यते। यथा भामहस्य ग्रन्थे काव्यालङ्कारे–

**गुरूपदेशादध्येतुं शास्त्रं जडधियोऽप्यलम्।**
**काव्यं तु जायते जातु कस्यचित् प्रतिभावतः।।**[3]

अर्थाद् भामहः प्रतिभां काव्यस्य मुख्यकारणभूतं तत्त्वं स्वीकरोति, परन्तु अन्यस्मिन् श्लोके शब्दशास्त्रज्ञानानां सेवां शुश्रूषाञ्च विधाय कश्चित् शब्दं शब्दार्थञ्च ज्ञात्वा, अन्येषां कवीनां रचनानामध्ययनेन च काव्यं रचयितुं क्षमो भवितुं शक्नोति। यथा च–

**शब्दश्छन्दोऽभिधानार्था इतिहासाश्रयाः कथाः।**
**लोको युक्तिः कलाश्चेति मन्तव्या काव्यगैरमी।।**
**शब्दाभिधेये विज्ञाय कृत्वा तद्विदुपासनाम्।**
**विलोक्यान्यनिबन्धांश्च कार्यः काव्यक्रियापरः।।**[4]

**आचार्यो दण्डी –** काव्यादर्श इति काव्यशास्त्रीयग्रन्थे आचार्यो दण्डी प्रतिभाम्, अभ्यासं, जनव्यवहारञ्च काव्यस्य कारणानि स्वीकृतवान्। यथा उच्यते दण्डिना–

**नैसर्गिकी च प्रतिभा श्रुतञ्च बहुनिर्मलम्।**
**आनन्दश्चाभियोगोऽस्याः कारणं काव्यसम्पदः।।**[5]

अर्थात् नैसर्गिकी प्रतिभा, शुद्धशास्त्रज्ञानं, विस्तृताभ्यासश्च काव्यसम्पदः कारणानि भवन्ति। स्वाभाविकी प्रतिभा इत्यनेन शब्देन सहजप्रतिभा इत्यर्थो गृह्यते, यः ईश्वरानुग्रहेण प्रदत्तो व्यापारः। एषा प्रतिभा अभ्यासेन लब्धुं न शक्यते। प्रतिभायाः अभावे निरन्तराभ्यासेन,

शास्त्रज्ञानेन च निम्नगुणवत्तापूर्णस्यैव काव्यस्य रचनायां सामर्थ्यमायाति।

**आचार्यो वामनः –** अतः परं काव्यालङ्कारसूत्रनाम्नि ग्रन्थे वामनाचार्यः प्रतिभां सहजगुणं जन्मजातगुणञ्चानुमन्य काव्यसर्जनायाः मुख्यं कारणं स्वीकृतवान्। आचार्यदृशा– **'कवित्वस्य बीजं प्रतिभानम्'**[6] इति। वामनः लोकव्यवहारं, शास्त्रज्ञानं, शब्दकोशादिकञ्च काव्यप्रेरणायां स्थानं ददाति। अन्यत्र काव्यप्रयोजनेषु प्रतिभां काव्यबीजं स्वीकरोति, या जन्मजन्मान्तराणां संस्कारवशात् कविषु शक्तिरूपेण अन्तर्निहिता भवति। **'लोको विद्या प्रकीर्णञ्च काव्याङ्गानि'**[7] इति धिया अभियोगेन, वृद्धानां सेवया, अवेक्षणेन, अवधानेन चेत्यादिभिरेवोत्तमकाव्यस्य निर्माणं सम्भवति। काव्यादर्शे वामनः प्रकीर्णभागस्यान्तर्गतं षट् तत्त्वान्यपि समाविष्टवान्। तद्यथा– लक्ष्यज्ञता (काव्यपरिचयः), अभियोगः (काव्यरचनायाः अभ्यासः), वृद्धानां सेवा (गुरोर्महत्त्वम्), अवेक्षणम् (समुचितः शब्दप्रयोगः), प्रतिभानम्, अवधानम् (मनसः एकाग्रता) चेति।[8]

**आचार्यः रुद्रटः –** काव्यालङ्कारनामके ग्रन्थे आचार्यः प्रतिभां व्युत्पत्तिम्, अभ्यासञ्च काव्यहेतुरूपेण स्वीकरोति। तन्मते प्रतिभा द्विविधा भवति– 1. सहजा शक्तिः 2. उत्पाद्या शक्तिश्चेति।[9]

अथ च आद्या सहजा शक्तिः जन्मना प्रतिभारूपेण तिष्ठति। अपरा उत्पाद्या शक्तिः उत्पत्तिद्वारा अर्थाद् व्युत्पत्ति–अभ्यासयोः माध्यमेन कालान्तरे समुत्पद्यते। प्रतिभां विहाय ते लोकव्यवहारस्य, शास्त्रस्य, शब्दकोशस्येत्यादीनां ज्ञानमपि काव्यप्रयोजनेषु स्थानं ददातीति।

**आचार्यो मम्मटः –** काव्यशास्त्रस्य सर्वमान्ये अन्यतमे स्वरचिते काव्यप्रकाशनामके ग्रन्थे आचार्यो मम्मटः काव्यहेतून् कारिकायां प्रोद्घाटयामास। यथा–

**शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात्।**
**काव्यज्ञशिक्षयाऽभ्यास इति हेतुस्तदुद्भवे॥**[10]

अर्थात् शक्तिनिपुणताभ्यासेषु कारणेषु यथा शक्तिः (प्रतिभा), लोकव्यवहारशास्त्र-काव्यादीनां पर्यालोचनेन समुत्पन्ना व्युत्पत्तिः, अथ च काव्यस्य रचनाशैली, तस्य काव्यस्य गुणदोषज्ञानां कवीनां शिक्षानुसारमभ्यासश्चेत्येतानि काव्ये त्रीणि कारणानीति आचार्यः। त्रयोऽप्येते हेतवः समुदितास्समष्टिरूपेण एकीभूताः वर्तन्ते, अर्थात् काव्यनिर्माणे हेतुरूपास्सन्ति। सा शक्तिः काव्यस्य बीजसंस्कृतिरूपेण शोभते। यथा– **''शक्तिः कवित्वस्य बीजरूपः संस्कारविशेषः, यां विना काव्यं न प्रसरेत्, प्रसृतं वा उपहसनीयं स्यात्।''**[11]

**पण्डितराजो जगन्नाथः—** काव्यकारणसन्दर्भे पण्डितराजोपाधिविभूषितेन सप्तदश-शताब्द्याः आचार्येण जगन्नाथेन उक्तम् – '**तस्य च करणं कविगता केवला प्रतिभा। सा च काव्यघटनानुकूल—शब्दार्थोपस्थितिः।**'[12] अर्थात् प्रतिभेति काव्यस्यान्यतमं कारणतत्त्वमिति। अतः परं चान्येषां पारम्परिकाणाम् प्रतिभादीनां त्रयाणामपि काव्यकारणानां पृथग्रूपेण स्वरूपं परिभाषा च विचार्यते।

**प्रतिभा—** प्रतिभा इति काव्याधारशक्तिर्या मनुष्याय काव्यरचने सामर्थ्यं प्रददाति। आचार्यराजशेखरेण एकमेव काव्यकारणं प्रतिभा इति प्रोक्तमन्यानि कारणानि प्रतिभायामेव अन्तर्जातानि। तद्यथा – '**सा शक्तिः केवला काव्यहेतुरिति।** सा प्रतिभा कारयित्री भावयित्री चैतेन रूपेण अनेनैन वर्गीकृता। अतः परम् आचार्यभट्टलोल्लटस्य दृशा प्रतिभा सा प्रज्ञा अस्ति या अभिनवान् विचारान् जनयति। यथा– '**प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा।**' आचार्यो अभिनवगुप्तः प्रतिभायाः परिभाषां प्रदाय प्रोक्तवान्– '**प्रतिभा अपूर्ववस्तुनिर्माणक्षमा प्रज्ञा।**' अर्थात् प्रतिभैव तद् अपूर्वं वस्तु यत् कारणकलां विना प्रथयति। तादृशं चमत्कारकारिकाव्यं निर्मीयते कविना। वक्रोक्तिसम्प्रदायस्य प्रवर्तकः आचार्यकुन्तकः प्रतिभां शब्दार्थयोः अद्वितीयसौन्दर्यस्य निर्माणं कुर्वतीं शक्तिं स्वीकरोति यया प्रतिभया अनेकविधा अलङ्काराः उक्तिवैचित्र्यादयो विधीयन्ते।

एवम्प्रकारेण पारम्परिकाणां काव्यशास्त्रिणां विचारान् विमृश्य निष्कर्षरूपेण वक्तुं शक्यते यत् प्रतिभा एव काव्यस्य मूलम्। एषा प्रतिभा परमेश्वरेण प्रदत्ता काचन शक्तिः। सा च प्रतिभा द्विविधा भवति। आद्या कारयित्री प्रतिभा, तस्याः कौशलेन एव कविः काव्यं विरचयति। अथ च भावयित्र्याः प्रतिभायाः प्रभावेण पाठकः काव्यमवगच्छति। एवमेव सहृदयहृदयाह्लादकारकस्य काव्यस्य रसास्वादं करोति, अलौकिकस्य अपूर्ववस्तुसौन्दर्यस्य च आनन्दमनुभवति।

**व्युत्पत्तिः—** व्युत्पत्तेश्शाब्दिकोऽर्थो भवति निपुणता, पाण्डित्यं विद्वत्ता वा। ज्ञानस्योपलब्धिरपि व्युत्पत्तिनाम्ना ज्ञायते। संस्कृतकाव्यशास्त्रिभिः काव्यकारणेषु व्युत्पत्तेः द्वितीयं स्थानं निर्धार्यते। शास्त्रनैपुण्यस्य आधारेण व्यक्तिः एतन्निर्णयं कर्तुं समर्थो भवति यत् कस्मिन् स्थाने कश्शब्दः प्रयुज्यते। एवम्प्रकारेण प्रतिभा व्युत्पत्तिश्च समवेतरूपेण काव्यस्य कारणं प्रतीयेते। अनेन हेतुना उचितानुचितधर्मविवेकोत्पत्तिरपि संदृश्यते।

**अभ्यासः—** प्राक्तनानामाचार्याणामुपस्थापनेन काव्यनिर्माणस्य तृतीयो हेतुः अभ्यासो दृश्यते। आचार्यभामहेनोपस्थापितं यत् शब्दार्थयोः स्वरूपस्य ज्ञानं कृत्वा अनारतमभ्यासेन काव्यमुपासितव्यम्।

अन्येषां कवीनां महाकवीनाञ्च कर्तृत्वस्याध्ययनमावश्यकम्। आचार्यवामनेन अभ्यासस्य महत्त्वस्य विषये उदीरितं यत् **'अभ्यासेन हि कर्मसु कौशलं भवतीति।** आचार्यो दण्डी प्रतिभायाः अभावे अभ्यासवशाद् निम्नगुणवत्तापूर्णस्य काव्यस्य निर्माणं सम्भवतीति व्यनक्ति।

एवम्प्रकारेण इदानीं प्राचीनानां काव्यशास्त्रिणां काव्यकारणविवेचनस्य निरूपणानन्तरमाधुनिकसंस्कृतकाव्यशास्त्रिभिः समुद्घोषितस्य विमृष्टस्य वा काव्यकारणतत्त्वस्य सन्दर्भे सोदाहरणैः चर्चा विधास्यते। वस्तुतः इतोऽप्यनेके आधुनिकसंस्कृतकाव्यशास्त्रस्य सम्पोषकाः आचार्याः वरीवृत्यन्ते। तेषु आचार्येषु यैः काव्यकारणविषये स्वग्रन्थे किमपि प्रतिपादितम् इदानीं तावकान् नवनवान् विचारान् अत्रोपस्थापयितुं प्रयत्यते।

**आचार्यरेवाप्रसादो द्विवेदी 'सनातनकविः'–** काश्याः साहित्यपरम्परायां शिरोमणयः आधुनिकसंस्कृतकाव्यशास्त्रे सनातनकविनाम्ना अत्यन्तं विश्रुतो महामहोपाध्यायः आचार्यरेवाप्रसादद्विवेदी वर्तते। तस्य कविकौशलनिकषे काव्यालङ्कारकारिकानाम्नि कारिकाग्रन्थेऽस्मिन् नवनवस्पन्दवती शास्त्रचिन्तना निरर्गलमेव प्रधावति। अत्रैव समेषामेव काव्यधर्माणां वाचकस्यैकस्यालङ्कारतत्त्वस्य काव्यात्मतत्त्वरूपेण **'अलं ब्रह्म'** इति नाम्ना प्रतिष्ठापयामास आचार्यः। एतेन आचार्यचरणेन प्रतिभाविशेषः मुख्यं काव्यकारणमङ्गीकृतम्। तच्च प्रतिभाविशेषं कारणं काव्यघटनानुकूलशब्दार्थोपस्थितिरिव तादृशमर्थस्य प्रतिभासनं वर्तते, मेघमालायां विद्युतः प्रतीतिरिव। तत् प्रतिभास्वरूपं यथा नारदादिकृपापात्राणां चित्रे प्रथमतया प्रकटितं परमेश्वरेण। अथ च समाधेः अवस्थायां योगिनां हृदये विषयेष्वन्विता ज्योतिष्मती प्रवृत्तिः तस्याः प्रतिभायाः स्वसृरूपेण उपस्थापिता सनातनकविना। एवमेव काव्यहेतुरूपायाः प्रतिभायाः स्वयम्भूः सहेतुश्चेति द्वौ भेदौ प्रकटितौ तयोः सविस्तरेण कारिकासु व्याख्याभागः समुपस्थापितः। तदेवम्प्रकारेण काव्यालङ्कारकारिकायाम्–

**कारणं प्रतिभा काव्ये सा चार्थप्रतिभासनम्।**
**प्रज्ञाकादम्बिनीगर्भे विद्युदुद्द्योत–सोदरम्।।**
**नारदादिकृपापात्र–चेतो धातौ जगत्प्रभोः।**
**प्रथमं स्वस्वरूपस्य दर्शनं यत्तदीदृशम्।।**
**समाधौ योगलग्नानां हृदये विषयान्विताः।**
**ज्यातिष्मती प्रवृत्तिर्या तत्स्वसा प्रतिभा कवेः।।**
**स्वयम्भूश्च सहेतुश्चेत्यसौ लोके द्विधा स्थिता।**

**आदिमादिकवौ दृष्टा द्वितीयान्यत्र दृश्यते॥**
**द्वितीया या भवन्त्यत्र कारणानि बहून्यपि।**
**कारणं तु भवत्यत्र सत्त्वोद्रेको हि केवलः॥**
**रजस्तमोऽनुवेधानां संख्यातीता तु या स्थितिः।**
**उद्रेकोऽप्यनया सोऽयमतिवैचित्र्यमश्नुते॥**
**एकस्यापि कवेः काव्यप्रबन्धे येन दृश्यते।**
**बन्धभेदो मधूद्याने वृक्षश्री-भेदसोदरः॥**
**ततश्च प्रतिभाभेदोऽप्येकस्मिन्नपि दृश्यते।**
**कवौ किं विद्युदुद्द्योतः स्यात्सदैवैकसौभगः॥**
**उपादानं निमित्तञ्च काव्याय प्रतिभैव सा।**
**द्वितयं गर्भमात्रे यत् तस्यास्तिष्ठति तत् सदा॥**[13]

**डॉ. शङ्करदेव अवतरे –** शक्ति–निपुणताभ्यासानामेतेषां त्रयाणां तत्त्वानामविभाज्य–संयोगेन समुद्भूतां प्रतिभाम् आचार्यः डॉ. शङ्करदेव अवतरे काव्यसृष्टेः एकमात्रं कारणसाधनमङ्गीचकार। यथा ब्रह्मा अनासक्तरूपेण जडचेतनोभयात्मकरूपप्रकृतेः अन्तः प्रविष्टो निहितश्च तिष्ठति, तथैव कवेः प्रतिभारूपं तत्त्वं जडचेतनप्रकृतेः अन्तर्यात्रां प्रतिपादयति। अतः सा प्रतिभा कवित्वस्य चैतन्यस्वभावान्तर्गतो निर्जीवरूपः इति आचार्यः। यथा अभिनवकाव्यशास्त्रे–

**काव्ये त्रित्वान्वयी हेतुः प्रतिभानामकः कवेः।**
**प्रकृत्यन्तः प्रवेशार्होऽप्यसक्तस्येव वेधसः॥**[14]

**आचार्यो ब्रह्मानन्दशर्मा–** काव्यसत्यालोके आचार्येण ब्रह्मानन्दशर्मणा शक्तिः श्रमश्च काव्यस्य हेतुतत्त्वं मन्यते। तन्मते काव्यरचनायां शक्तिः अर्थात् प्रतिभा प्राधान्यं धारयति, श्रमोऽपि सहायकरूपेण चोपयोगिरूपेण तिष्ठति। यथोच्यते–

**शक्तिः श्रमश्च काव्यस्य, करणमिति मे मतिः।**
**शक्तिरत्र प्रधाना स्यात् श्रमस्याप्युपयोगिता॥**[15]

अर्थादत्र प्रतिभया सह श्रमरूपे सा व्युत्पत्तिः अथ च सोऽभ्यासः काव्यस्य साधनतत्त्वेषु संदृश्यते।

**डॉ. रमाशंकरतिवारी**– अतः परम् आधुनिकसंस्कृतकाव्यशास्त्रिषु विंशतिशताब्द्याः

डॉ. तिवारीमहोदयेन प्रतिभामेकमात्रमेव काव्यकारणं स्वीकृत्य व्युत्पत्तेः अभ्यासस्य च काव्यस्य कारणत्वेन महत्त्वं सर्वथा अस्वीकृतम्। तन्मते व्युत्पत्तिरभ्यासश्च उभौ प्रतिभाया उपकारकौ प्रकीर्तितौ स्वस्य चतुर्विंशतिपरिच्छेदात्मके काव्यतत्त्वविवेकनाम्नि ग्रन्थे। यथा–

**ननु व्युत्पत्तिः ह्यभ्यासो न हेतुः।**
**प्रतिभाया उपकारकौ काव्यरचने।**[16]

**आचार्यराधावल्लभत्रिपाठी–** आधुनिककाव्यशास्त्रिणा त्रिपाठिमहोदयेन अभिनवकाव्यालङ्कारसूत्रे जागरिकप्रतिभां किमपि नवीनं तत्त्वं काव्यस्य कारणं मन्यते। तद्दृशा कविस्वभाव एव तस्य प्रतिभा। एषः कवेस्स्वभावः त्रिविधो भवति– सुकुमारः, विचित्रः, उभयात्मकश्च। यथा अभिनवकाव्यालङ्कारसूत्रे– **जागरिता प्रतिभा तस्य करणम्।**[17]

अतः परं आचार्यत्रिपाठिना पण्डितराजस्य मतमिव प्रतिभायाः जागरणं काव्यघटनानुकूलशब्दार्थयोः उपस्थितिरूपं प्रोद्घाट्यते। यथा स्वोपज्ञरचनायां काव्यघटनानुकूलशब्दार्थोपस्थितिर्जागरणम्। अतः परम् आचार्यदृशा एतज्जागरणं गुर्वादेशेन, लोकशास्त्र–काव्याद्यवेक्षणेन, काव्याभ्यासेन, काव्यगोष्ठीभिः, सहृदयानां मित्राणां सङ्गतिभिश्चेत्यादिभिः हेतुभिरेव सम्भवति। अथ च आचार्यत्रिपाठी परमकाव्यशास्त्रिणा मम्मटाचार्येण निरूपितां समुदितकारणतां केवलं विदग्धतायाः पाण्डित्यस्य च प्रदर्शनमेव स्वीकरोति।

**आचार्योऽभिराजराजेन्द्रमिश्रः –** आधुनिकसाहित्यशास्त्रे त्रिवेणिकविनाम्ना अत्यन्तं विख्यात आचार्यः अभिराजराजेन्द्रमिश्रः काव्यकारणस्य सन्दर्भे वदति यत् कवितायाः बीजं शक्तिस्वरूपा चिरन्तनी प्रज्ञा एव अस्ति। या नूनमेवात्यन्तं निर्मला बहुजन्मनः संस्कारेभ्यः समुत्सृज्यते समुत्पद्यते च। यथा मृत्तिका–जल–वायूनां सन्निधौ अपि पृथिव्यां बीजारोपणं विना अङ्कुरणं न सम्भवति, तथैव कविः काव्यप्रतिभायाः अभावे काव्यं रचयितुं समर्थो न भवति। अर्थात् काव्यविरचनसामर्थ्ये बीजरूपं प्रतिभाकारणमेव। तद्यथा सविस्तरेण अभिराजयशोभूषणे–

**प्रज्ञाबीजं कवित्वस्य, शक्तिरूपा चिरन्तनी।**
**जन्मजन्मान्तरोपात्त–संस्कारप्रसवाऽमला।।**
**मृत्तिकाजलवायूनां सद्भावेऽपि यथाङ्कुरः।**
**बीजेऽसति धरागर्भे नैव जातु प्ररोहति।।**

**तथैवाऽचरितेऽभ्यासे भूयो भूयोप्यनारतम्।**
**लब्धेऽपि शास्त्रपाण्डित्ये शतशाखेऽतिविस्तृते॥**
**प्रज्ञां विना कवित्वस्य बीजं नैव प्ररोहति।**
**सत्यमेतद् दृषद्रेखाकल्पमूह्यं मनीषिभिः॥**[१९]

**आचार्यरहसबिहारी द्विवेदी –** आचार्यः काव्यशास्त्रीये नव्यकाव्यतत्त्वमीमांसानाम्नि ग्रन्थे काव्यकारणस्य वर्णनं कुर्वन् प्रकाशयति यत् प्रतिभायुक्तस्य काव्यस्य अनुकूलशब्दार्थानां उपस्थितिः, लोकशास्त्रेषु प्रवीणता, साहित्यज्ञानञ्च काव्यरचनायाः कारणानि इति संदृश्यते। तद्यथाऽऽह आचार्यः–

**काव्योपयोगिशब्दार्थोपस्थितिः प्रतिभामयी।**
**नैपुण्यं लोकशास्त्राणां विद्याज्ञानं च कारणम्॥**[२०]

**प्रो. अमरनाथपाण्डेयः –** काव्यसिद्धान्तग्रन्थस्य प्रणेता प्रो. अमरनाथपाण्डेयः अपि काव्ये प्रतिभामधिकं महत्त्वं प्रदत्तवान्। रचनायाः मङ्गलाचरणस्यारम्भिकेषु पञ्चसु श्लोकेषु प्रतिभायाः विस्तारार्थं शिव–शक्ति–देवी–सरस्वतीनां देवतानां प्रार्थना क्रियते आचार्येण। अतः परम् अन्यत्र काव्यकारणसन्दर्भे आचार्येण किमपि नोच्यते ग्रन्थे। तदेवम्प्रकारेण आद्या मङ्गलाचरणकारिका–

**शिवं स्तुवानां सुषमां दधाना, नवार्थरीतिञ्च सदाश्नुवाना।**
**परप्रकाशैः सुभगैर्विलासैर्देवी, हितं मे प्रतिभां तनोतु॥**[२१]

**प्रो. रामप्रतापो वेदालङ्कारः –** एवमेव प्रो. वेदालङ्कारः अन्ये इव शक्तिं कौशलमभ्यासञ्चैव काव्यस्य हेतुभूततत्त्वं स्वीचकार। एतस्य काव्यशास्त्रिणो मते कविः केवलं तिसृभिः शक्तिभिरेव चमत्कारिकाव्यस्य निर्माणं करोति। सा नवनवोन्मेषशालिनी प्रतिभा एवं स्फुरणात्मिका भवति या चमत्कारकारिकाव्यं सर्जयति। प्रतिभागुणसम्पन्नस्य कवेः काव्यार्थे विरामो न भवति तथैव प्रतिभायाः अभावेऽपि काव्यस्य सृष्टिर्न कल्प्यते। शक्तिजन्यचमत्कारेण सर्वे काव्यार्थाः कार्यान्विता भवन्ति। एतेन चमत्कारेणैव काव्यं काव्यपदवाच्यं भवति। शक्तिव्युत्पत्त्यभावे च विनियोजिताः शब्दाः प्रक्लिष्टार्थकाः भवन्ति। विदग्धाः तत्काव्यं न रचयन्ति। व्युत्पत्त्यभावे समुत्पद्यमानाः दोषाः प्रतिभाशक्त्या न प्रतीयन्ते। परं शक्त्यभावे उत्पन्नाः दोषाः अचिरमेव स्पष्टतया दृष्टिपथमायान्ति। प्रतिभायाः संस्पर्शेन व्युत्पत्त्यभ्यासं विना कृता शब्दलीला शब्दार्थयोः व्यापारो वा निष्प्रयोजनो व्यर्थ एव। कवेः सामर्थ्याद् उत्पद्यमानं कौतुकगन्धयुक्तं चमत्कारसमाकीर्णं काव्यं कस्मै

रुचिकरं न प्रतीयते अर्थात् समेषां कृते रुचिपूर्णं भवति तादृशं काव्यम्। आचार्यो वेदालङ्कारः प्रतिभागुणहीनं जनम् ''अकविः'' अथ च प्रतिभायुक्तं रचनाकारं ''महाकविः'' इति नाम्ना समुद्घोषयति। एतदेव समुद्घोषयति चमत्कारविचारचर्चायाम्–

**प्रज्ञा सा प्रतिभा प्रोक्ता नवोन्मेषणशालिनी।**
**या स्फुरणात्मिकी भूत्वा व्यनक्ति तां चमत्कृतिम्॥**
**न काव्यार्थविरामोऽस्ति यदि स्यात् प्रतिभागुणः।**
**तदभावे च न भूयात्काव्यनिर्माणसम्भवः॥**
**शक्तिजाच्च चमत्कारात् सर्वोऽप्यर्थः प्रवर्तते।**
**एतत्सम्पर्कमासाद्य काव्यं काव्यमुदीर्यते॥**
**शक्तिव्युत्पत्त्यभावे यच्छब्दानां विनियोजनम्।**
**प्रक्लिष्टार्थकमेतन्न काव्यं सूरिभिरुच्यते॥**
**अव्युत्पत्तिमवादोषः शक्त्यै वान्रियते कवेः।**
**किन्त्वशक्तिकृतो दोषः शीघ्रमेव प्रतीयते॥**
**व्युत्पत्त्यभ्यासवैयर्थ्यं को लाभश्शब्दलीलया।**
**काव्ये यदि मनाङ् नास्ति प्रतिभा सा चमत्करी॥**[22]

**आचार्यहर्षदेवमाधवः –** स्वोपज्ञे काव्यशास्त्रीयग्रन्थे वागेश्वरीकण्ठसूत्रे आचार्यहर्षदेवमाधवः काव्यस्य कारणतत्त्वं स्पन्दनशीलां जीवत्प्रतिभां स्वीकृतवान्। सर्वे लौकिकाः सांसारिकाः मानवाः रमणीयपदार्थान् संदृश्य, हृदयाह्लादकारिशब्दान् संश्रुत्य हृदये किमपि अनुभवन्ति। भगवत्याः निदर्शनप्राप्तप्रतिभया कविः स्पन्दनानि समनुभूय शब्दान् काव्यरूपेण व्यञ्जयति। कविः मैत्र्यादिवासनाभिः संस्पन्दीभूय मुदितायाः अंशेन परहृदयेषु विद्यमानानां मैत्र्यादिवासनानां स्वकीयवासना इव अनुभवति। यथा वागेश्वरीकण्ठसूत्रे स्पन्दशीला प्रतिभा तस्य कारणम्।[23]

एवम्प्रकारेण वक्तुं शक्नुमः यत् प्राक्तनानां साहित्यशास्त्राचार्यैरिव आधुनिक-काव्यशास्त्राचार्यैरपि स्वप्रतिभाप्रकाशेन कौशलेन च काव्यकारणचिन्तने प्रतिभाव्युत्पत्त्यभ्यासानां पर्याप्तरूपेण पर्यालोचनं समीक्षणं क्वचित् समर्थनं क्वचिदभिनवं मौलिकं चिन्तनं नवीनं काव्यकारणतत्त्वं सिद्धान्तभूतं तथ्यं वा समुद्घाट्य काव्यशास्त्रीयपरम्परायां समुपस्थापितमस्ति।

*

**सन्दर्भाः**


1. अग्निपुराणम्/ध्वन्यालोकवृत्तिः 03
2. काव्यप्रकाशः 1.1
3. काव्यालङ्कारः, भामहः 1.14
4. काव्यालङ्कारः, भामहः 1.9–10
5. काव्यादर्शः, दण्डी 1.103
6. काव्यालङ्कारसूत्रम्, वामनः, प्रथमाधिकरणम्, तृतीयोध्यायः 16
7. काव्यालङ्कारसूत्रम्, वामनः, प्रथमाधिकरणम्, तृतीयोध्यायः 01
8. काव्यालङ्कारसूत्रम्, वामनः, प्रथमाधिकरणम्, तृतीयोध्यायः 11
9. काव्यालङ्कारः, रुद्रटः
10. काव्यप्रकाशः 1.3
11. काव्यप्रकाशः 1/3 वृत्तिः
12. रसगङ्गाधरः, प्रथमाननम्, पृ. 26
13. काव्यालङ्कारकारिका, कारिका 2–10
14. अभिनवकाव्यशास्त्रम्, पृ.48
15. काव्यसत्यालोकः 5.68
16. काव्यतत्त्वविवेकः 1.9
17. अभिनवकाव्यालङ्कारसूत्रम्, 1.3.1
18. अभिनवकाव्यालङ्कारसूत्रम्, 1.3.1 वृत्तिः
19. अभिराजयशोभूषणम्, पृ. 36–37
20. नव्यकाव्यतत्त्वमीमांसा
21. काव्यसिद्धान्तः, कारिका 01


*

# जैनदर्शने प्रमाणलक्षणविवेचनम्

**श्रावणी मण्डलः**
**शशांकशेखरपात्रश्च**

**विषयसारः**

जगत्यस्मिन् सर्वं प्रमेयात्मकं वस्तु 'मानाधीना मेयसिद्धिः' इति नियमात्प्रमाणेन सिद्ध्यति। जैनमते सम्यग्ज्ञानं यथा स्वप्रकाशात्प्रमा तथैव परस्य प्रकाशात्प्रमाणमपि भवति। यथा दीपकः स्वयं प्रकाशकस्तथा चान्येषां वस्तूनामपि प्रकाशको भवति। जैनमते सम्यग्ज्ञानं पञ्चविधं मतिश्रुतावधिमनःपर्यायकेवलभेदैः। एतानि ज्ञानानि प्रत्यक्षपरोक्षाभ्यां द्वाभ्यां प्रमाणाभ्यां विभक्तानि भवन्ति। जैनमते प्रमाणलक्षणविप्रतिपत्तिविषये ज्ञानमेव प्रमाणम्। जैनेतरदर्शनेषु ज्ञानस्य करणमेव प्रमाणं भवति। प्रमाणसंख्याविप्रतिपत्तिविषये जैनमते प्रमाणं द्विविधं प्रत्यक्षं परोक्षञ्चेति। परन्तु जैनेतरदर्शनेषु प्रमाणमेकम्, द्विविधम्, त्रिविधम्, चतुर्विधमित्यादीनि भवन्ति। यद्वा भवतु जैनमते पञ्चविधेषु ज्ञानेषु मतिश्रुते परोक्षप्रमाणे, अवधिमनःपर्यायकेवलानि प्रत्यक्षप्रमाणानि भवन्ति। ''**जैनदर्शने प्रमाणलक्षण-विवेचनमि**''ति शीर्षके जैनदर्शनसम्मतप्रमाप्रमाणयोः मध्ये सम्बन्धः, प्रमाणलक्षणम्, विभाग इत्येते विषया आलोच्यन्ते।

**कूटशब्दाः**

सम्यग्ज्ञानम्, प्रमा, प्रमाणम्, प्रत्यक्षम्, परोक्षमित्येते शब्दाः।

**उपोद्घातः**

भारतीयदर्शनमास्तिकनास्तिकभेदाभ्यां द्विधा विभज्यते। यैः दर्शनैः वेदप्रामाण्यं स्वीकृतं तान्यास्तिकदर्शनानि, यैः दर्शनैः वेदप्रामाण्यं न स्वीकृतं तानि नास्तिकदर्शनानि। नास्तिकदर्शनेषु जैनदर्शनमन्यतमम्। जैनदर्शनमाध्यात्मिकदर्शनमागमपरकञ्च भवति। जैनदार्शनिकैः मोक्षलाभार्थं दण्डचक्रन्यायेन मिलितभावेन रत्नत्रयमुपदिष्टम्। रत्नत्रयेषु सम्यग्ज्ञानमन्यतमं साधनं भवति। किं तावत्सम्यग्ज्ञानस्वरूपमित्याकाङ्क्षायामुच्यते यदस्मिन् जगति यद्वस्तु यादृशप्रकारकं भवति तद्वस्तुनः तादृशप्रकारकं मिथ्यासंशयरहितञ्च ज्ञानमेव

सम्यग्ज्ञानम्।[1] माधवाचार्येण सर्वदर्शनसंग्रहे आर्हतदर्शने उच्यते–

**यथावस्थिततत्त्वानां संक्षेपाद्विस्तरेण वा।**
**योऽवबोधस्तत्राहुः सम्यग्ज्ञानं मनीषिणः॥[2]**

जैनमते ज्ञानमिदमादौ द्विविधं भवति परोक्षज्ञानम्, प्रत्यक्षज्ञानञ्चेति। प्रत्यक्षज्ञानन्तु त्रिविधम् अवधिज्ञानम्, मनः पर्यायज्ञानम्, केवलज्ञानञ्चेति। परोक्षज्ञानं खलु द्विविधं मतिज्ञानम्, श्रुतज्ञानञ्चेति। इत्थं सम्यग्ज्ञानं पञ्चविधं मतिश्रुतावधिमनःपर्यायकेवलभेदेन।[3] जैनमते केवलं मनः पर्यायज्ञानं केवलज्ञानञ्च सम्यग्ज्ञानं भवति। परन्तु अनयोः ज्ञानयोः मध्ये केवलज्ञानं हि मोक्षस्य कारणं भवति। ज्ञानमिदं खलु प्रमापदेनाभिहितम्। मिथ्याज्ञानन्त्वप्रमापदेनाभिहितम्।[4] जैनमते सम्यग्ज्ञानमेव प्रमा प्रमाणञ्च भवति। तदुच्यते तत्त्वार्थसूत्रकारेण ''तत्प्रमाणे।''[5] ''यत्तदोः नित्यसम्बन्धः'' इति न्यायेन तच्छब्दः यच्छब्दसापेक्षः भवति। यदित्यनेन ''मतिश्रुतावधिमनःपर्यायकेवलानि ज्ञानम्'' इति पूर्वस्मात् सूत्रात् ज्ञानमिति पदस्याध्याहारेण ''सर्वनाम्नां प्रधानपरामर्शित्वमि''ति न्यायेन यन्मतिश्रुतावधिमनःपर्यायकेवलरूपं ज्ञानं तदेव प्रमाणमित्यर्थः प्राप्यते। जैनमते पदार्थस्य धारणा एव ज्ञानम्। ज्ञानं चैतन्यस्य स्वाभाविकधर्मः। प्रतिबन्धकाभावे चैतन्यो यथा स्वयं तथा अन्यान् प्रकाशयति।

**जैनदर्शने प्रमाणलक्षणम्**

भारतीयदर्शने सर्वैः दार्शनिकैः प्रमाणं खलु प्रमायाः करणरूपेण स्वीकृतम्। परन्तु तस्याः करणविषये दार्शनिकेषु वैमत्यं दृश्यते। जैनदर्शने प्रमायाः करणं प्रमाणमिति प्रमाणलक्षणं यद्यपि स्वीकृतम्, तथापि तस्य करणविषये वैमत्यं दृश्यते। जैनमते प्रमाणं तद्भवति यत् स्वयं प्रकाशकमन्येषामपि प्रकाशकारणम्।[6] जैनमते वस्तूनां ज्ञाने नैयायिकस्वीकृतानामिन्द्रियादीनामज्ञानात्मकत्वादचेतनत्वाच्च तानि इन्द्रियादीनि प्रमाणानि भवितुं नार्हन्ति।[7] जैनमते वस्तुना सहेन्द्रियस्य सन्निकर्षादनन्तरमपि ज्ञानं नोत्पद्यते। यथा घटेन सह यदा चक्षुः संयुज्यते तदा आकाशादिभिरपि संयुज्यते, परन्तु तत्र घटज्ञानं जायते न त्वाकाशज्ञानम्। यथा दीपकः गृहाभ्यन्तरे सर्वेषां पदार्थानां प्रकाशकत्वेन साधकतमो भवति तथैव व्यवधानरहितत्वेन सर्वेषां विषयाणां प्रकाशकत्वाज्ज्ञानमपि साधकतमं भवति। अतो ज्ञानं प्रमाणं भवति न त्विन्द्रियादि।[8] अपि चेन्द्रियार्थसन्निकर्षो यदि प्रमाणरूपेण स्वीक्रियते तर्हि प्रमातुः निकटस्थितेन वस्तुना सह तेन चक्षुरिन्द्रियसंयोगेन वस्तुज्ञानं जायते, परन्तु दूरस्थितेन वस्तुना सह संयोगाभावाज्ज्ञानं भवितुं नार्हति। परन्तु यः सर्वज्ञः सः त्रिकालज्ञः, तस्य सूक्ष्मान्तरितविप्रकृष्टरूपाणां सर्वेषां विषयाणां ज्ञानं भवति। जैनमते ज्ञानं यथा अतीन्द्रियं तथैव इन्द्रियग्राह्यमपि भवति। अतीन्द्रियज्ञानं सन्निकर्षाभावेनापि

जायते। अतः सकलपदार्थज्ञानजनकाभावात्सन्निकर्षः प्रमाणं भवितुं नार्हति।[9] जैनमते चक्षुरिन्द्रियं प्रमाणं न भवितुमर्हति तस्याप्राप्यकारित्वात्।[10] न्यायमते इन्द्रियाणि स्वविषयेण सम्बद्धानि सन्ति विषयान्प्रापयन्ति, अर्थाद्विषयस्य प्रत्यक्षं जनयन्ति। अत इन्द्रियादीनि सम्बद्धानि सन्ति प्राप्यकारकाणि च भवन्ति। परन्तु जैनमते चक्षुरिन्द्रियादि स्वविषयेण सह सम्बन्धं विना तद्विषयस्य प्रत्यक्षं जनयति। अतः चक्षुरिन्द्रियमप्राप्यकारकं भवति। चक्षुरिन्द्रियस्याप्राप्यकारित्वात्सन्निकर्षाभावात्सन्निकर्षस्य प्रमाणत्वं न सिद्धम्। अतो जैनदार्शनिकैः ज्ञानमेव प्रमाणं नत्विन्द्रियादि इति उद्घोषितम्।

जैननये ज्ञानमेव प्रमाणमिति मतं स्वीकृत्य व्यवहारिकप्रयोजनसिद्ध्यर्थं 'लक्षण-प्रमाणाभ्यां हि वस्तुसिद्धि'रिति नियमाज्जैनदार्शनिकैः बहूनि प्रमाणलक्षणानि प्रस्तुतानि। तानि लक्षणानि सम्यग् विमृश्य यानि प्रमाणलक्षणपरकवैशिष्ट्यानि समागतानि तेषां विश्लेषणैः प्रमाणस्वरूपं निर्णीयते।

### स्वपरप्रकाशकत्वम्

जैननये आदावेव समन्तभद्राचार्येण कथितं यज्ज्ञानं स्वस्य प्रकाशकं तथा परस्य प्रकाशकं भवति तज्ज्ञानमेव प्रमाणम्।[11] लक्षणघटकस्य 'स्वपर' इत्यस्य 'स्व' इति पदस्यार्थ आत्मा अर्थाज्ज्ञानम्, पर इति पदस्यार्थः स्व इत्यस्मादन्यः अर्थाज्ज्ञेयपदार्थ इति।[12] सिद्धसेनदिवाकरेणोक्तं यद्बाधरहितमर्थात्संशयविपर्ययानध्यवसायरहितं ज्ञानं स्वस्य तथा परस्य प्रकाशकं भवति तत्प्रमाणम्। [13]यथा दीपकः सूर्यो वा स्वस्य प्रकाशकस्तथा जगतः प्रकाशको भवति।[14] जैनमते स्वपरप्रकाशकत्वं खलु ज्ञानस्य साधारणधर्मः।[15] नैयायिकमते ज्ञानं बाह्यार्थं प्रकाशयति न तु स्वयं प्रकाशितं भवति। जैनमते ज्ञानं यदि स्वस्य प्रकाशकं न स्यात्तर्हि परस्य प्रकाशकमपि न भवितुमर्हति। अतो ज्ञानस्य स्वपरप्रकाशकधर्मः स्वीकर्तव्यः।[16]

### अविसंवादकत्वम्

भट्टाकलङ्कदेवेनोक्तं यदविसंवादि ज्ञानं खलु प्रमाणम्।[17] अकलङ्कदेवेन प्रणीते प्रमाणलक्षणेऽस्मिन् बौद्धदार्शनिकधर्मकीर्तेः प्रभावः परिलक्ष्यते। धर्मकीर्तिरपि अविसंवादकं ज्ञानमेव प्रमाणमिति वदति।[18] परन्तु भट्टाकलङ्केन लक्षणघटकस्याविसंवादकमिति पदस्य व्याख्यानं द्विविधं कृतम्। एकं प्रमाणान्तरेणाबाधितं ज्ञानमविसंवादकम्।[19] अपरञ्च संशयविपर्ययानध्यवसायरहितं निश्चयात्मकं ज्ञानमविसंवादकम्।[20] ज्ञानं यदि निर्णयात्मकं न भवेत्तर्हि तन्न अविसंवादकम्। अविसंवादराहतं ज्ञानं न प्रमाणम्। यथा तिमिररोगेण

पीडितस्य जनस्य द्विचन्द्रज्ञाने चन्द्रज्ञानमविसंवादकत्वात्प्रमाणं परन्तु चन्द्रस्य द्वित्वसंख्याज्ञानमविसंवादकाभावादप्रमाणम्।[21]

## अपूर्वार्थग्राहकत्वम्

भट्टाकलङ्कदेवमतेऽनधिगतार्थस्य ज्ञानस्य कारणं खल्वविसंवादकं ज्ञानं भवति। तज्ज्ञानमेव प्रमाणम्।[22] माणिक्यनन्दिना उक्तमपूर्वार्थस्य ज्ञानमेव प्रमाणम्। तेन अत्रापूर्वमिति पदेनानधिगतार्थज्ञानं स्वीकृतम्।[23] प्रमाणलक्षणेऽपूर्वमनधिगतं वेति विशेषणपदद्वयस्य प्रयोगे जैनदार्शनिकेषु मतवैषम्यं परिलक्ष्यते। यतो हि केचन अनेन पदेन गृहीतग्राहिधारावाहिकज्ञाने प्रमाणलक्षणं निरस्यन्ति। जैनदर्शने शाखाभेदेन श्वेताम्बरमतं दिगम्बरमतञ्च वर्तते। दिगम्बरदार्शनिकाः सिद्धसेनदिवाकरप्रमुखाः स्मृतिज्ञानस्य धारावाहिकज्ञानस्य च प्रामाण्यं न स्वीकुर्वन्ति। अतस्तैः लक्षणे अपूर्वमिति पदं प्रयुक्तम्। परन्तु श्वेताम्बरदार्शनिकाः भट्टाकलङ्कविद्यानन्दप्रमुखाः स्मृतिज्ञानस्य धारावाहिकज्ञानस्य च प्रामाण्यं स्वीकुर्वन्ति। अतस्तैरपूर्वमिति पदं प्रमाणलक्षणे न प्रयुक्तम्। जैनदार्शनिको विद्यानन्दो वदति ज्ञानं गृहीतग्राहि अगृहीतग्राहि यदेव भवतु, परं यदि भवेत् स्वपरप्रकाशकं स्यात्तर्हि तत्प्रमाणम्।[24] प्रभाचन्द्रनामको जैनदार्शनिकः प्रमाणलक्षणविषये किञ्चिदपूर्वार्थग्राहित्वं स्वीकरोति। तस्य मते यदि सर्वदा प्रमाणं खल्वपूर्वार्थग्राहित्वं स्यात्तर्हि प्रमाणस्याप्रामाण्यं भवेत्। तस्य मते प्रमाणस्य प्रामाण्यं संवादज्ञानेन भवति। संवादज्ञानं खलु प्रमाणान्तरेणाधिगतार्थज्ञानम्। इत्थमनधिगतार्थगन्तृज्ञानं प्रमाणमिति प्रमाणलक्षणं क्रियते चेत्तर्हि संवादज्ञानमप्रमाणं स्यात्। अप्रमाणभूतसंवादज्ञानेन प्रथमप्रमाणस्य प्रामाण्यं व्यवस्थापयितुं न शक्यते। अतस्तेन लक्षणेऽनधिगतमिति पदस्य प्रयोजनं प्रत्याख्यातम्। [25]अपि च तेनोक्तं प्रमाणं यद्यपूर्वार्थग्राहि स्यात्तर्हि द्विचन्द्रादिज्ञानमपि प्रमाणं स्यादनधिगतार्थग्राहिज्ञानत्वात्।[26] अतस्तेन किञ्चिदपूर्वार्थग्राहित्वं स्वीकृतम्।

प्रभाचन्द्रः गृहीतग्राहिज्ञानस्यापि प्रामाण्यं स्वीकरोति। स दृष्टान्तरूपेण प्रत्यभिज्ञानरूपं ज्ञानमुपस्थापयति। तस्य मते प्रत्यभिज्ञानं खलु पूर्वानुभूतज्ञानम्। यतो हि स्मृतिप्रत्यक्षाभ्यां प्रत्यभिज्ञानमुत्पद्यते। यथा यदा कश्चित्पुरुषः पूर्वमन्यत्र दृष्टः, पुनरन्यत्र दृश्यते तत्र सोऽयमिति यज्ज्ञानं तदेव प्रत्यभिज्ञानम्। यथा सोऽयं देवदत्त इत्यत्र स इति पदेन पूर्वानुभूतं स्मृतिज्ञानं तथा अयमिति पदेन इन्द्रियार्थसन्निकर्षजन्यं देवदत्तस्य चाक्षुषज्ञानं बोध्यते। अतो गृहीतग्राहि ज्ञानं यदि प्रमाणं न स्यात्तर्हि प्रत्यभिज्ञानमप्रमाणं स्यात्। यदि प्रत्यभिज्ञानं प्रमाणं न स्यात्तर्हि आत्मादीनां नित्यत्वमसिद्धं भवेत्।[27]

प्रभाचन्द्रेण पुनः अपूर्वार्थग्राहिणो ज्ञानस्यापि प्रामाण्यं क्वचित् क्वचित् स्वीकृतं

विशिष्टप्रमायाः जनकत्वात्। प्रथमे कमपि विषयं यथार्थरूपेण ज्ञात्वा पुनस्तस्य ज्ञाने विशिष्टप्रमा स्वीक्रियते। तस्य मते प्रथमज्ञाने वस्तुनिश्चयो भवति। द्वितीयज्ञाने वस्तुनः सुखादेः साधकत्वं ज्ञायते। अतस्तस्य मते एकस्य वस्तुनः ज्ञाने आगमानुमानप्रत्यक्षप्रमाणानां कथञ्चिद्विशेषप्रतिपत्तिवशतस्तस्य ज्ञानस्य प्रामाण्यं निश्चितं भवति।[28] अतः अनेन स्पष्टं भवति यत्प्रभाचन्द्रमते प्रमाणस्य कृते सर्वदा अगृहीतार्थज्ञानं नावश्यकम्, गृहीतग्राहिज्ञानमपि प्रमाणमिति।[29]

**व्यवसायात्मकत्वम्**

जैनमते यद्व्यवसायात्मकं ज्ञानं स्वपरप्रकाशकं भवति तत्प्रमाणम्। व्यवसायात्मकज्ञानमित्यस्यार्थः निश्चयात्मकज्ञानम्। हेमचन्द्राचार्येण संशयानध्यवसाययोः ज्ञानयोः अप्रमाणभूतयोः स्वप्रकाशकत्वं स्वीकृतम्। अतस्तेन प्रमाणलक्षणे स्व इति पदं वर्जयित्वा अर्थस्य निश्चयात्मकं ज्ञानमेव प्रमाणमुक्तम्।[30] लक्षणघटकेन निर्णय इति पदेन अर्थज्ञाने संशयानध्यवसायाविकल्पकानां ज्ञानानां निराकरणं कृतं तथा सम्यग् इत्यनेन विपर्ययज्ञानस्य निराकरणं कृतम्।[31] अपि च तेन गृहीतग्राहिणो ज्ञानस्यापि प्रामाण्यं स्वीकृतम्। अतो लक्षणेऽनधिगतग्राहित्वमिति पदस्य प्रयोजनं भट्टाकलङ्कदेवेन स्वस्य अर्थस्य च प्रकाशसाधनं प्रत्याख्यातम्।[32] यन्निश्चयात्मकं ज्ञानं तदेव प्रमाणम्।[33] अत्रोल्लेखनीयं यत्प्रत्यक्षज्ञानं द्विविधं निर्विकल्पकसविकल्पकभेदेन। यस्मिन् ज्ञाने किमपि विशेषणं स्यात्तन्निर्विकल्पकम्। यथा बालमूकादीनां ज्ञानम्। विशेषणयुक्तज्ञानं सविकल्पकम्। यथा ब्राह्मणोऽयम्। नैयायिकैः निर्विकल्पकज्ञानस्य प्रमाणत्वं स्वीकृतम्। जैनदार्शनिकैः व्यवसायात्मक इति पदेन सविकल्पकस्य प्रमाणत्वं स्वीकृतं तथा निर्विकल्पकस्य प्रमाणत्वं निराकृतमव्यवसायात्मकत्वादिति तात्पर्यम्। न्यायमते प्रमाणं खलु सफलप्रवृत्तेः जनकं भवति। परन्तु जैनानां वक्तव्यं यन्निर्विकल्पकस्य निश्चयात्मकत्वाभावाद् व्यवहारसाधकत्वाच्चाविसंवादकं न भवति। अपि च ज्ञानेनानेन निश्चयात्मकत्वाभावाद्धेयादीनां निर्णयो न जायते। अतो निर्विकल्पकं ज्ञानं न प्रमाणम्।[34] जैनदर्शने ज्ञानस्य पर्यायवाचकरूपेण दर्शनमिति पदमुल्लिखितम्। ज्ञानदर्शने आत्मनः गुणौ स्तः। तत्र दर्शनं निर्विकल्पकं निराकारञ्च, ज्ञानं सविकल्पकं साकारञ्च भवति। परन्तु तेन निर्विकल्पकं ज्ञानं प्रमाणत्वेन नाङ्गीकृतम्।

**प्रमाणविभागः** प्रमाणं द्विविधं परोक्षं प्रत्यक्षञ्चेति।[35] इन्द्रियस्य मनसश्च साहाय्येन जायमानं ज्ञानं हि परोक्षप्रमाणम्।[36] ज्ञानपञ्चके मतिश्रुतज्ञानं परोक्षप्रमाणम्। यद्यपि भगवता उमास्वातिवाचकाचार्येण परोक्षप्रमाणे मतिज्ञानस्यान्तर्भावः स्वीकृतः, परन्तु तत्परवर्तिनि काले जैनदार्शनिकैः अकलङ्कदेवप्रमुखैः लोकव्यवहाराद् इन्द्रियमनसाभ्यां जन्यस्य मतिज्ञानस्य

परिगणनं प्रत्यक्षप्रमाणे कृतम्। अपि चेन्द्रियस्य मनसश्च साहाय्यं विना जायमानं ज्ञानं प्रत्यक्षप्रमाणम्।[37] प्रत्यक्षप्रमाणं द्विविधं सांव्यवहारिकं पारमार्थिकञ्चेति।[38] संव्यवहारो बाधारहितप्रवृत्तिनिवृत्ती प्रयोजनमस्येति सांव्यवहारिकम्। यथा अस्मदादिप्रत्यक्षम्। बाह्येन्द्रियसामग्रीसापेक्षरहितं पारमार्थिकम्। पारमार्थिकस्य नामान्तरं मुख्यम्। अत्र केवलमात्मसन्निधिमात्रमपेक्षते। यथा अवध्यादिप्रत्यक्षम्।[39] भट्टाकलङ्केन मुख्य-प्रत्यक्षेऽवधिज्ञानं परिगण्यते।

**उपसंहृतिः**

जैनदर्शने सम्यग्ज्ञानमेव यथा प्रमा तथैव प्रमाणं भवति। जैनेतरदर्शने यथा प्रमाप्रमाणयोर्मध्ये सम्बन्धो वर्तते जैनदर्शने तादृशः सम्बन्धो न वर्तते। यथा न्यायदर्शने प्रमायाः करणं प्रमाणमिति नियमानुसारं प्रमा खलु कार्यम्, तस्याः करणं खलु प्रमाणं भवति। इत्थं प्रमाप्रमाणयोर्मध्ये कार्यकारणसम्बन्धरूपभेदः परिलक्ष्यते। परन्तु जैनदर्शने प्रमाप्रमाणयोर्मध्ये अभेदसम्बन्धः स्वीक्रियते। जैनदर्शने संशयविपर्ययादिरहितसम्यग्ज्ञानं यथा प्रमा तथा प्रमाणमपि भवति।

*

**सन्दर्भाः**

1. येन येन प्रकारेण जीवादयः पदार्था व्यवस्थिता वर्तन्ते तेन तेन प्रकारेण मोहसंशयविपर्ययरहितं परिज्ञानं सम्यग्ज्ञानम्। त. वृ. 1.1
2. स.द.स. पृ. 119
3 मतिश्रुताऽवधिमनःपर्यायकेवलानि ज्ञानम्। त.सू. 1.9
4 त.वा. 1.39
5. त.सू. 9.90
6. प्रमिणोति प्रमीयतेऽनेन प्रमितिमात्रं वा प्रमाणम्। स. सि. 1.10
7. नैव सन्निकर्षादिरज्ञानस्य प्रामाण्यमुपपन्नं तस्यार्थान्तरस्यैव स्वार्थव्यवसितौ साधकतमत्वानुपपत्तेः। प्र. न.त. 1.4
8. न चैतत्सन्निकर्षादौ सम्भवति। तदभावेऽपि क्वचित्प्रमित्यनुत्पत्तेः; न हि चक्षुषो घटवदाकाशे संयोगे विद्यमानेऽपि प्रमित्युत्पादकः। प्र.क.मा. पृ. 41

9. यदि सन्निकर्षः प्रमाणम्, सूक्ष्मव्यवहृतविप्रकृष्टानामर्थानामग्रहणप्रसङ्गः। न हि ते इन्द्रियैः सन्निकृष्यन्ते। अतः सर्वज्ञत्वाभावः स्यात्। स. सि. 1.10

10. सर्वेन्द्रियसन्निकर्षाभावश्च चक्षुर्मनसोः प्राप्यकारित्वाभावात्। सि. सि. 1.10

11. स्वपराभासकं यथा प्रमाणं भुवि बुद्धिलक्षणम्। स्व. स्तो. 63

12. ज्ञानादन्योऽर्थः परः। प्र.न.त. 1.14

13. प्रमाणं स्वपराभासि ज्ञानं बाधविवर्जितम्। न्या.व. 1

14. ज्ञानस्य धर्मोऽयं तावत् स्वपरप्रकाशकत्वं प्रदीपवत्। नि.सा.ता. वृ.151

15. यत्पुनः स्वपरप्रकाशकत्वं न भवति न तज्ज्ञानम्। प्र.क. मा. पृ.336

16. यथा घटीदानां प्रकाशने प्रदीपो हेतुः स्वस्वरूपप्रकाशनेऽपि स एव न प्रकाशान्तरं मृग्यं तथा प्रमाणमपीति अवश्यं चैतदभ्युपगन्तव्यम्। स. सि.1.10

17. अविसंवादकं प्रमाणम्। ल. स्त्र. वृ. 22

18. प्रमाणमविसंवादि ज्ञानम्। प्र.वा. 1.6

19. प्रमाणान्तराबाधनं पूर्वापराऽविरोधश्चाविसंवादः। ल.त्र.वृ.

20. अविसंवादकत्वञ्च निर्णयायत्तम्। तदभावेऽभावात् तद्भावे च भावात्। ल. त्र. वृ. 60

21. यद्यथैवाविसंवादि प्रमाणं तत्तथा मतम्। तिमिराद्युपप्लवज्ञानं चन्द्रादावविसंवादकं प्रमाणं यथा तत्संख्यादौ विसंवादकत्वादप्रमाणं प्रमाणेतरव्यवस्थायाः तल्लक्षणत्वात्। ल.त्र.वृ.

22. प्रमाणमविसंवादिज्ञानमनधिगतार्थाधिगमलक्षणत्वात्। अ.श. पृ. 174

23. स्वापूर्वार्थव्यवसायात्मकं ज्ञानं प्रमाणम्। प.मु.1.1

24. तत्त्वार्थव्यवसायात्मज्ञानं मानमितीयता।
लक्षणेन गतार्थत्वात्, व्यर्थमन्यद्विशेषणम्।। त. श्लो. वा. 1.10.77

25. न चानधिगतार्थाधिगन्तुरेव प्रामाण्ये संवादप्रत्ययस्य तद् घटते। न च तेनाप्रमाणभूतेन प्रथमस्य प्रामाण्यं व्यवस्थापयितुं शक्यम्; अतिप्रसङ्गात्। प्र.क. मा. 5

26. किञ्च, अपूर्वार्थप्रत्ययस्य प्रामाण्ये द्विचन्द्रादिप्रत्ययोऽपि प्रमाणं स्यात्। तदेव।

27. प्रत्यभिज्ञानस्यानुभूतार्थग्राहिणोऽप्रामाण्यप्रसङ्गात्, तथा च कथमतः शब्दात्मादेर्नित्यत्व-सिद्धिः? न चानुभूतार्थग्राहित्वमस्यासिद्धम्; स्मृतिप्रत्यक्षप्रतिपन्नेऽर्थे तत्प्रवृत्तेः। न ह्यप्रत्यक्षेऽस्मर्यमाणे चार्थप्रत्यभिज्ञानं नाम, अतिप्रसङ्गात्। तदेव।

28.केषाञ्चित्सकृद्दर्शनेऽपितन्निश्चयोभवति अभ्यासादिति एकविषयाणामप्यागमानुमानाध्यक्षाणां प्रामाण्यमुपपन्नं प्रतिपत्तिविशेषसद्भावात्; सामान्याकारेण हिवचनात्प्रतीयते वह्निः, अनुमानाद्देशादिविशेषविशिष्टः, अध्यक्षात्तारनियतः। प्र.क.मा 1.5

29. तत्रापूर्वार्थविज्ञाननिश्चितं बाधवर्जितम्।
अदुष्टकारणारब्धप्रमाणं लोकसम्मतम्। प्र.क.मा.

30. सम्यगर्थनिर्णयः प्रमाणम्। स्वनिर्णयः सन्नप्यलक्षणम्, अप्रमाणेऽपि भावात्। प्र.मा. 1.1.2

31. तत्र निर्णयः संशयानध्यवसायाविकल्पकत्वरहितं ज्ञानम्। प्र.मी.वृ. 1.1.2

32. ग्रहीष्यमाणग्राहिण इव गृहीतग्राहिणोऽपि नाप्रामाण्यम्। प्र.मी. 1.1.4

33. व्यवसायात्मकं ज्ञानमात्मार्तग्राहकं मतम्।
ग्रहणं निर्णयस्तेन मुख्यं प्रामाण्यमश्नुते। ल.स्त्र. 60

34. ननु अविकल्पकं सुखादिनीलादिनिर्भासिज्ञानमविसंवादकम्, न च तदविसंवादकम्, अपि तु विकल्पमेव व्यवसायात्मकत्वात्। तदविसंवादिनः प्रत्यक्षस्य निर्विकल्पकत्वे क्षणक्षयादिवत्साधनान्तरमपेक्षते अनिश्चयादिति। सि.वि.नि.टी. पृ.108

35. प्रत्यक्षं परोक्षञ्च। प्र.मी. 1.10

36. परोक्षमितरत्। प्र.र.मा. 3.1

37. विशदः प्रत्यक्षम् । प्र.मी. 1.13

38. तद्द्विप्रकारं सांव्यवहारिकं पारमार्थिकञ्चेति। प्र.न.त. 2.5

39. तत्र सांव्यवहारिकमिन्द्रियानिन्द्रियप्रत्यक्षम्। मुख्यमतीन्द्रियज्ञानम्। ल.त्र.वृ.4

*

# न्यायदर्शने जीवशरीरनिरूपणम्

**किंकरदासः**

सामान्यतः भारतीयदर्शनशास्त्रवत् न्यायशास्त्रमपि मोक्षशास्त्रम्। मनुष्यः कथं जीवनस्य परमार्थं मोक्षं लब्ध्वा दुःखात् मुक्तो भवितुमर्हति इत्येव भारतीयदर्शनस्य मुख्यः आलोच्यविषयः। न्यायदर्शने प्रमाणादीनां षोडशपदार्थानां तत्त्वज्ञानेन निःश्रेयसलाभो भवतीति प्रोक्तम्। द्वादशप्रमेयेषु आत्मनः परमेव शरीरस्य स्थानम्। शरीरमेव आत्मनो भोगायतनं सुखदुःखाधिष्ठानं वा। यतो हि शरीराभावे आत्मनि सुखदुःखोपभोगो न भवति। शरीरावच्छेदेनैव आत्मनि सुखदुःखयोः मानसप्रत्यक्षं जायते। तस्मात् जीवस्य शरीरमेव सुखदुःखयोः तदनुभवस्य च अवच्छेदकम्। तत्त्वज्ञानेन जीवः मनसः देहस्य च बन्धनं छित्त्वा निःश्रेयसं प्राप्तुं शक्नोति। तस्मात् न्यायदर्शने जीवशरीरस्य माहात्म्यम् अपरिसीमं वर्तते। अनयैव माहात्म्योपलब्ध्या जीवशरीरस्य तत्त्वनिर्णयस्य अयं प्रयासः।

न्यायदर्शनविदः शरीरशब्दस्य व्युत्पत्तिनिर्णयद्वारा जीवशरीरस्य स्वरूपं निर्णेतुं चेष्टामकुर्वन्। शृ धातोः अर्थः शीर्णीभावः। ईरणप्रत्ययः कर्मार्थे प्रयुक्तः। शरीरम् = शृ + ईरण = यः शीर्यते इति। यत् शीर्णं भवति क्षयं वा प्राप्नोति तदेव शरीरम्। प्राधान्येन स्थूलदेहार्थे शरीरशब्दस्य प्रयोगो भवति। भोक्तृवर्गे स्थूलदेह एव सर्वापेक्षया शीघ्रं क्षयं प्राप्नोति अल्पकालं वा तिष्ठति। भोगो नाम सुखदुःखसाक्षात्कारः। तस्मात् शरीराश्रितस्य इन्द्रियस्य सुखदुःखोत्पादकत्वात् इदं स्वीकर्तव्यं यत् शरीरावच्छिन्ने आत्मन्येव सुखदुःखोत्पत्तिर्भवति। तस्मादेव अन्नम्भट्टः शरीरलक्षणमाह– '**आत्मनो भोगायतनं शरीरम्। यदवच्छिन्नात्मनि भोगो जायते तत् भोगायतनम्। सुखदुःखान्यतर-साक्षात्कारो भोगः**'[1] इति। अर्थात् आत्मनो भोगायतनं भवति शरीरम्।

महर्षिगौतमः तस्य न्यायसूत्रग्रन्थस्य प्रथमसूत्रे आह– '**प्रमाण–प्रमेय–संशय–प्रयोजन–दृष्टान्त–सिद्धान्तावयव–तर्क–निर्णय–वाद–जल्प–वितण्डा–हेत्वाभास–च्छल–जाति–निग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः**'[2] इति।

अर्थात् 1. प्रमाणम्, 2. प्रमेयम्, 3. संशयः, 4. प्रयोजनम्, 5. दृष्टान्तः, 6. सिद्धान्तः, 7. अवयवः, 8. तर्कः, 9. निर्णयः, 10. वादः, 11. जल्पः, 12. वितण्डा, 13. हेत्वाभासः, 14. छलम्, 15. जातिः, 16. निग्रहस्थानम् – एतेषां षोडशपदार्थानां तत्त्वज्ञानेन निःश्रेयसलाभो भवति। एतेषु षोडशपदार्थेषु द्वितीयस्तावत् प्रमेयपदार्थः। महर्षिणा गौतमेन प्रमेयपदार्थः द्वादशविध इत्युक्तम्– '**आत्म–शरीरेन्द्रियार्थ–बुद्धि–मनः–प्रवृत्ति–दोष–प्रेत्यभाव–फल–दुःखापवर्गास्तु प्रमेयम्**'[3] इति। अर्थात् 1. आत्मा, 2. शरीरम्, 3. इन्द्रियम्, 4. अर्थः, 5. बुद्धिः, 6. मनः, 7. प्रवृत्तिः, 8. दोषः, 9. प्रेत्यभावः, 10. फलम्, 11. दुःखम्, 12. अपवर्गः – इत्येते द्वादश एव प्रमेयपदार्थाः। एतेषु द्वादशसु प्रमेयपदार्थेषु शरीरं तावत् द्वितीयम्। अर्थात् सूत्रकारस्य मते शरीरं हि एकविधः प्रमेयपदार्थः।

न्यायशास्त्रस्य चरमं लक्ष्यं हि निःश्रेयसलाभः। स च प्रमाणादीनां षोडशपदार्थानां तत्त्वज्ञानेन जायते इति नैयायिका मन्यन्ते। शरीरावच्छेदेनैव आत्मनः निःश्रेयसलाभो भवति इत्यतः शरीरतत्त्वज्ञानं सर्वादौ अपेक्षितम्। तस्मादेव महर्षिः गौतमः भाष्यकारः वात्स्यायनश्च शरीरलक्षणं निर्णेतुं प्रवृत्तौ।

**महर्षिगौतमकृतं शरीरलक्षणम् –**

महर्षिगौतमः तस्य न्यायसूत्रे ईश्वरजीवोभयशरीरसाधारणं लक्षणमकरोत्– '**चेष्टेन्द्रियार्थाश्रयः शरीरम्**'[4] इति। अर्थात् यः पदार्थः चेष्टाश्रयः इन्द्रियाश्रयः अर्थाश्रयश्च वर्तते स एव शरीरपदवाच्यः। अतः चेष्टाश्रयत्वम् इन्द्रियाश्रयत्वम् अर्थाश्रयत्वम्– इति त्रीणि शरीरलक्षणानि। इदानीम् अस्य लक्षणत्रयस्य प्रकृतं तात्पर्यम् अस्माभिः भाष्यकारवात्स्यायनः वार्तिककारोद्द्योतकरः तात्पर्यटीकाकारप्राचीनवाचस्पतिः वृत्तिकारविश्वनाथः इत्येतेषां प्रथितयशसां नैयायिकानां व्याख्याभिः अवगन्तुं शक्यते।

**चेष्टाश्रयत्वलक्षणतात्पर्यम् –**

न्यायशास्त्रमते चेष्टा नाम व्यापारः क्रियाविशेषो वा। इयं क्रिया सजीवपदार्थेष्वेव दृश्यते इति शरीरलक्षणं तत्र सङ्गच्छते। वृक्षादयः सजीवपदार्थाः इति तत्र चेष्टारूपा क्रिया परिलक्ष्यते। वृक्षादिषु शरीरलक्षणं न प्रयोज्यमिति केचन मन्यन्ते। चेष्टाश्रयत्वम् इति शरीरलक्षणे अव्याप्तिशङ्का विद्यते। किञ्च, मण्डूकादिषु सजीवपदार्थेषु चेष्टाश्रयत्वम् अस्ति, शरीरलक्षणस्य तत्र समन्वयश्च समुचितः। किन्तु यः मण्डूकादिः पर्वतगह्वरे बद्धः तत्र चेष्टारूपक्रियायाः अदृष्टत्वात् चेष्टाश्रयत्वमिति लक्षणं न समन्वेतीति अव्याप्तिः। किञ्च, जडपदार्थैः घटादिभिः कापि क्रिया क्रियते चेत् घटादेरपि चेष्टाश्रयत्वमागच्छति

इति चेष्टाश्रयत्वलक्षणस्य अलक्ष्ये समन्वयात् अतिव्याप्तिश्च भवतीति केचन मन्यन्ते।

अस्य दोषस्य खण्डनाय न्यायसूत्रभाष्यकारौ अर्वाचीनाः नैयायिकाश्च आहुः– व्यापारः क्रियामात्रं वा चेष्टा इति महर्षिगौतमेन नोक्तम्, किन्तु विशिष्टव्यापार एव चेष्टा इति तेनोक्तम्। तस्मादेव भाष्यकाराः आहुः– **'ईप्सितं जिहासितं वाऽर्थमधिकृत्य ईप्सा–जिहासा-प्रयुक्तस्य तदुपायानुष्ठानलक्षणा समीहा चेष्टा, सा यत्र वर्तते तच्छरीरम्'**[5] इति। अर्थात् प्राप्तीच्छाविषयीभूतं परित्यागेच्छाविषयीभूतं पदार्थं वा उद्दिश्य प्राप्तीच्छया परित्यागेच्छया प्रयुक्तस्य (अर्थात् कृतयत्नस्य) जनस्य प्राप्तिपरिहारोपायानुष्ठानरूपा या समीहा सैव चेष्टा इत्युच्यते। तात्पर्यं तु हितप्राप्त्यहितपरिहारयोः इच्छया प्रयत्नवतो जीवस्य उपायानुष्ठानरूपा समीहैव चेष्टा इत्युक्तम्, सा च चेष्टा यत्र वर्तते तत् शरीरम् इति। या काचित् क्रिया चेष्टा इति नोक्तं महर्षिणा। किन्तु चेतनप्रयत्नजन्या प्रोक्तस्वरूपा क्रिया एव चेष्टा इति तेन कथितम्। घटादिषु जडपदार्थेषु सा नास्ति। चेतनजीवमात्रस्यैव सा भवति। शरीरविशेषे सा नास्ति चेदपि योग्यता अस्ति। वृक्षादिष्वपि सा अस्ति। कदाचित् काष्ठपुत्तलिकादिषु सजीवक्रिया परिलक्ष्यते। किन्तु चेतनप्रयुक्तत्वे सत्येव दारुयन्त्रादिषु क्रिया दृश्यते, न तु चेतनाप्रयुक्तत्वे। मूर्तान्तरेण अप्रयुक्तस्य शरीरस्य ईदृशं व्यापाराश्रयत्वमेव चेष्टाश्रयत्वम्। पाषाणमध्यस्थे मण्डूकादिशरीरे व्यापारो नास्ति चेदपि तद्योग्यता अस्ति। पाषाणे भग्ने सति मण्डूकादिशरीरे तादृशी क्रिया दृश्यते। तस्मात् मण्डूकादौ चेष्टाश्रयत्वलक्षणं नाव्याप्तम्।

प्रसङ्गेऽस्मिन् इदं समुल्लेख्यं यत् वैशेषिकाचार्यः प्रशस्तपादः तात्पर्यटीकाकारः वाचस्पतिमिश्रः न्यायमञ्जरीकारः जयन्तभट्टः इत्येते वृक्षादिकं शरीरमिति न कथयन्ति। प्रशस्तपादैः वृक्षादिकं शरीरे अनन्तर्भाव्य स्थावरविषयेषु अन्तर्भावितम्। तन्मते पार्थिवः अनित्यपदार्थः त्रिविधः– शरीरम् इन्द्रियं विषयश्च। शरीरं द्विविधम्– योनिजम् अयोनिजं च। पार्थिवयोनिजशरीरेषु मनुष्यपशुमृगपक्षिपन्नगादिषु सत्सु अपि वृक्षादिकं नास्ति। वृक्षादिकम् अयोनिजं शरीरमित्यपि नोक्तं तेन। वृक्षलतादिकं पार्थिवस्थावरविषयेषु अन्तर्भवति इति तेन स्वीकृतम्।[6] तात्पर्यटीकाकारः प्राचीनः वाचस्पतिमिश्र आह, वृक्षादौ चेष्टारूपस्य व्यापारविशेषस्य अभावात् तत् शरीरान्तर्गतं नास्ति।[7] न्यायमञ्जरीकारेण जयन्तभट्टेनोक्तम्, वृक्षादिकं न जीवशरीरम्, किन्तु चेष्टानामकक्रियायां क्रियाश्रयत्वस्य सत्त्वात् वृक्षादिषु च चेष्टायाः सत्त्वात् वृक्षादिकं चेष्टाश्रयभूतमिति वृक्षादिषु सूत्रकारकृतस्य शरीरलक्षणस्य अतिव्याप्तिः शङ्किता। किन्तु अत्र यत्किञ्चित्प्रकारकं चेष्टाश्रयत्वं शरीरलक्षणमिति सूत्रकारेण नोक्तम्। मुमुक्षोः जनस्य हितप्राप्त्यहितपरिहाररूपा या विशिष्टचेष्टा तादृशविशिष्टचेष्टा-

श्रयत्वमेव शरीरलक्षणमिति सूत्रकार आह। अतः वृक्षादौ अतिव्याप्तिः न शङ्कनीया।[8] किन्तु किरणावलीकारः उदयनाचार्यः वृक्षादेरपि जीवनमरणादिकं पश्यन् तस्य सजीवत्वं समर्थयति।[9] जैनसम्प्रदायेऽपि स्थावरजीवत्वेन वृक्षादेः शरीरं समर्थितं, तेषां त्वगेव केवलं शरीरमिति च प्रोक्तम्।[10] महर्षिणा मनुनापि वृक्षादिकं शरीरत्वेनैव समुल्लिखितम्– '**शरीरजैः कर्मदोषैर्याति स्थावरतां नरः**'[11] इति। अर्थात् शारीरिककर्मदोषाणाम् आधिक्ये सति मनुष्यः वृक्षलतादिस्थावरपदार्थरूपेण जायते।

वृक्षादेः चेतनजीववत् शरीरमिति वर्तमानकाले सर्वजनविदितम्। आधुनिकयुगे विश्वप्रसिद्धः विज्ञानवित् जगदीशचन्द्रवसुः स्वाविष्कृतयन्त्रद्वारा इदं प्रमाणितमकरोत् यत् वृक्षस्य जैविकसंवेदनमस्ति इति।

**इन्द्रियाश्रयत्वलक्षणतात्पर्यम् –**

महर्षिः गौतमः तस्य शरीरलक्षणसूत्रे (1.1.11) इन्द्रियाश्रयत्वं शरीरस्य द्वितीयं लक्षणमाह। न्यायशास्त्रमते येन पदार्थेन आत्मनो भोगसाधनं भवति तदेव इन्द्रियम्। इन्द्रियशब्दस्य व्युत्पत्तिर्हि इन्द्र + घ = इन्द्रियम् इति। अत्र इन्द्रशब्दस्य अर्थः आत्मा, घप्रत्ययस्य चार्थः सम्बन्धी। अतः इन्द्रियशब्दस्य अर्थः आत्मसम्बन्धी। भाष्यकारः वात्स्यायनः इन्द्रियलक्षणमाह– '**स्वविषयग्रहणलक्षणानीन्द्रियाणि**'[12] इति। अर्थात् स्वस्व (ज्ञान) विषयप्रत्यक्षसाधनत्वमेव (घ्राणादीनाम्) इन्द्रियाणां लक्षणम्। किञ्च उक्तम्– '**भोगसाधनानीन्द्रियाणि**'[13] इति। अर्थात् भोगस्य साधनभूतः अयम् इन्द्रियवर्गः। महर्षिणा गौतमेन इन्द्रियाणि नाम घ्राणादीनि (पञ्च) बहिरिन्द्रियाणि इति प्रथमं बोधितम्– '**घ्राणरसनचक्षुस्त्वक्श्रोत्राणीन्द्रियाणि भूतेभ्यः**'[14] इति। अर्थात् (यथाक्रमम्) पृथिव्यादिभूतपञ्चकमूलकानि घ्राणरसनचक्षुस्त्वक्श्रोत्राणि इन्द्रियाणि सन्ति। अस्मिन् सूत्रे महर्षिणा घ्राणादीनां पञ्चबहिरिन्द्रियाणां विषये एव उक्तम्, इन्द्रियत्वेन मनसः उल्लेखः न कृतः। किन्तु मनः अन्तरिन्द्रियत्वेन तेन उल्लिखितमित्यस्य नैकानि प्रमाणानि सूत्रग्रन्थे प्राप्यन्ते। यथा षष्ठस्य प्रमेयपदार्थस्य अन्तरिन्द्रियस्य मनसः अस्तित्वविषये तेन प्रमाणमुक्तम्– '**युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम्**'[15] इति। अर्थात् एकस्मिन् काले (विजातीयविविधप्रत्यक्ष) ज्ञानानाम् अनुत्पत्तिः मनसः लिङ्गम् (अनुमापकम्)। तस्मात् मनः अन्तरिन्द्रियम्।

तर्कभाषाकारेण केशवमिश्रेण इन्द्रियस्य लक्षणं कृतम्– '**शरीरसंयुक्तं ज्ञानकरणमतीन्द्रियम्**'[16] इति। अर्थात् यः पदार्थः शरीरेण सह सम्बद्धः, ज्ञानस्य करणभूतः अतीन्द्रियश्च अस्ति तदेव इन्द्रियम्। घ्राणादीनि षट् इन्द्रियाणि शरीरेण सह

सम्बन्धविशिष्टानि, गन्धादिविषयज्ञानकरणभूतानि, अतीन्द्रियाणि च सन्ति इत्यतः घ्राणादीनि इन्द्रियाणि इति उच्यन्ते।

भाषापरिच्छेदकारेण विश्वनाथेन इन्द्रियस्य अपरमेकं लक्षणं कृतं यत् इन्द्रियस्वरूपं स्पष्टं करोति। लक्षणं हि– '**शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनः-संयोगाश्रयत्वम् इन्द्रियत्वम्**'[17] इति। अर्थात् शब्दभिन्नस्य उद्भूतविशेषगुणस्य अनाश्रयः यः ज्ञानकारणमनःसंयोगस्य आश्रयः तदेव इन्द्रियम्। तस्मात् इन्द्रियस्वरूपं हि–

1. ज्ञानस्य कारणं यः मनःसंयोगः तस्य आश्रयः।
2. शब्दभिन्नस्य उद्भूतविशेषगुणस्य अनाश्रयः।

न्यायमतानुसारेण इन्द्रियस्वरूपनिर्णयात् परं शरीरस्य इन्द्रियाश्रयत्वस्य यथार्थतात्पर्यनिर्णय आवश्यकः। यतो हि महर्षिः गौतमः शरीरलक्षणे शरीरं चेष्टाश्रयः इति कथनात्परं शरीरम् इन्द्रियाश्रयः इत्यपि कथितवान्। इन्द्रियाश्रयशब्दस्य अर्थस्तु इन्द्रियाधिष्ठानम्। किन्तु इन्द्रियाश्रयशब्दस्य एतादृशे अर्थे स्वीक्रियमाणे घटादिविषयस्य प्रत्यक्षकाले घटादिद्रव्ये इन्द्रियाश्रयत्वलक्षणम् अतिव्याप्तम्। यतो हि चक्षुःसंयोगकाले घटादिद्रव्याणामपि इन्द्रियाश्रयत्वं भवति। तस्मात् इन्द्रियाश्रयत्वं शरीरलक्षणं न वक्तव्यम्।

इयमतिव्याप्तिः निवारिता भवति यदि वयम् इन्द्रियाश्रयत्वशब्दस्य वात्स्यायनकृतम् अर्थं स्वीकुर्मः। वात्स्यायनेनोक्तम्– '**यस्यानुग्रहेणानुगृहीतानि उपघाते चोपहतानि स्वविषयेषु साध्वसाधुषु प्रवर्तन्ते, स एषामाश्रयस्तच्छरीरम्**'[18] इति। अर्थात् यस्य पदार्थस्य अनुग्रहेण अनुगृहीतानि (अर्थात् यस्य सत्त्वात् सत्त्वविशिष्टानि यस्य विनाशे च विनष्टानि) इन्द्रियाणि साध्वसाधुषु स्वविषयेषु प्रवृत्तानि भवन्ति स पदार्थः तेषाम् इन्द्रियाणाम् आश्रयः शरीरमित्युच्यते। तात्पर्यं तु, शरीरस्थस्य इन्द्रियस्य पृथक्सत्ता न विद्यते। शरीरसत्ताप्रयुक्तैव इन्द्रियाणां सत्ता, शरीरविनाशे च सति इन्द्रियाणामपि अवश्यं विनाशः। अस्मिन्नेवार्थे शरीरम् इन्द्रियाणाम् आश्रय इत्युक्तम्। इदानीम् इन्द्रियसंयुक्तानि घटादिद्रव्याणि इन्द्रियाश्रयाणि भवितुं नार्हन्ति। यतो हि इन्द्रियाणां सत्तया असत्तया वा सह घटादिद्रव्यस्य सत्तायाः असत्ताया वा न कश्चित् सम्बन्धो विद्यते। तस्मात् वात्स्यायनकृतार्थे स्वीक्रियमाणे इन्द्रियाश्रयत्वं शरीरलक्षणमिति स्वीकर्तुं शक्यते।

प्रख्यातः न्यायदार्शनिकः उद्द्योतकरः स्वस्य न्यायवार्तिकग्रन्थे शरीरलक्षणसूत्रे एकं पूर्वपक्षम् आशङ्क्य उक्तवान्, इन्द्रियाश्रयत्वशब्दस्य स्वकारणवृत्तित्वम् इत्यर्थः स्वीक्रियते चेत् शरीरस्य इन्द्रियाश्रयत्वं न सम्भवति। यतो हि यानि इन्द्रियाणि कार्यभूतानि तानि स्वकारणवृत्तीनि भवितुमर्हन्ति, किन्तु यानि कार्यभूतानि न सन्ति तानि स्वकारणवृत्तीनि

न सन्ति। यथा चक्षुः नासिका जिह्वा त्वक्– एतानि चत्वारि इन्द्रियाणि कार्यभूतानि सन्तीत्यतः एतानि स्वकारणवृत्तीनि सन्ति। तस्मात् एतानि चत्वारि इन्द्रियाणि शरीराश्रयभूतानि, शरीरं च इन्द्रियाश्रयभूतं भवितुमर्हति। किन्तु परमाणुस्वरूपम् अतीन्द्रियं मनः विभ्वाकाश-स्वरूपं श्रोत्रेन्द्रियं च कार्ये न स्तः, एते अकार्ये नित्ये वा। तस्मात् मनः श्रोत्रेन्द्रियं च स्वकारणे अवृत्ती इत्यतः ते शरीराश्रिते न स्तः। तस्मात् शरीरमपि इन्द्रियाश्रयः भवितुं नार्हति। एवं सर्वः इन्द्रियाश्रयो न शरीरमित्यतः शरीरस्य इन्द्रियाश्रयत्वं न युज्यते।

एतादृशशङ्कायाः समाधानमाह उद्द्योतकरः– '**शरीरानुविधानमिन्द्रियाश्रयत्वं क्रमः, न पुनराधाराधेयभावेनेन्द्रियाणि शरीरे वर्तन्त**'[19] इति। अर्थात् अत्र आधाराधेयभावार्थे शरीरस्य इन्द्रियाश्रयत्वं नोक्तम्। इन्द्रियाश्रयत्वं नाम शरीरानुविधानत्वम्। तात्पर्यं तु, शरीरम् इन्द्रियाश्रयः इत्यस्य नायमर्थः यत् शरीरम् इन्द्रियाणाम् अधिकरणं इन्द्रियं च शरीरस्य आधेयमिति। वस्तुतस्तु इन्द्रियाश्रयत्वस्य अर्थः– शरीरोपघातेन इन्द्रियोपघातस्य अनुविधानम्। अर्थात् इन्द्रियाणि शरीरानुग्रहेणैव अनुगृहीतानि भवन्ति, तदुपघातेनैव उपहितानि भवन्ति इत्यस्मिन्नेवार्थे शरीरम् इन्द्रियाश्रयः इत्युक्तम्।

न्यायवार्तिकतात्पर्यटीकाकारस्य प्राचीनवाचस्पतिमिश्रस्यापि इन्द्रियाश्रयत्वलक्षणस्य व्याख्या एतादृशी विद्यते। तस्य वचनम्– '**तदवृत्तित्वेनानुपप्याऽर्थानामप्यन्यादृश आश्रयाख्यो व्याख्येयः**'[20] इति। अर्थात् इन्द्रियाश्रयो नाम येन केनचित् सम्बन्धेन इन्द्रियस्य अधिकरणमिति नास्ति। किन्तु शरीरस्य सत्त्वात् इन्द्रियस्य सत्ता, शरीरस्य विनाशे इन्द्रियस्य विनाशः इत्यतः शरीरम् इन्द्रियाश्रयः। तस्मात् प्रकृतार्थे इन्द्रियाश्रयत्वस्य शरीरलक्षणत्वं वक्तुं शक्यते।

**अर्थाश्रयत्वलक्षणतात्पर्यम् –**

महर्षिगौतमोक्तं शरीरस्य तृतीयलक्षणं हि अर्थाश्रयत्वम्। इदानीम् अस्मिन् लक्षणे प्रयुक्तस्य अर्थशब्दस्य प्रकृततात्पर्यम् अवगन्तव्यम्। गौतमः तस्य न्यायसूत्रे आह– '**आत्म–शरीरेन्द्रियार्थ–बुद्धि–मनः–प्रवृत्ति–दोष–प्रेत्यभाव–फल–दुःखापवर्गास्तु प्रमेयम्**'[21] इति। एतत्सूत्रानुसारेण चतुर्थः प्रमेयो हि अर्थः। अर्थात् इन्द्रियग्राह्यो गन्धादिः भोग्यविषयः। तस्मात् नैके मन्यन्ते यत् घटादिद्रव्याणि गन्धादिगुणाश्च भोग्यविषयतया अर्थस्य आश्रयाः भवन्ति। अतः अर्थाश्रयत्वं न शरीरलक्षणम्। यतो हि प्रोक्ता आश्रयाः शरीराणि न भवन्ति।

प्रसङ्गेऽस्मिन् वात्स्यायनेनोक्तम्– '**यस्मिन्नायतने इन्द्रियार्थसन्निकर्षादुत्पन्नयोः सुखदुःखयोः प्रतिसंवेदनं प्रवर्तते, स एषामाश्रयस्तच्छरीरम्**'[22] इति। अर्थात्

यस्मिन् अधिष्ठाने इन्द्रियार्थसन्निकर्षहेतुकः सुखदुःखानुभवः जायते स पदार्थः अस्य सुखदुःखरूपस्य अर्थसमूहस्य आश्रयो भवतीति शरीरमित्युच्यते। तात्पर्यं तु, अर्थशब्देन अत्र महर्षिप्रोक्तः चतुर्थः प्रमेयपदार्थः गन्धादिगुणघटादिद्रव्यप्रभृतिः इन्द्रियार्थो न बोद्धव्यः। किन्तु ते गन्धादिगुणघटादिद्रव्यादयः पदार्थाः इन्द्रियग्राह्या विषयाः इत्यतः तैः सह इन्द्रियाणां सन्निकर्षे सति जीवदेहस्य आत्मनि यत् सुखदुःखादिकं जायते तस्य सुखदुःखरूपार्थसमूहस्य आश्रयत्वेन शरीरम् अर्थाश्रयो भवति। अस्मिन्नेवार्थे अत्र अर्थशब्दो लाक्षणिकः। उक्तं च– '**प्राणो वा अन्नं शरीरम् अन्नादम्। प्राणे शरीरं प्रतिष्ठितम्। शरीरे प्राणः प्रतिष्ठितः। तदेतदन्नमन्ने प्रतिष्ठितम्**'[23] इति। अर्थात् शरीरे अन्तर्भुक्तत्वादेव प्राणः अन्नं, शरीरं च अन्नस्य भोक्तृ। यतो हि शरीरे प्राणः प्रतिष्ठितः। (किञ्च शरीरमेव अन्नं, प्राणः अन्नादः अर्थात् भोक्ता, यतो हि) प्राणम् अवलम्ब्यैव शरीरं स्थितिं लभते। तस्मात् अन्नमेव अन्ने प्रतिष्ठितम्। अस्मिन् श्रुतिवाक्ये अन्नसाध्ये अर्थे अन्नशब्दस्य प्रयोगः कृतः। एवं शरीराभावे आत्मनि सुखदुःखे न जायेते तथा शरीरावच्छेदेनैव आत्मनि सुखदुःखात्मकं मानसप्रत्यक्षं जायते। अतः जीवस्य शरीरमेव तस्य सुखदुःखयोः तदनुभवस्य च अवच्छेदकम्। तस्मात् अवच्छेदकतासम्बन्धेन सुखदुःखरूपार्थाश्रयत्वं शरीरे अस्तीति अर्थाश्रयत्वं शरीरलक्षणं सङ्गच्छते।

प्राचीनः वाचस्पतिमिश्रोऽपि तस्य न्यायवार्तिकतात्पर्यटीकाग्रन्थे शरीरस्य अर्थाश्रयत्वलक्षणविषये भाष्यकारमतं समर्थयन्नाह– '**यद्यपि गन्धादयो विषया न स्वरूपेण शरीरमाश्रयन्ते तथापि एतेषां सुखाद्युपलब्धिहेतुत्वं कार्यं प्रयोजनं तदर्थमाश्रयन्ते इत्यर्थः**'[24] इति। अर्थात् गन्धादय इन्द्रियग्राह्याः विषयाः स्वरूपतः शरीरे आश्रिता न भवन्ति चेदपि तद्गन्धादिविषयजन्यसुखाद्युपलब्धिहेतुर्भवति शरीरम्। अस्मिन्नेवार्थे शरीरस्य अर्थाश्रयत्वं युज्यते। तात्पर्यं तु गन्धादिगुणाः शरीरगुणा न सन्ति। घ्राणादीन्द्रियग्राह्यविषयाणां गुणास्ते। अतः ते शरीरे आश्रिताः भवितुं नार्हन्ति। किन्तु शरीरावच्छेदेनैव गन्धादिविषयजन्यसुखदुःखादीनां विषयाणामुपलब्धिर्भवतीति शरीरम् अर्थाश्रयत्वेन स्वीकृतम्। अतः वाचस्पतिमतेऽपि अर्थाश्रयत्वं शरीरस्य लक्षणम्।

विश्वनाथः तस्य न्यायवृत्तिग्रन्थे अर्थाश्रयत्वलक्षणस्य तात्पर्यं प्रतिपादयन् प्रोक्तं मतं समर्थयन्नाह– '**अर्थाश्रयत्वमित्यत्रार्थशब्दो न रूपादिपरः, तदाश्रयत्वस्य घटादावतिव्याप्तेः, किन्तु सुखदुःखान्यतरपरः**'[25] इति। अर्थात् अत्र अर्थो नाम रूपादिविषयो नास्ति। यतो हि शरीरं रूपादिविषयाणाम् आश्रयश्चेत् घटादिलक्षणस्य अतिव्याप्तिः स्यात्। अत्र अर्थाश्रयो नाम सुखदुःखयोः कस्यचित् एकस्य विषयस्य आश्रय

इति अवगन्तव्यम्। तात्पर्यं तु सुखदुःखयोः कस्यचित् एकस्य विषयस्य आश्रयत्वेन अर्थाश्रयत्वम्। अस्य सारार्थस्तु यस्मिन् अधिष्ठाने इन्द्रियार्थसन्निकर्षात् सुखदुःखयोः अनुभवः जायते स पदार्थः सुखदुःखरूपस्य अर्थसमूहस्य आश्रयो भवति, तच्च अधिष्ठानं शरीरं विना अन्यत् किमपि नास्ति। अनेन व्याख्यानेन घटादौ अर्थाश्रयत्वमिति शरीरलक्षणस्य अतिव्याप्तिः निराकृता। तस्मात् सुखदुःखयोः कस्यचिदेकस्य आश्रयत्वं शरीरलक्षणं नास्ति। परन्तु सुखाश्रयत्वं दुःखाश्रयत्वम्– इति उभयाश्रयत्वमेव शरीरस्य लक्षणम्।

प्रख्यातो न्यायदार्शनिकः जयन्तभट्टः तस्य न्यायमञ्जरीग्रन्थे सूत्रकारवृतस्य शरीरलक्षणस्य विश्लेषणकाले भाष्यकारवार्तिककारादिभिः मतैक्यं पोषयति चेदपि केषुचित् विषयेषु तस्य मते भेदो वर्तते इत्यस्मिन् विषये आलोकपातः कर्तव्यः। शरीरलक्षणम् अपवर्गोपयोगि स्यात् इति धिया सः इदमालोचनमकरोत्। तस्य मते '**शरीरत्वमेव तावत्प्रथमं शरीरस्य लक्षणम्**'[26] इति। अर्थात् शरीरत्वमेव शरीरस्य प्रथमं लक्षणम्। अनेन शरीरत्वलक्षणेन शरीरसमानजातीयेभ्यः तदसमानजातीयेभ्यश्च पदार्थेभ्यः शरीरस्य पृथक्करणं क्रियते। किन्तु जयन्तभट्टस्य मते शरीरत्वमिति लक्षणस्य सत्त्वेऽपि चेष्टाश्रयत्वम् इन्द्रियाश्रयत्वम् अर्थाश्रयत्वम् इति सूत्रकारेण गौतमेन शरीरलक्षणमुक्तमित्यतः चेष्टाश्रयत्वादिरूपेण आत्मनो भोगायतनं शरीरमिति वक्तव्यम्। तस्मादेव जयन्तभट्टेन पुनः उक्तम्– '**चेष्टेन्द्रियार्थाश्रयतया हि शरीरमात्मनो भोगायतनं भवति**'[27] इति। अर्थात् चेष्टाश्रयत्वात् इन्द्रियाश्रयत्वात् अर्थाश्रयत्वाच्च शरीरम् आत्मना भोगाधिष्ठानं भवति। तस्मात् मुमुक्षोः सुखदुःखोपभोगरहितात्मतत्त्वस्वरूपनिःश्रेयसज्ञानमनस्कत्वेऽपि भोगाधिष्ठानत्वेन तस्य शरीरभावना भवतीति तस्य परिहाराय मुमुक्षोः जन्म अत्यावश्यकम्। तस्मादेव महर्षिणा चेष्टेन्द्रियार्थाश्रयत्वं जीवशरीरस्य लक्षणमुक्तम्।

**उपसंहारः**

मनुष्यजीवनं विचित्रं विकासश्च तस्य बहुमुखी। अतिप्राचीनकालात् यस्य न्यायशास्त्रस्य मार्गपरिक्रमणम् आरब्धमासीत् तस्य गतिः वर्तमानकालेऽपि प्रवहन्ती अस्ति। प्राचीनन्यायशास्त्रं क्षुरधारयुक्तिच्छटया बहुमुखिविकासदिशि परिचालितम् अकुर्वन् भारतीयमनीषायाः श्रेष्ठदार्शनिकाः नव्यनैयायिकाः। आधुनिकविज्ञानदृष्टिभङ्गिमैव प्राधान्येन यान्त्रिकदृष्टिभङ्गिमा। मतमिदं यान्त्रिककार्यकारणतत्त्वोपरि प्रतिष्ठितम्। यान्त्रिकसभ्यता मनुष्यजीवनस्य बहुविधसमस्याः समाहितवती, मनुष्यसमाजं बाह्यचाकचिक्येन उद्वेलितं प्रलुब्धं चाकरोत्। किन्तु मनुष्यजीवनस्य आत्मिकचेतनायां यथार्था शान्तिः प्रतिष्ठिता नाभवत्। तस्मात् वर्तमानयुगे विश्वस्य सर्वत्र परिलक्ष्यते यत् प्रायेण सर्वासु वृत्तिषु वर्तमानाः जनाः धनाढ्या

अपि आत्मिकशान्त्यर्थं प्राचीनभारतीयम् आध्यात्मिकशास्त्रं प्रति समाकृष्टा भवन्ति। न्यायशास्त्रं जगत् मिथ्या, नित्यः आत्महीनः निर्वाणः, अनित्ये जडदेहे जीवनस्य परिसमाप्तिः इत्यादिकं नाह। न्यायदार्शनिकाः जीवने प्रत्येकं विषयः युक्तिभिः विचार्य ग्राह्यः इति कथयन्ति। किञ्च, जगतः सत्यत्वं स्वीकृत्य तस्य युक्तिभिः विश्लेषणं कर्तव्यमिति वदन्ति ते। तस्मादेव दर्शनसमाजे न्यायशास्त्रस्य अपरं नाम यौक्तिकवस्तुवादः। नैयायिकाः शास्त्रालोचनायाः प्राक् येषां षोडशपदार्थानां समुल्लेखमकुर्वन् तेषु संशयनिर्णयवादवितण्डानां या आलोचना कृता तत्र द्वान्द्विकपद्धतेः परिचयः प्राप्यते। इमां यौक्तिकद्वान्द्विकपद्धतिं समाश्रित्य शरीरतत्त्वस्य यत् अनुपमं विश्लेषणं कृतं तत् आकर्षणीयं मनुष्यजीवने दिङ्निर्देशकं च। वर्तमानकालेऽपि तस्य गुरुत्वं प्रासङ्गिकता च निःसंशयम् अनस्वीकार्ये। न्यायदार्शनिकाः प्रत्येकं विषयस्य आलोचनायां प्रतिपक्षस्य युक्तीः यथायथं समुपस्थाप्य अनुपमयौक्तिकविश्लेषणेन तासां खण्डनमकुर्वन्, स्वमतप्रतिष्ठायै प्रयासमकुर्वन्, भाव्यालोचनमार्गमपि प्रशस्तमकुर्वन्। तस्मात् न्यायदर्शने शरीरतत्त्वस्य प्रासङ्गिकता विद्यते। यतो हि तेषां यौक्तिकद्वान्द्विकालोचनपद्धतौ एव नूतनतत्त्वस्य तथ्यस्य च प्रकाशेन पुनर्मूल्यायनस्य अवकाशः अत्र विद्यते। न्याय-वैशेषिकदर्शनयोः समानतन्त्रत्वात् वैशेषिकाणां शरीरतत्त्वमपि समानतया प्रासङ्गिकमिति शिवम्।

*

## सन्दर्भाः


1. सटीकः तर्कसंग्रहः, पृ. 122
2. न्यायसूत्रम्, 1.1.1
3. न्यायसूत्रम्, 1.1.9
4. न्यायसूत्रम्, 1.1.11
5. न्यायदर्शनम्, प्रथमखण्डः, पृ. 212
6. प्रशस्तपादभाष्यम्, द्वितीयभागः, पृ. 54
7. न्यायदर्शनम् (तारानाथः अमरेन्द्रनाथश्च ), पृ. 194
8. न्यायमञ्जरी, द्वितीयभागः, पृ. 45

9. किरणावली, तृतीयखण्डः, पृ. 154
10. भारतीयदर्शनम् (समरेन्द्रः), पृ. 119
11. मनुसंहिता – 12.9
12. न्यायदर्शनम्, प्रथमखण्डः, पृ. 214
13. तदेव, पृ. 197
14. न्यायसूत्रम्, 1.1.12
15. न्यायसूत्रम्, 1.1.16
16. केशवमिश्रप्रणीता तर्कभाषा (शर्वाणी), पृ. 71
17. भाषापरिच्छेदः (पञ्चाननः), पृ. 281, 282
18. न्यायदर्शनम्, प्रथमखण्डः, पृ. 212
19. न्यायदर्शनम्, पृ. 195
20. तदेव
21. न्यायसूत्रम्, 1.1.9
22. न्यायदर्शनम्, प्रथमखण्डः, पृ. 212
23. तैत्तिरीयोपनिषत्, 3.7
24. न्यायदर्शनम्, पृ. 195
25. तदेव
26. न्यायमञ्जरी, द्वितीयभागः, पृ.45
27. तदेव

*

# निरुक्तमीमांसयोर्नये देवतास्वरूपपर्यालोचनम्

**अचिन्त्यकुमारपालः**

**प्रबन्धसारः**

भारतीयसंस्कृतौ देवानामस्ति महान् प्रभावः। सनातनधर्मावलम्बिनो तु बहुदेवतावादं स्वीकुर्वन्ति। परन्तु प्राचीने वैदिके काले तथा बहुदेवतावादः प्रचलितो नासीत्। तथापि यज्ञप्रधाने वैदिके साहित्ये इन्द्रादयो बहुदेवता उल्लिखिताः। किञ्च, यागादिषु पार्थिवपदार्थानामपि देवतारूपेण स्तुतिरपि प्राप्यते। उपनिषत्साहित्ये तु ताः एव वेदोल्लिखिता इन्द्रादयो देवता एकस्मिन्नेव परमब्रह्मणि अन्तर्हिताः दृश्यन्ते। किञ्च, पुराणेतिहासादिष्वपि बहुदेवतावादः प्रतीकपूजा च समर्थिता। इदानीं प्रश्नोऽयमुदेति यद्वैदिकदेवतायाः तथा पौराणिकदेवतास्वरूपं किम्? प्रबन्धेऽस्मिन् प्रश्नस्यास्योत्तरं नैरुक्तकारमीमांसकानां नयानुसारं निर्णेतुं प्रयासः कृतः। यास्काचार्यानुसारमाधिदैविकाध्यात्मिकदृष्ट्या तथा च मीमांसकानामाधियाज्ञिकदृष्ट्या देवतानामेकत्वं बहुत्वम् एवं च तेषां विग्रहादिवत्त्वं प्रकटितम्।

**कुञ्चिकाशब्दाः**

देवता, आध्यात्मिकम्, आधिदैविकम्, आधियाज्ञिकम्, ईश्वरः, विग्रहवत्त्वम्।

**भूमिका**

आचार्यः कात्यायनो यज्ञं व्याख्यास्याम इति यज्ञस्वरूपवचनोपक्रमादनन्तरमेव सूत्रितं द्रव्यं देवतात्याग इति वचनाज्ज्ञायते यद्देवतामुद्दिश्य कस्यापि द्रव्यपरित्याग एव यज्ञः। कर्काचार्यैरपि उक्तम्– **तस्य द्रव्यस्य देवतां प्रति या उत्सर्गक्रिया स याग** इति। इदानीं का नाम देवता? इति जिज्ञासायामुच्यते कर्काचार्येण **देवताशब्दः चोदनालक्षणः**। इति। या मन्त्रेण उच्यते सा एव देवता इति तु तन्मतम्। यास्काचार्येण **देवो दानाद्वा दीपनाद्वा द्योतनाद्वा द्युस्थानो भवति वा** इति। यास्काचार्यस्य नये तु **यो देवः सा देवता** इति। तन्नये तु देवशब्ददेवताशब्दौ समार्थकौ। अस्य तु देवताविषयकाणि बहूनि वाक्यानि तु वेदाङ्गादिशास्त्रेषु साङ्ख्यादिषड्दर्शनादिषु प्रतिपादयितुं महान् यत्नः कृतः दृश्यते वेदविद्भिः आचार्यैः। केषाञ्चिन्नये देवता तु मनुष्यादिसदृशहस्तपादादिविशिष्टः

कोऽपि। केषाञ्चिन्नये न तु तस्य किमपि स्वरूपं वर्तते मनुष्यादिरूपम्, स तु नैसर्गिकशक्तेः कल्पनामात्रम्। केषाञ्चिन्नये सामान्यगोष्ठीनेतारः कालेन देवत्वमाप्नुवन्। एतत्सर्वं तु वेदे प्रायेण वर्णितं दृश्यते। किञ्च, यास्काचार्येणापि एतत्सर्वं विस्तरेण तदीये निरुक्ते निरूपितम्। परन्तु देवताविषये मीमांसकानामस्ति मतवैविध्यम्। यद्यपि षडास्तिकदर्शनेषु देवतामाश्रित्य सन्ति वैमत्यं परन्तु अत्र प्रस्तुतेऽस्मिन् प्रकृतप्रबन्धे मीमांसानिरुक्तयोः वैदिकदेवविषयकमतमेव पर्यालोच्य तयोः तुल्यविचार उपस्थापयितुं चेष्टितः।

**यास्काचार्यस्य नये देवतास्वरूपम्–** यास्काचार्यस्तदीये निरुक्तग्रन्थस्य सप्तमेऽध्याये दैवतकाण्डनामके देवताविषयकमालोचनं विहितवान्। दुर्गाचार्येण प्रकरणस्यास्य माहात्म्यमालोचितम्– **दैवतमन्तरेण न शक्यो देवतापदार्थः सम्यगवबोद्धुं देवतापरिज्ञानानुबद्धस्त्वखिलः पुरुषार्थ इत्यतो दैवतं प्रकरणं व्याख्यास्याम इति वाक्यशेषः।** यतो देवतापरिज्ञानमेव वेदस्य तात्पर्यानुसन्धानेऽत्यन्तमावश्यकम्। किञ्च, देवतापरिज्ञानं दैवतमन्तरेण न शक्यम्, तस्माद्दैवतकाण्डस्य माहात्म्यं वर्णितम्। यास्काचार्यस्य नये देवशब्दस्य व्युत्पत्तिर्हि–**देवो दानाद्वा दीपनाद्वा द्योतनाद्वा द्युस्थानो भवति वा।**[1] इति। ऐश्वर्यादिप्रदानात्तेजोमयत्वात्स्वयं प्रकाशस्वरूपत्वाद् द्युनामके स्थाने वावस्थानाद्देव इत्युच्यते।

यद्यपि कस्यापि यज्ञस्य नामकरणम् एकस्य देवस्य सम्बन्धि भवति तथापि तत्र तु स एवैको देव इति नावगन्तव्यम्। दैवतन्तु मन्त्रस्य एव भवति न तु एकस्य सम्पूर्णयागस्य। प्रधानादिभेदेन तेषामाहुतिकालस्तथा हुतद्रव्यस्य भेदो यद्यपि वर्तते, तथापि कस्यापि एकस्य देवस्य याग इति न वक्तुं शक्यते, अवान्तरानुयाजसम्बन्धिदेवानामवस्थानात्। यथा सोमयागे विविधैर्मन्त्रैस्सोम एव आहूयते। परन्तु तत्र इन्द्राग्निविष्णुवरुणादीनुद्दिश्य स्तुतिस्तथा आहुतिः प्रदीयते। तथाह्युक्तं यास्केन–**यत्कामः ऋषिर्यस्यां देवतायामार्थपत्यमिच्छन् स्तुतिं प्रयुङ्क्ते तद्दैवतः स मन्त्रो भवति।**[2] इति। एतेन स्पष्टीभवति यद्यागस्य निर्दिष्टा कापि देवता नास्ति, परन्तु प्रधानदेवता इति वक्तुं शक्यते। सामान्येन मन्त्रस्य एव देवता भवति। यतः **मन्त्राः मननात्**[3] इति निरुक्तवचनम्। तनादिगणीयादवबोधनार्थकादात्मनेपदिनो मन्धातोरुणादिष्ट्रन्प्रत्यये मन्त्र इति रूपम्। येन देवतास्स्मर्यन्ते तथा कर्मादिषु देवतानां मननं भवति त एव मन्त्राः। तस्माद्देवा मन्त्रसम्बद्धाः। न केवलं देवा अपि च तत्सम्बन्धिकर्मजालस्यापि स्मरणं भवति। तथाहि दुर्गाचार्यवचनम्– **तेभ्यो ह्याध्यात्माधिदैवाधियज्ञादिमन्तारो मन्यन्ते तदेषां मन्त्रत्वम्।**

पुनरयं मन्त्रस्तु त्रिविध इति यास्काचार्यसमयः– **तास्त्रिविधा ऋचः परोक्षकृताः प्रत्यक्षकृता आध्यात्मिक्याश्च।**[4] इति। परोक्षकृतः, प्रत्यक्षकृतस्तथा आध्यात्मिक्यश्चेति

त्रिविधा मन्त्राः। यत्र क्रियायाः प्रथमपुरुषरूपस्य प्रयोगो भवति तत्परोक्षकृतः। यत्र क्रियाया मध्यमपुरुषरूपस्य प्रयोगो भवति तत्प्रत्यक्षकृतः। यत्र क्रियाया उत्तमपुरुषरूपस्य प्रयोगः तदाध्यात्मिक्यम्। इत्येवं त्रिविधस्य मन्त्रस्य स्वरूपं यास्काचार्येण निर्धारितम्। इदानीमेतैर्मन्त्रैराहूयमानानां देवतानां स्वरूपं कीदृशमिति जिज्ञासायामुक्तं निरुक्तकारेण– **अथाकारचिन्तनं देवतानाम्।**[5] तत्र तु तेन मतत्रयं देवानामाकारविषयकं प्रस्तुतम्। तद्धि– 1. पुरुषविग्रहविशिष्टाः, 2. अपुरुषविधाः, तथा च 3. उभयविधाः इति। एते च त्रिविधा देवस्वरूपा वेदे प्राप्यन्त एव। तत्र तावद् ये देवानां पुरुषाकारञ्चिन्तयन्ति ते युक्तिपञ्चकमुपस्थापयन्ति–

1. चेतनावद्धि स्तुतयो भवन्ति। चेतनायुक्तजीवानामिव तेषां स्तुतयो दृश्यन्ते। यथा– **इन्द्रस्य नु वीर्याणि प्रवोचम्।**[6] इति।

2. **तथाभिधानानि।** देवयोस्सम्भाषणादिकं मनुष्यादिवद्भवतीति तु संवादसूक्तादिषु स्पष्टम्। यथा– **यमयमीसंवादसूक्तम्।**[7]

3. **अथापि पौरुषविधिकैरङ्गैः संस्तूयन्ते।** पुरुषवदेतेषां बाह्वक्षिपादाद्यङ्गा-नामप्युल्लेखः प्राप्यते। यथा – **ऋष्वा त इन्द्र स्थविरस्य बाहू।**[8]

4. **अथापि पौरुषेयविधिकैर्द्रव्यसंयोगैः।** मनुष्यवद्गवाश्वजायादिद्रव्यसंयोगवत्त्वाद्देवानां पुरुषाकृतित्वम्। यथा– **आद्वाभ्यां हरुभ्यामिन्द्र याहि।**[9]

5. **अथापि पौरुषविधिकैः कर्मभिः।** पुरुषविधपानभोजनादिकर्मयुक्तत्वाद्देवा अपि मनुष्यसदृशा इति देवतानां पुरुषाकारवादिनः पूर्वपक्षिणो मन्यन्ते। यथा– **अद्धीन्द्र पिब च प्रस्थितस्य।**[10]

इदानीमपुरुषाकारवादिनां मतं वर्णनावसरे यास्काचार्येण पूर्वपक्षत्वेन निराकृतम्। उत्तरपक्षिणां नये तु 1. अपि तु यद् दृश्यतेऽपुरुषविधं तत्। अपुरुषाकारविशिष्टा अग्निवाय्वादिपदार्था देवतात्वेन स्तूयन्ते। यथा– **अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम्।**[11]

2. अचेतनान्यप्येवं स्तूयन्ते, यथाक्षप्रभृतीन्योषधिपर्यन्तानि। न केवलं चेतनजीवानामिव तेषां स्तुतिरपि त्वचेतनपदार्थानामप्यक्षौषधिशस्यादीनां स्तुतिर्दृश्यते। तस्माच्चेतनावत्स्तुतिमत्त्वं देवानां पौरुष्यविधयेऽहेतुरित्युत्तरपक्षिसिद्धान्तः। किञ्च, न केवलमङ्गादिविशिष्टतया देवानां स्तुतौ तेषां पुरुषाकारत्वम्–

3. **यथो एतत् – 'पौरुषविधिकैरङ्गैः संस्तूयन्त' इति अचेतनेष्वप्येतद्भवति।** उदाहरणं यथा– **अभिक्रदन्ति हरितेभिरासभिः।**[12] इति ग्रावस्तुतिः। तस्य देवानां

मुखस्याभावेऽपि हरिद्वर्णविशिष्टमुखस्य स्तुतिर्दृश्यते। एतेनाचेतनानामप्यङ्गादिकल्पनदर्शनान्न देवानां पुरुषाकारत्वमिति। द्रव्यसंयोगैस्स्तुतिविशिष्टत्वाद्देवानां पुरुषाकारचिन्तनमित्यपि न युक्तम्–

4. **यथो एतत् 'पौरुषविधिकैर्द्रव्यसंयोगैरिति एतदपि तादृशमेव।** उदाहरणं यथा– **सुखं रथं युयुजे सिन्धुरश्विनम्।**[13] इति नदीस्तुतिः। रथाश्वाद्युपपत्तेरभावेऽपि तद्विशिष्टस्य सिन्धोस्स्तुतिविहितत्वात्तत्तु रूपकमात्रम्। तस्माद्द्रव्यसंयुक्ततया स्तुतित्वेऽपि देवानां न पुरुषाकारचिन्तनं युक्तम्। पुनरेतन्मतद्वयमुक्त्वेदानीं तृतीयमुभयविधत्वं प्रतिपादयति– **अपि वा उभयविधाः स्युः** इति। केषाञ्चिन्नये देवा उभयविधा उभयहेतुप्रामाण्यात्। वेदप्रामाण्याद्देवाः पुरुषाकारविशिष्टा यथा भवन्ति तथैव अपुरुषविधा अपि भवन्ति इति तृतीयपक्षिणां मतम्। चतुर्थपक्षमप्युक्तं यास्काचार्येण– **अपि वा पुरुषविधानामेव सतां कर्मात्मान एते स्युः। यथा यज्ञो यजमानस्य। एष आख्यानसमयः।** इति। एते अपुरुषविधाः क्षितिजलादय एव पुरुषाकारं प्राप्य स्तूयन्ते वर्ण्यन्ते। एतत्तु आख्यानादीनां सिद्धान्त इत्यर्थः। ये तावद्वेदे पुरुषविग्रहतया वर्ण्यन्ते ते एव पार्थिवकर्मसम्पादनार्थं भूमिजलाग्न्यादिरूपं विधृत्य प्रकाशन्ते। तस्मात्ते कर्मात्मनः। दुर्गाचार्येण तु भाष्ये स्पष्टीकृतम्– **अग्निश्च ब्राह्मणरूपेण वासुदेवार्जुनावुभौ खाण्डवं ययाचे पुरुषरूपेणाग्निरूपेण च खाण्डवं ददाह** इति। महाभारते प्राप्यते यत् खाण्डवदाहार्थमग्निस्स्वयं ब्राह्मणरूपं धृत्वा कृष्णार्जुनाभ्यां ययाचे। एतेन एकस्य अग्नेः ब्राह्मणरूपं तथा खाण्डवदाहार्थं तस्य कर्मात्मा तेजोरूपमिति रूपद्वयं स्पष्टं दृश्यते। किञ्च, अचेतनादिषु चेतनदेवस्य विद्यमानत्वं तु ब्रह्मसूत्रेऽपि स्पष्टं– **अभिमानिव्यपदेशस्तु विशेषानिगतिभ्याम्।**[14] इति। तथाह्युक्तं यास्काचार्येण– **तासां महाभाग्यादेकैकस्या अपि बहूनि नामधेयानि भवन्ति। अपि वा कर्मपृथक्त्वात्।**[15] इति। ऐश्वर्यस्य वैविध्यात्तथा कर्मणां वैचित्र्याद्देवाः हि पृथक् पृथग्नाम्ना रूपेण च स्तूयन्ते।

**मीमांसानये देवतास्वरूपम् –**

मीमांसकानां नये तु शब्दमयी एव देवता। मन्त्रगतशब्दस्वरूपमेव ते देवतारूपेण कल्पन्ते। शबरस्वामिना तु पक्षत्रयं तदीये तु भाष्ये उल्लिखितम्– 1. अर्थो देवता, 2. शब्दविशिष्टोऽर्थो देवता तथा 3. शब्दो देवता। एतेषु शब्दो देवता इति तु सिद्धान्तिनां नयः। स च शब्दो विध्युल्लिखित एव स्यान्न तु तत्पर्यायवाची, विधिवाक्यस्थदेवतावाचकशब्देनैव यागस्य सम्बन्धत्वात्। तस्माद्विधिवाक्यस्थशब्द एव देवतास्वरूपो नान्य इति भवति स्पष्टम्। तथाहि सूत्रितम् – **विधिशब्दस्य मन्त्रत्वे भावः स्यात्तेन**

**चोदना।**[16] तच्च, विधिवाक्यस्थशब्दस्य देवतात्वप्रतीतिः मीमांसकानां नये प्रकारत्रयेण भूयते– तद्धितेन, चतुर्थीविभक्त्या तथा मन्त्रवर्णेन। तथाह्युक्तं भट्टपादेन–

**तद्धितेन चतुर्थ्या वा मन्त्रवर्णेन वा पुनः।**
**देवताया विधिस्तत्र दुर्व्वलं तु परं परम्॥**[17] इति।।

एवम्प्रकारेण नागेशकौण्डगागाभट्टादयः पण्डितास्तदीयेषु ग्रन्थेषु देवताप्रत्ययार्था विवेचिताः। देवताप्रत्ययार्थका बहवः पक्षा लभ्यते, परन्तु तन्नास्माकं मुख्यमालोच्यम्।

देवमुद्दिश्य द्रव्यत्याग एव याग इति तु भूमिकायामेवोक्तम्। **'इन्द्राय इदं न मम'** इत्यादिमानसव्यापार एव त्याग इत्यनेन प्रतीयते। स च उत्पत्तेरव्यवहितपरक्षण एव विनश्यति। कार्यनियतपूर्ववृत्तित्वं कारणत्वम्। अतः स्वर्गकामो यजेत इत्यादौ स्वर्गरूपफल-प्राप्तेरव्यवहितपूर्वमेव यागरूपकारणस्य उपस्थितिरावश्यिकी। तथाहि–

**अन्यथासिद्धिशून्यस्य नियता पूर्व्ववर्त्तिता।**
**कारणत्वं भवेत्तस्य त्रैविध्यं परिकीर्त्तितम्॥**[18]

अत्र तु यागेषु स्वर्गप्राप्तेर्नियतपूर्वभावित्वं न वर्तते। तस्माज्जन्मान्तरभाविस्वर्गोत्पत्तिं प्रति नास्ति यागकर्मणः कारणत्वम्। अतो यागस्वर्गफलयोः मध्ये मीमांसकैरपूर्वं कल्पितम्। अपूर्वलक्षणमुक्तं तन्त्रवार्तिककारेण तदीये ग्रन्थे–

**कर्मभ्यः प्रागयोग्यस्य कर्मणः पुरुषस्य वा।**
**योग्यता शास्त्रजन्या या सा पराऽपूर्वमुच्यते॥**[19] इति।।

अपूर्वस्य नैकेषु विभागेषु स्वर्गादिफलप्राप्तिं प्रति परमापूर्वमेव कारणमिति उच्यते मीमांसकैः। तथाहि शबरस्वामिनापि उक्तम्– **यागेन अपूर्वं कृत्वा स्वर्गं भावयेत्।**[20] अचेतनस्य फलदातृत्वं तु अप्रसिद्धमिति हेतोः यागस्याचेतनत्वात्फलदाने समर्थत्वं भवति प्रकटितं तस्मात् फलदातृत्वं कस्यापि चेतनवस्तुन एव स्वीकरणीयमिति हेतोः वादरायणेन सूत्रितम् – **फलमत उपपत्तेः।**[21] शङ्कराचार्येण सूत्रस्यास्य भाष्ये अपूर्वस्य कर्मफलो-त्पादकत्वं निराकुर्वन्नाह– **कर्मकार्यादपूर्वात्फलमुत्पत्स्यत इति, तदपि नोपपद्यते, अपूर्वस्याचेतनस्य काष्ठलोष्ठसमस्य चेतनेनाप्रवर्तितस्य प्रवृत्त्यनुपपत्तेः तदस्तित्वे च प्रमाणाभावात्।** इति। यद्यपि वादरायणेनेश्वरस्य फलप्रदातृत्वं स्वीकृतं श्रुतिप्रमाणात्। परन्तु जैमिनिनये तु तन्न स्वीकार्यम्। तन्नये धर्म एव फलदातृत्वं फलस्य दाता। जैमिनि-मतमपि तत्रैव सूत्रितं वादरायणेन– **धर्मं जैमिनिरत एव।** इति। कर्मानुष्ठानानां वैयर्थ्यापत्तिनिरसनाय मीमांसकैः धर्मस्यैव फलदातृत्वं स्वीकृतम्। तथाहि शङ्कराचार्येण

स्पष्टीकृतं तदीये भाष्ये– **तत्र च विधिश्रुतेर्विषयभावोपगमाद् यागः स्वर्गस्योपपादक इति गम्यते। अन्यथा ह्यननुष्ठातृको याग आपद्येत तत्रास्योपदेशवैयर्थ्यं स्यात्। किञ्च, ईश्वरस्तु फलं ददातीत्यनुपपन्नम्, अविचित्रस्य कारणस्य विचित्रकार्यानुपपत्तेर्वैषम्यनैर्घृण्यप्रसङ्गाद् अनुष्ठानवैयर्थ्यापत्तेश्च। तस्माद्धर्मादेव फलम्।**[22]

कुमारिलभट्टपादेन तदीये मङ्गलाचरणे विशुद्धज्ञानदेहाय – इत्यादिना ईश्वरवन्दनया ईश्वरस्य अस्तित्वं गौणतया स्वीकृतम्। नन्दीश्वराचार्येणापि– **ईश्वरे अनुमानं निरस्तं न तु ईश्वरोऽपि** – इत्यादिना ईश्वरस्स्वीकृतः। परन्तु ईश्वरस्यास्तित्वे अनुमानादिप्रमाणानि न स्वीकृतानि। आपदेवेन तथा लौगाक्षिभास्करेण वेदमूलकत्वमीश्वरसमर्पणपक्षमवलम्ब्य ईश्वरस्य सर्वफलदातृत्वं स्वीकृतम्। यद्यपि मीमांसकाः शब्दार्थयोः सम्बन्धकर्तृरूपेणेश्वरं न स्वीकुर्वन्ति। तथापि ते वैदिकेश्वरस्यास्तित्वं स्वीकुर्वन्त्यागमप्रमाणसिद्धत्वात्। परन्तु अनुमानप्रमाणसिद्धस्येश्वरस्यास्तित्वं निराकुर्वन्ति मीमांसकाः। तथाहि भट्टाचार्येण इदानीमनुपलब्धायां बृहतीटीकायामुक्तम्–

**यदीयशक्त्यनाविष्टं जगत्स्पन्दितुमक्षमम्।**
**युक्तिभिस्तमपह्नोतुं कः शक्तः परमेश्वरम्॥**[23]

एतैरुदाहरणैस्स्पष्टीभवति यद्यपि शबरादिप्राचीना ईश्वरस्य फलदातृत्वे सन्दिहाना अनुष्ठानस्य वैयर्थ्यनिरसनार्थमीश्वरस्य यागफलप्रदातृत्वं नैव स्वीकृतवन्तः, तथापि अर्वाचीनैर्मीमांसकैरीश्वरस्य फलदातृत्वे कारणत्वं तु स्वीकृतमेव। स तु वेदमूलमिति तेषां नयः। मानमेयोदयकारेण नारायणपण्डितेनापि आह– **सिद्धस्तार्किकेश्वरनिरासः। वैदिकेश्वरः परमकारुणिकः पुनरस्माकमनुगुण एव।**

**मीमांसानये देवतायाः विग्रहवत्त्वनिरासः –**

शबरस्वामिना नवमाध्यायस्य प्रथमपादस्य चतुर्थाधिकरणे देवताधिकरणनामके देवतानां विग्रहवत्त्वस्य पूर्वपक्षिमतोल्लेखपूर्वकं खण्डनं विहितम्।

पूर्वपक्षिणो वैदिकमन्त्रोल्लेखपूर्वकं देवतायाः विग्रहवत्त्वे युक्तिं वदन्ति – **इमे चिदिन्द्र रोदसी अपारे तत्संगृभ्णा मघवन् काशिरित्ते।** (ऋ. 3.30.5) मन्त्रेऽस्मिन्निन्द्रस्य काशेः मुष्टेः स्तुतिर्विधीयते। अपि च, **जगृभ्मा ते दक्षिणमिन्द्र हस्तम्** इत्यत्रापि इन्द्रस्य दक्षिणहस्तस्य उल्लेखो दृश्यते, तत्तु पुरुषस्य भवति। तस्मादिन्द्रादिदेवतानां विग्रहवत्त्वं तु स्वीकार्यम् एव इति पूर्वपक्षं निराकुर्वन् शबराचार्येणोक्तम्– **नियोगतो यस्यापि पौरुषविधिकैरङ्गैर्नास्ति संयोगः। पौरुषविधिकैरङ्गैस्तस्यापि स्तुतिर्भवति।** तेन तत्रोदाहरणमपि प्रकटीकृतम्। तत्र नदीसूक्तादुदाहृतं यद्यथा– **सुखं रथं युयुजे**

**सिन्धुरश्विनम्।** (ऋ.10.75.9) इति। किञ्च,

> **एते वदन्ति शतवत्सहस्रवदभिक्रन्दन्ति हरितेभिरासभिः।**
> **विष्टवी ग्रावाणः सुकतः सुकृत्यया होतुश्चित्पूर्वे हविरविद्यमाशत॥**
>
> (ऋ. 10.94.2)

इत्यादिषु स्थलेषु रथयुक्तसिन्धोः रथस्य तथा मुखविशिष्टग्राव्णः स्तुतिर्दृश्यते पुरुषविधैकतया। शबराचार्यस्य नये तु तस्मात्स्तुतिवचनाद्देवतायाः पुरुषविधत्वे अर्थापत्तिर्न भवति। किञ्च, **तु विग्रीव...** इत्यादिस्थले ग्रीवाया उल्लेखादिन्द्रस्य पुरुषविधत्वमिति चेन्न, ग्रीवासत्त्वे प्रत्यक्षप्रमाणाभावात्। किञ्च, अपुरुषविधपदार्थादिष्वपि स्तुत्युपपत्तेस्तथैव। किञ्च, **चक्षुमते शृण्वते ते ब्रवीमि** इति मन्त्रमिदं चक्षुष्मतां स्तुत्यर्थमुच्चारयति। अत्र चतुर्थीनिर्देशेन वचनसम्बन्ध एव ज्ञाप्यते, न चक्षुस्सबन्धः। स्मृतिप्रमाणात्तथान्यार्थदर्शनाद् देवताया विग्रहादिवत्त्वमस्ति। अपि तु दृढीभवति। उपचारादिना **तुविग्रीवो वपोदरः सुबाहुरन्धसो मदे। इन्द्रो वृत्राणि जिघ्नते।** (8.17.8) इत्यनेन मन्त्रेण ज्ञायते यद् ग्रीवा, उदरं, बाहू इति पुरुषविग्रहदर्शनं भवति। तस्माद् विग्रहवती देवता। स्मृत्युपचारान्यर्थदर्शनप्रमाणाद् देवतायाः विग्रहवत्त्वं यद्यपि ज्ञायते, तथापि मीमांसकानां नये तन्न ग्राह्यम्।

अपि च, **अद्धीन्द्र पिब च प्रस्थितस्य** (ऋ. 10.116.7), **विश्वा सनानि जठरेषु धत्त** (ऋ. 10.95.10), **एकया प्रतिधापिबतसाकं सरांसि त्रिशतम्** (ऋ. 8.77.4) इत्यादिमन्त्रेषु तथा स्मृत्युपचारादिना यदवगम्यते देवतानां भोजनसामर्थ्यम्। तदपि मीमांसका देवातानां विग्रहवत्त्वे प्रमाणतया न स्वीकुर्वन्ति, तेषां भोजनपानाद्यभावात्। तेषां नये यदि देवता भोजनादिकं गृह्णन्ति तर्हि तदुद्देश्येन प्रदत्तं हव्यादिपदार्थाः क्रमेण क्षीयेरन्। परन्तु तत्तु न दृश्यते। किञ्च, यद्येवमुच्यते यतो देवता मधुकरीवदन्नरसभोजिनी, यतः क्षणैः तद्धविः शुष्यतामाप्रोतीति। तदपि मीमांसकाः निराकुर्वन्तः वदन्ति यत्तु वायुना एव दीर्घसमयेन क्षणैः शुष्यन्ते नास्ति तत्र देवताया भोजने प्रमाणम्। तत्र हेतुर्हि भाष्य-कारेणोक्तम्– **तन्न। स्मृतेर्मन्त्रार्थवादमूलत्वात्।**[24] स्मृतेरुपचारादीनाञ्चार्थवादमूलत्वात्। अर्थवादस्य स्वार्थाभावान्न ग्राह्यमिति देवताया भोजनाभावः सिद्धः। मन्त्रार्थवादमूल-त्वात्स्मृत्यादिवाक्यानां देवताया विग्रहवत्त्वे प्रमाणत्वं न स्वीकार्यम्। अर्थवादादिकं तु तात्पर्यशून्यं स्तुत्यादिपरकं यथा सिन्धोः रथसंयोगादिवर्णनम्, तद्वदेव। तस्मात्तेषां स्वार्थे तात्पर्यशून्यत्वं प्रतिपादयन्नाह खण्डदेवाचार्यः– **सकृदुच्चारितस्य शब्दस्यानेकार्थबोधकत्वा-भावानुरोधेन चार्थवादानां शक्यार्थे प्रामाण्यानुपपत्तेर्न देवताविग्रहस्वीकारः।**[25]

शबरस्वामिना पुनस्तु पूर्वपक्षिनय उदाहृतो यत्स्मृत्यादिना देवताया अर्थपतित्वमपि

ज्ञायते। किञ्च, आर्थपत्याच्च देवता विग्रहवती इति सम्पूर्णफलस्य स्वामित्वात्सा विग्रहवती इत्येवं शङ्कायामुच्यते मीमांसकैः। मतमिदं निरुक्तेऽपि उक्तम्– **ऋषिः यस्यां देवतायाम् आर्थपत्यम् इच्छन् स्तुतिं प्रयुङ्क्ते, स मन्त्रः तद्देवतो भवति।**[26] किञ्च, स्मृत्यादिषु देवग्रामो देवक्षेत्रमित्यादिकं तु दृश्यते। वेदेषु च **इन्द्र दिवो इन्द्र ईशे पृथिव्या इन्द्रो अपामिन्द्र इत्पर्वतानाम्। इन्द्रो वृधामिन्द्र इन्मेधिराणामिन्द्रः क्षेमे योगे हव्य इन्द्रः** (ऋ. 10.89.10) इति। तथा **ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुषः** (ऋ. 7.32.22) इत्यादिप्राप्तमन्त्रेषु इन्द्रस्य पार्थिवपदार्थानां तथा द्युलोकस्य स्वामित्वं वर्ण्यते। किञ्च, चिज्जगतः स एव स्वामीति तस्यार्थपत्यं दृश्यते वेदेषु।

अपरा पूर्वपक्षिणो युक्तिर्हि देवतानां प्रसन्नताऽपि स्मृत्यादिप्रमाणतो ज्ञायते। स्मृत्यादिषु **प्रसीदति देवता** इत्यादिवचनं प्राप्यते। किञ्च, उपचारोऽपि दृश्यते– **प्रसन्नोऽस्य पशुपतिः पुत्रोऽस्य जातः** इत्यादिकं, वेदेषु अपि **आहुतिभिरेव हुतादो देवान् प्रीणाति तेऽस्मै प्रीता इषमूर्जं नियच्छन्ति** इति (मै. सं. 1.4.6.) इत्यादिषु देवतानां हविर्भक्षणेन प्रीततां प्राप्य इष्टफलप्रदातृत्वं वर्णितम्।

किञ्च, शबरस्वामिना देवताया आर्थपत्यमीशित्वञ्च निराकुर्वन्नाह– **यदुक्तं स्मृत्युपचारान्यर्थदर्शनैरीशाना देवतेत्यवगम्यत इति। तन्न। स्मृतेर्मन्त्रार्थवाद-मूलत्वादित्युक्तम्**। देवग्रामः देवक्षेत्रमित्यादि यदुक्तं तदपि उपचारमात्रमिति मीमांसकानां राद्धान्तः। यतो यो यदभिप्रेतं विनियोक्तुमर्हति तत्तस्य स्वम्। न च ग्रामं क्षेत्रं वा यथाभिप्रायं विनियुङ्क्ते देवता। तस्मान्न सम्प्रयच्छतीति मीमांसकानां कथनम्। देवतामुद्दिश्य त्यक्ताद् ग्रामाद् क्षेत्राद् वा देवपरिचारकाणां भूतिर्भवति। किञ्च यदन्यार्थदर्शनवचनम् **इन्द्रो दिव इन्द्र ईशे** इत्यादिकं निराकुर्वन्तः युक्तिं प्रदर्शयन्ति– **प्रत्यक्षाम् अनीशानां देवतामुपलभ्याध्यवस्यामो भाक्त एष शब्द इति।** देवताया अर्थपतित्वं तु वेदादिवचनेन प्रतीयते, नास्ति तस्य प्रत्यक्षसिद्धिः। वस्तुतस्तु तेषां नये देवतायै अर्पितं धनादिकं तु तत्परिचारकाः पूजका एव उपभुञ्जते इति तु प्रत्यक्षसिद्धम्, नास्ति तत्र संशयलेशः। किञ्च, देवता यत्करोति सम्पादयति वा तत्सर्वं तु तत्परिचारकाणामभिप्रायानुसारम्। तेषामभिप्रायानुरूपमेव कार्यं सम्पादयति देवता तस्मान्न स ईशानो भवति। अर्थपतिः स एव यस्य स्वाभिप्रायाद् विनियोगो भवति। पराभिप्रायानुसारे विनियोगे देवतानां नास्ति आर्थपत्यमीशित्वं वा।

अपि च, देवतासम्प्रदानको ह्ययं यागः श्रूयते। सम्प्रदानकारकं तावत् – **कर्मणा यमभिप्रैति स सम्प्रदानम्।** कर्मणो यो अभिप्रेततरं तदेव संप्रदानम्। **तस्माद् देवता। तु न गुणभूता। अपि तु देवतां प्रति गुणभूते द्रव्यकर्मणी। अपि च, यागो नाम देवतापूजा। पूजा च पूजनीयं प्रति गुणभूता लोके दृश्यते। तदेतदतिथिवद्**

**द्रष्टव्यम्। किञ्चिदतिथेः परिचरणं सर्वं तदतिथिप्रयुक्तम्। एवमिह यागादिकमपि देवताप्रयुक्तमेव। पुनः दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत** इत्यादिषु च धर्मस्य फलसम्बन्धत्वं देवतासम्बन्धत्वञ्च श्रूयते। तेन श्रुतिप्रयुक्तत्वात् तत्प्राबल्याद् देवताप्रयुक्त एव धर्म इति पूर्वपक्षनयः। मीमांसकानां नये तु मतमिदं न ग्राह्यम्। यद्यपि चतुर्थ्या तद्धितेन च देवताया अभिप्रेततमत्वमवगम्यते। तथापि फलसंयोगस्तु यागस्यैव वर्तते करणश्रुत्या। फलस्य कारणता तु यागे एव वर्तते, न तु देवतायाम्। फलं तु पुरुषार्थाः। तेषु एव पुरुषाणां प्रवृत्तिः, न तु देवतायाम्। पुनः फलवतो यजेः साधनत्वे सति देवताया अभिप्रेतता उत्पद्यते। तेन देवता न स्वर्गफलस्य प्रयोजिका अपि तु कर्म एव।

किञ्च, अन्तिमयुक्तिर्हि –**अतिथौ तत्प्रधानत्वम्** इति। आतिथ्ये हि तस्यैव प्राधान्यं तत्प्रीतिर्हि विधीयते। स्मृत्यादौ उक्तं किल– **अतिथिर्येन सन्तुष्टः तथा कुर्यात् प्रयत्नतः** इत्यादिकम्। किञ्च, अतिथिः परिचरितव्यः। यद्धि तस्मै न रोचते तत्तु बलात् न करणीयम्। तद्वद् यज्ञादिषु तु देवतायाः प्रीतेर्विधानार्थं एव आहुतयः प्रदीयन्ते। तत्तु न युक्तम्। स्मृत्युपचारान्यार्थदर्शनप्रमाणैः यदुक्तं देवतायाः प्रीतिसम्पादनेन फलदातृत्वं, तदपि न युक्तम्- **अन्यस्य विधेराम्नायात्। तृप्त एवैनमिन्द्र प्रजया पशुभिस्तर्पयन्ति** इत्यादिषु ऐन्द्रस्य हविषो विधानम्। तस्माद्देवता न प्रयोजिका। तस्माद्देवतायाः फलसम्बन्धित्वमपि नास्ति, येन तदर्थं इमं परिचर्येत्। भाट्टदीपिकायामुक्तम्– **देवतायामपि मन्त्रार्थवादेतिहासादिवशात् सत्यप्यपूर्वे तज्जनितदेवताप्रसादादेव फलोत्पत्त्यवगतेः प्रसादस्य च मन्त्रजन्यप्रकाशव्यतिरेकोत्पत्तौ प्रमाणाभावात् तदर्थत्वम्।**[27]

यज्ञादिषु देवतायाः प्रीतिप्रधानत्वं न भवति शास्त्रप्रमाणाभावात्। **यजेत स्वर्गकामः** इत्यादिषु तु यज्ञकर्मणः एव प्रयोजकत्वं देवताप्रसादस्तु तत्र द्वारम् इति सिद्धम्। अपि तु देवतात्वं त्यागकालीनोच्चारणकर्मीभूतशब्दप्रतिपाद्यम्। तने शब्दमात्रस्यैव देवत्वम्। न तु विग्रहादिमत्त्वानाम्। उपासनादौ तु ध्यानमात्रं परमाहार्यमीश्वरस्य विग्रहादिमत्त्वमिति निष्कर्षः। एतदेव मतं समर्थयन् भट्टाचार्यः टुप्टीकायामपि आह– **लोकेऽर्थकृता विवक्षा भवति। वेदे तु शब्दकृता। शब्देन च प्रत्यासन्नस्य यागस्य फलसाधनत्वात् प्राधान्यं, देवतायाश्च गुणत्वं विज्ञायते।**

**उपसंहारः –**

निरुक्तकारकृतपुरुषापुरुषविधदेवताकारचिन्तनं तु आधिदैवतं तथा आधियाज्ञिकम्। निरुक्तकारेण तु आध्यात्मिकपक्षमवलम्ब्य किमपि नोक्तं, तन्नये आध्यात्मिकदेवता तु ब्रह्म एव सर्वजगत ईश्वरः शरीरावयवरहितः परमात्मा।

परन्तु जैमिनिना कृतं देवताविषयकमाकारचिन्तनादिकं तु केवलम् आधियाज्ञिकम्।

यतो मीमांसकानां नये यज्ञे सर्वेषां मन्त्राणां प्रयोगस्य यथार्थता वर्तते एव। यज्ञकर्मणः सार्थकत्वसम्पादनमेव तेषां लक्ष्यभूतत्वमिति तु सर्वजनविदितम्। मीमांसाशास्त्रस्य क्षेत्रं तु यागकर्मणि एव सीमितम्। तस्माद् यज्ञभिन्नदेवताचिन्तने नास्ति तेषामाग्रहः। तथापि अर्वाचीनैः कैश्चन मीमांसकैः परमकारुणिकस्य भगवतः अस्तित्त्वं तु स्वीकृतमेव।

शबरस्वामिना यदुक्तं देवतायाः अविग्रहवत्त्वं तत्तु नितरां समीचीनं सत्यञ्च। विग्रहवद् वचनादिकं मन्त्रार्थवादमूलकं मन्त्राणां सम्यक् अनुशीलनेन तु ज्ञायते यत् देवताः शरीररहिताः। मन्त्रेणैव केवलं तेषां बोधो भवति। युधिष्ठिरमीमांसकेन तु एतदेव मतं स्वीकृतम्। तन्नये दयानन्दसरस्वतिना यदुक्तं तत्तु सत्यं यतो मन्त्रस्य विनियोगकाले लिङ्गविशिष्टमन्त्रस्यैव बोधो भवति, न तु केवलं देवतावाचकपदस्य। वैदिकमन्त्राणां सामान्यालोचनमेव तु मूर्तिपूजायाः कारणं, तन्न तात्त्विकालोचनेन समर्थतामाप्नोति। तथाह्युक्तं दयानन्दाचार्येण– **परमेश्वरस्तु खल्वष्टोपयोगित्वेनैवोपास्योऽस्ति। नातो वेदेषु ह्यपरा काचिद्देवता पूज्योपास्यत्वेन विहितास्तीति निश्चीयताम्।**[28] देवताशब्दो-च्चारणेन तल्लिङ्गकमन्त्र एव गृह्यते। तन्नये मन्त्रो एव देवताशब्दवाच्यो भवति। तथाहि उक्तम्– **यत्र यत्र देवतोच्यते तल्लिङ्गो मन्त्रो ग्राह्य इति।** अपि चोक्तं– **यदेवार्थप्रतीतिकारणं दैवतं प्राकाश्य येन भवति स मन्त्रो देवताशब्दवाच्यो भवति।**[29] इति शम्।।

*

## सन्दर्भाः


1. निरुक्तम्, 7.15
2. तदेव, 7.1
3. तदेव, 7.12
4. तदेव, 7.1
5. तदेव, 7.5
6. ऋग्वेदः, 1.32.1
7. तदेव, 10.10
8. तदेव, 6.47.8
9. तदेव, 2.18.4
10. तदेव, 10.116.7
11. तदेव, 1.1.1
12. तदेव, 10.94.2
13. तदेव, 10.75.9
14. ब्रह्मसूत्रम्, 2.1.5
15. निरुक्तम्, 7.5
16. मीमांसासूत्रम्, 10.4.23
17. तन्त्रवार्तिकम्, 2.2.9.23
18. भाषापरिच्छेदः, कारिका– 16
19. तन्त्रवार्तिकम्, 2.1.2
20. शाबरभाष्यम्, 2.1.2
21. ब्रह्मसूत्रम्, 3.2.38
22. ब्रह्मसूत्रशाङ्करभाष्यम्, 3.2.40
23. बृहती टीका।
24. शाबरभाष्यम्, 9.1.4.9
25. भाट्टदीपिका, 9.1.4.6–10
26. निरुक्तम्, 7.1.1
27. भाट्टदीपिका, 10.4.23–24
28. ऋग्वेदादिभाष्यभूमिका, पृ. 74
29. तदेव, पृ. 62


*

# सांख्यदर्शनेऽन्तःकरणानि

**अलोकबेपारी**

**प्राक्कथनम्**

सांख्यमतानुसारमनाश्रित–एक–लिङ्ग–निष्क्रिय–अहेतुमत्–नित्य–निरवयवस्वरूपा मूलप्रकृतिः, पुनश्च पुरुषः त्रिगुणशून्य–चेतन–अविषय–असाधारण–अकारण–प्रसवधर्मिस्वरूपः। तथा चोक्तं सांख्यकारिकायाम्–

**हेतुमदनित्यमव्यापि सक्रियमनेकाश्रितं लिङ्गम्।**
**सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम्॥**
**त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसवधर्मि।**
**व्यक्तं तथा प्रधानं तद्विपरीतस्तथा च पुमान्॥**[1] इति।।

अत एव प्रकृतिर्जडात्मिका पुरुषश्च चेतनस्वरूपः। एवम्प्रकारयोः प्रकृतिपुरुषयोः संयोगः खलु जगदुत्पत्तिकारणमस्ति। परन्तु अत्रैका जिज्ञासा समुद्भासिता, यथा इतरेतरधर्म-विशिष्टप्रकृतिपुरुषयोः संयोगः कथं सम्भवति? अत्र पङ्ग्वन्धयोर्दृष्टान्तो दृश्यते। पङ्गुर्गतिशक्तिविहीनः, अतः पङ्गुः यदि तदीयाभीष्टप्रदेशमीप्सति तर्ह्यवश्यमेव गतिशक्तिसंयुक्तेनाऽन्धेन साकं संयोगं कुर्यात्। पुनश्च अन्धस्तु दर्शनशक्तिविहीनः, पङ्गुवत् अभीष्टप्राप्त्यर्थं दर्शनशक्तियुक्तपङ्गुना साकं तस्य संयोगः स्यात्। अत एव अन्धस्कन्धारूढः पङ्गुरन्धं मार्गं प्रदर्शयति। एवम्प्रकारेण तौ परस्परकार्यसाधकौ भवतः। तथैव प्रकृतिपुरुषक्षेत्रे अपि, प्रधानारूढस्सन् चेतनपुरुषः प्रधानं जगत्सृष्टिकार्येषु प्रवर्तयति। पुरुषस्य भोगापवर्गौ साधयितुं जगत्सृष्टिकार्येषु प्रकृतिः संयुक्ता भवति। तथा चोक्तं सांख्यकारिकायाम्–

**पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य।**
**पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः॥**[2] इति।।

**अन्तःकरणम्**

'अन्तः' 'करणम्' इति शब्दद्वयसंयोगत्वात् अन्तःकरणमिति पदमुत्पद्यते। अत्र

'अन्तः' इत्यव्ययपदम्, यस्यार्थास्सन्ति गुप्त–अभ्यन्तरादयः। पुनश्च 'कृ'–धातोरुत्तरात् करणवाच्ये ल्युटि प्रत्यये करणमिति पदं जायते। करणशब्दस्साधारणतः साधकतमं करणमित्यर्थे प्रयुज्यते, परन्तु साधकतमं करणं किम्? उच्यते क्रियासिद्धौ यत्प्रकृष्टकारणं तदेव करणम्। तथा चोक्तमन्नम्भट्टाचार्येण–

**'असाधारणं कारणं करणम्।'**[3] इति।

अत एव आन्तरिकसाधनम्, यत्क्रियासिद्धौ अत्यन्तोपकारकमिति अन्तःकरणपदस्यार्थः। '**क्रियते अनेन इति करणम्**' इति व्युत्पत्त्या पुरुषभोगापवर्गयोः साधकतमतत्त्वमेव करणमित्युच्यते। एतेषां करणानां भेदद्वयं विद्यते, बाह्यकरणम् आभ्यन्तरकरणञ्च। बाह्यकरणेषु पञ्च ज्ञानेन्द्रियाणि पञ्च कर्मेन्द्रियाणि चाऽन्तर्भुक्तानि सन्ति, परन्तु अन्तःकरणेषु बुद्धि–मनः–अहङ्कारा अन्तर्गतास्सन्ति। सांख्यकारिकायामुक्तम्–

**अन्तःकरणं त्रिविधं दशधा बाह्यं त्रयस्य विषयाख्यम्।**[4] इति।

अतस्सांख्यदर्शनेऽन्तःकरणपदेन बुद्धिर्मनोऽहङ्कारश्चेत्यभिधीयते। परन्तु योगदर्शने बुद्धिः, अहङ्कारः, मनश्चेति त्रिधा विभक्तमस्यान्तःकरणं चित्तमिति व्यवहरति। वेदान्तवैशेषिकदर्शनयोः मनः, बुद्धिः, अहङ्कारः, चित्तञ्चेति चतुर्विधान्तःकरणं स्वीकृतम्।

**अन्तःकरणस्योत्पत्तिः**

प्रकृतिपुरुषयोः संयोगत्वाज्जगत्सृज्यते। मूलप्रकृतिरविकृतिः, परन्तु अविकृतिप्रकृतेर्महत्, महदोऽहङ्कारः, पुनश्च सात्त्विकाहङ्कारात् ज्ञानेन्द्रियपञ्चकं कर्मेन्द्रियपञ्चकं मनश्चेति एतान्येकादशेन्द्रियाणि तथा च तामसिकाहङ्कारात् पञ्च तन्मात्राणि जायन्ते। तथा चाऽवलोक्यते सांख्यकारिकायाम्–

**प्रकृतेर्महांस्ततोऽहङ्कारस्तस्माद् गुणश्च षोडशकः।**
**तस्मादपि षोडशकात् पञ्चभ्यः पञ्चभूतानि॥**[5] इति।

अत एव सृष्टिक्रमे प्रकृतितो बुद्धितत्त्वस्य प्रथमविकासो भवति। बुद्धेरहङ्कारः, अहङ्कारस्य सात्त्विकांशान्मनश्च जायते। एतानि त्रीण्यन्तःकरणानि इत्युच्यन्ते सांख्यदर्शने। एवम्प्रकारमस्ति अन्तःकरणत्रयस्य उत्पत्तिः।

**अन्तःकरणस्य स्वरूपं तद्वृत्तिश्च–** अधोलिखितेऽन्तःकरणस्य स्वरूपं तद्वृत्तिश्च यथामति आलोच्यते –

**( क ) महत् बुद्धिः वा**

सांख्योपदिष्टजगत्सृष्टिप्रक्रियायाम्प्रकृतेः प्रथमविकारोऽस्ति महत्तत्त्वम्, पुनश्च

सुखदुःखमोहात्मकजगदुत्पत्त्यर्थं बीजरूपमिदम्महत्तत्त्वमिति। बुद्धिः, ख्यातिः, मतिः, प्रज्ञा, प्रख्या, ज्ञानञ्चेति पर्यायवाचिनश्शब्दास्सन्ति महत्पदस्य। तदुक्तञ्च युक्तिदीपिकाकारेण– **महान् बुद्धिर्मतिर्ब्रह्मपूर्तिः ख्यातिरीश्वरी विखर इति पर्यायाः** इति। संसारकार्येषु सर्वकार्येषु च अतीव महत्तत्त्वात्कारणत्वाच्च तत्त्वस्याऽस्य महदित्यन्वर्थसंज्ञा। बुद्धेरसाधारणलक्षणमस्ति प्रतिविषयाध्यवसायः। अत्राऽध्यवसायो नाम निश्चयात्मिका वृत्तिः, अत एव 'गौरेवायम्' 'पुरुष एवायम्' चेतीत्थम्प्रकारेण कस्यचिद्वस्तुनो निश्चयात्मकस्वरूपबोधकतत्त्वं भवति बुद्धिर्महद्वा। अपि च सांख्यप्रवचनभाष्येऽवलोक्यते–

**यदेतद्विस्तृतं बीजं प्रधानपुरुषात्मकम्।**
**महत्तत्वमिति प्रोक्तं बुद्धितत्त्वं तदुच्यते॥**[7] इति।।

बुद्धिरियं स्वयम्प्रकाशस्वरूपा पुनश्च विषयाणां प्रकाशकस्वरूपा।[8] सत्त्वरजस्तमोगुणात्मिका प्रकृतिरचेतना जडा च, तस्माद्विकृतिर्बुद्धिरपि जडाऽचेतना च भवति। तथापि पुरुषसान्निध्यवशात् बुद्धिरियं चेतनावदिव प्रतीयते तथा च बुद्धिसंयोगात्पुरुषः कर्ता भोक्ता चेव प्रतिभाति। प्रसङ्गेऽस्मिन् सांख्यकारिकायामीक्ष्यते यत् –

**तस्मात् तत्संयोगादचेतनं चेतनावदिव लिङ्गम्।**
**गुणकर्तृत्वे च तथा कर्त्तेव भवत्युदासीनः॥**[9] इति।।

बुद्धेर्महतो वा रूपद्वयमस्ति, तद्यथा सात्त्विकं तामसिकञ्च। सात्त्विकस्वरूपबुद्धितो धर्मज्ञानवैराग्यैश्वर्याणि अभिव्यक्तानि भवन्ति। तत्र धर्मो नाम अभ्युदयनिःश्रेयसहेतुः,[10] अर्थात् स्वराज्य–साम्राज्याद्यैश्वर्यविशेषोऽभ्युदयपदस्य कैवल्यमिति च निःश्रेयसपदस्याऽभिप्रायोऽस्ति। एतयोर्हेतुरस्ति धर्मः, महर्षिकणादमुनिना प्रपञ्चितमेवम् –

**यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः।**[11] इति।

तत्र यागदानाद्यनुष्ठानवशात् जायमानधर्मः खलु अभ्युदयहेतुः, परन्तु यमनियमासनाद्यष्टाङ्गयोगानुष्ठानत्वात् उत्पन्नधर्मो निःश्रेयसहेतुर्भवतीति ध्रुवम्। तथा चोक्तं श्रीवाचस्पतिमिश्रेण– **तत्र यागदानाद्यनुष्ठानजनितो धर्मोऽभ्युदयहेतुः, अष्टाङ्गयोगानुष्ठानजनितश्च निःश्रेयसहेतुः।**[12] इति।

'ज्ञा'–धातोरुत्तरात् भावे ल्युटि प्रत्यये ज्ञानमिति पदन्निष्पद्यते। बुद्धितः पुरुषस्याऽन्यथाख्यातिर्ज्ञानम्, तदुक्तञ्च श्रीवाचस्पतिमिश्रेण–**गुणपुरुषान्यतराख्यातिर्ज्ञानम्।**[13] इति। तज्ज्ञानं द्विविधम्, यथा– बाह्यमान्तरञ्च ज्ञानम्। बाह्यज्ञानन्नाम लौकिकवस्तूनां ज्ञानं पुनश्च प्रकृतिपुरुषयोर्भेदज्ञानमान्तरज्ञानं कथ्यते।

विरागस्य भाव इति वैराग्यम्। वैराग्यन्नाम रागाभाव इति, अभीक्ष्णं विषयानुरञ्जनेच्छा रागः। इतोऽपि सुखाभिज्ञस्य सुखानुस्मृतिपूर्वः सुखे तत्साधने वा यो गर्धस्तृष्णा लोभः स राग इति योगसूत्रीयव्यासभाष्यम्। रागमिमं तथा च विषयभोगलिप्सां परित्यज्य भोगवासनारहिता या अवस्था जायते, तद्विरागनाम्नाऽभिधीयते। प्रशस्तपादाचार्येण वैराग्यलक्षणमेवं कृतम्–

**दोषदर्शनात् विषयत्यागेच्छा वैराग्यम्।** इति।

पुनश्च विरागोऽयं यतमान–व्यतिरेक–एकेन्द्रिय–वशीकारसंज्ञकैर्विभज्यते। तत्र यतमानवैराग्यमाश्रित्य सांख्यतत्त्वकौमुदीकारेणोक्तम्– **'रागादयः कषायश्चित्तवर्तिनः, तैरिन्द्रियाणि यथास्वं विषयेषु प्रवर्त्यन्ते। तन्माऽत्र प्रवर्तिषत विषयेष्विन्द्रियाणीति तत्परिपाचनायारम्भः प्रयत्नो यतमानसंज्ञा'।**[15] इति। अर्थात् चित्ते विद्यमानानि रागद्वेषेर्ष्यासूयादिमलानि इन्द्रियाणि स्वस्वविषयेषु प्रेरयन्ति। परन्तु रागद्वेषादिमलानामेतत्कार्यं निवारयितुं पुनश्च तेषां परिपाचनार्थं मैत्रीकरुणादिभावनानुष्ठानं कुर्यादिति प्रयत्नः यतमानसंज्ञको विरागः। द्वितीयस्तु व्यतिरेकवैराग्यम्, यतमानसंज्ञकविरागप्राप्त्यनन्तरं कियत्परिमाणानि मलानि अनश्यन्, पुनश्च कियत्परिमाणानि अवशिष्टानि सन्तीति विषयद्वयं निर्णेतव्यम्। अथोऽवशिष्टमलानि विमोचयितुं प्रयत्न एव व्यतिरेकविरागः। इन्द्रियप्रवर्तनाऽसमर्थतया पक्वानामौत्सुक्यमात्रेण मनसि व्यवस्थापनमेवेकेन्द्रियसंज्ञकवैराग्यमिति कथ्यते। स्रक्–चन्दनान्नपानादिदृष्टविषयेषु तथा च वेदवर्णितस्वर्गाद्यानुश्रविकविषयेषु वितृष्णा खलु वशीकारसंज्ञको विरागः। विषयेऽस्मिन् भगवता पतञ्जलिना उक्तम् –

**दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यम्।**[16] इति।

ऐश्वर्यमपि बुद्धेर्धर्मः, तस्मात् अणिमा–महिमा–लघिमा–प्राप्ति–प्राकाम्य–ईशित्व–वशित्वानि–यत्र कामावसायित्वं प्रादुर्भवति। तत्राऽणिमाऽणुभावविशिष्टः, अणिमप्राप्तौ छिद्ररहितशिलायामपि प्रवेष्टुमर्हति। लघिमा भवति लघुभावसमन्वितः, यतः सूर्यलोक-मरीचीनालम्ब्य सूर्यलोकं याति। गरिमेति गुरुभावविशिष्टः, यतो गुरुर्भवति। महतो भाव इति महिमा, यस्मात्प्रभावादणुशरीरविशिष्टजनाः पर्वतादिविशालाकृतिविशिष्टशरीरं धारयितुं शक्नुवन्ति। ईप्सितं यत्किमपि वस्तु प्राप्तुं सामर्थ्यमेव प्राप्तिः, यथा अङ्गुल्यग्रेणापि स्पृशति चन्द्रमसमिति। प्रकामस्य यथेप्सितस्य भावः प्राकाम्यम्, पुनश्च इच्छाया अनभिघातो-ऽर्थात् सर्वदा सर्वत्र विघ्नरहितपूर्वकमभिलाषस्य पूर्णता एव प्राकाम्यमिति। सूक्ष्मस्थूल-भूतानि स्वीयवशीभूतकरणमेव वशित्वम्, वशित्वप्राप्ते सति साधकः कदापि पराधीनो नैव भवति। ईशिनो भाव इति ईशित्वं पुनश्च ईशित्वं नाम पृथिव्यादिभूतपदार्थानां

घटपटादिभौतिकपदार्थानाञ्च उत्पत्ति–यथावत्स्थिति–विनाशसामर्थ्यम्। ईशित्वस्य प्रकारान्त-स्वरूपेण यत्र कामावसायित्वमुच्यते, यच्च सत्यसंकल्पता।

**( ख ) अहङ्कारः**

अहङ्कारस्तु द्वितीयान्तःकरणम्, यत्प्रकृतिविकृतिविशिष्टात् महतो जायते। लक्षण-मस्त्यस्य– **'अभिमानोऽहङ्कारः'।**[१८] इति। अत एव इन्द्रियकर्तृकगृहीतविषयेषु मनस्संकल्पितविषयेषु च 'अहमधिकारी' 'इत्येतन्मम' चेतीत्थम्प्रकारोऽहम्भावस्वरूपोऽभिमानः खलु अहङ्कार इति नाम्नाऽभिधीयते।

अहङ्कारोऽयं प्रकृतिविकृतिस्वरूपः। यतो हि मूलप्रकृतेर्विकृतिर्महत्, तस्य विकृति-स्तथा चेकादशेन्द्रियाणां पञ्चतन्मात्राणां प्रकृतिः। प्रकाशलाघवकारणादेकादशेन्द्रियगणः सात्त्विकः, अत एव सात्त्विकाहङ्कारात् चक्षुःश्रोत्रघ्राणरसनात्वग्वाक्पाणिपादपायूपस्थमनां-स्युत्पद्यन्ते। रूपशब्दगन्धरसस्पर्शालोचनमात्रवृत्तिरस्ति पञ्चज्ञानेन्द्रियाणामिति। पुनश्च पञ्च-कर्मेन्द्रियाणां क्रमानुसारं वचन-आदान-विहरण-उत्सर्ग-आनन्दवृत्तयः अवलोक्यन्ते। तथा चोवाच–

**रूपादिषु पञ्चानामालोचनमात्रमिष्यते वृत्तिः।**
**वचनादानविहरणोत्सर्गानन्दाश्च पञ्चानाम्॥**[१९] इति।।

तामसाहङ्कारात् तन्मात्राण्युत्पद्यन्ते। तन्मात्रशब्दः सूक्ष्मतत्त्वबोधकः, तन्मात्रपदेनाऽत्र शब्दस्पर्शरूपरसगन्धाः सूक्ष्मभूताः स्वीक्रियन्ते। भूतान्येतानि न तु सामान्यप्रत्यक्षाणि, केवलमात्रं योगिप्रत्यक्षाणि भवन्ति। प्रकृतिर्यथैव सत्त्वरजस्तमोगुणात्मिका जगन्मूलकारणञ्च भवति तथैव प्रकृतेर्विकृतिसूक्ष्मभूतान्यपि सत्त्वरजस्तमोगुणसमन्वितानि, यतो हि कारणगुणः कार्येष्वन्तर्भवति। एतेषां गुणानां तारतम्यवशात्शब्दस्पर्शादिसूक्ष्मभूतेभ्यो महाभूतानि जायन्ते। यथा– शब्दतन्मात्रात् आकाशः, शब्दतन्मात्रसहितस्पर्शतन्मात्रात् वायुः, शब्दस्पर्शतन्मात्र-सहितात् रूपतन्मात्रात् तेजः, शब्दस्पर्शरूपतन्मात्रसहितात् रसतन्मात्रात् आपः, शब्दस्पर्शरूपरसतन्मात्रसहितात् गन्धतन्मात्रात् पृथिवी चोत्पद्यन्ते। कारणादस्मात् आकाशः शब्दगुणकः, वायुः शब्दस्पर्शगुणकः, तेजः शब्दस्पर्शरूपगुणकम्, आपः शब्दस्पर्शरूप-रसगुणिकाः, पृथिवी शब्दस्पर्शरूपरसगन्धगुणिका चेति नाम्नाऽभिधीयन्ते।[२०] अनुरूप-सिद्धान्तोऽप्यवलोक्यते वेदान्तशास्त्रे– **आकाशे शब्दः अभिव्यज्यते, वायौ शब्दस्पर्शौ, अग्नौ शब्दस्पर्शरूपाणि, अप्सु शब्दस्पर्शरूपरसाः, पृथिव्यां शब्दस्पर्श-रूपरसगन्धाः**[२१] इति। अहंकारस्य द्विविधसर्गे रजोगुणो निमित्तकारणस्वरूपः, यतो हि रजोगुणं व्यतिरिच्य सत्त्वगुणस्तमोगुणश्च तदीयकार्यं कर्तुन्नार्हतः।

पञ्चमहाभूतान्येतानि विशेषाः। यतो हि एतानि पञ्चमहाभूतानि तन्मात्रेभ्यो जायन्ते, व्यावर्तकरूपेण अनुभूयन्ते, उपभोगयोग्यानि भवन्ति च। पुनश्च सत्त्वगुणप्राधान्येन केचिद्विशेषाः सुखजनकाः प्रकाशा लाघवाश्च भवन्ति, ते शान्तस्वरूपाः। रजोगुणप्राधान्येन केचित्पदार्था दुःखजनका अनवस्थिताश्च भवन्ति, ते घोरस्वरूपाः। तमोगुणाधिक्यवशात्केचिद्विशेषा मूढा विषण्णा गुरवश्च भवन्ति, ते मूढभूताः। परन्तु अनुपभोग्यात् अनुभवाभावाच्च तन्मात्राण्यविशेषा भवन्ति।

**तन्मात्राण्यविशेषास्ताभ्यो भूतानि पञ्च पञ्चभ्यः।**
**एते स्मृता विशेषाः शान्ता घोराश्च मूढाश्च॥**[22] इति।।

**( ग ) मनः**

मनस्तु एकादशतमेन्द्रियमन्तःकरणञ्च, तत्सात्त्विकाहङ्कारादुत्पद्यते। इन्द्रियाणि द्विधा-बाह्यानि आभ्यन्तराणि चेति, तत्र बुद्धीन्द्रियाणि कर्मेन्द्रियाणि च बाह्यानि, यतस्तानि बाह्यविषयग्राहकाणि। मनः आन्तरिकसुखदुःखादिज्ञानविषयकमिति, अस्मात्कारणात्प्रत्यक्ष-प्रमाणेनोपलब्धुं न शक्यते इति मनसः आभ्यन्तरत्वम्। इदम्मनो ज्ञानेन्द्रियप्रवर्तकत्वात् कर्मेन्द्रियप्रवर्तकत्वाच्चोभयात्मकम्, पुनश्च 'इदम्' 'इदमेवं नैवम्' चेति सम्यग्विश्लेषण-त्वात्सङ्कल्पात्मकञ्च। तथा च ब्रूते –

**उभयात्मकं मनः, सङ्कल्पमिन्द्रियं च साधर्म्यात्।**[23] इति।

यथा लोकेऽस्मिन् एक एव पुरुषः कदाचित्प्रयोज्यकर्ता कदाचित्प्रयोजककर्ता च भवति तथा मनोऽपि बुद्धीन्द्रियसंयोगवशात् ज्ञानेन्द्रियं कर्मेन्द्रियसंयोगवशात्कर्मेन्द्रियञ्च भवति। मनसोऽधिष्ठानवशात् चक्षुरादीन्द्रियाणां वागादीन्द्रियाणाञ्च स्वस्वविषयेषु प्रवृत्तिः सम्भवति, अन्यथा न सम्भवति।

बुद्धिर्मनोऽहङ्कारश्चेति अन्तःकरणत्रयमिन्द्रियायतनस्याऽभ्यन्तरे विद्यतेऽस्मात्कारणात्साक्षात् सुखदुःखात्मकादिवस्तूनि न ग्रहीतुं शक्यन्ते। चक्षुरादीन्द्रियाणि यदा रूपादिविषयान् अन्तःकरणस्य समीपं संस्थापयन्ति तदाऽन्तःकरणानि तद्विषयेषु संकल्पविकल्पाध्यव-सायाभिमानान् कर्तुं शक्नुवन्ति। अन्तःकरणत्रयम्भूतवर्तमानभाविकालेषु विद्यमानान् सर्वविषयान् गृह्णति अस्मात्कारणात्प्रधानम्। बहिरिन्द्रियाणि तु साम्प्रतकालान् विषयान् स्वीकुर्वन्ति, अत एव बहिरिन्द्रियाणि अप्रधानानि भवन्ति। अत एव उभयोर्द्वारद्वारिभावसम्बन्धो-ऽवलोक्यते। तथा च प्रपञ्चितमेवमीश्वरकृष्णमहोदयेन–

**सान्तःकरणा बुद्धिः सर्वं विषयमवगाहते यस्मात्।**
**तस्मात् त्रिविधं करणं द्वारि द्वाराणि शेषाणि॥**[24] इति।।

पुनश्च एतेष्वन्तःकरणेषु बुद्धिः प्रधाना। मनोऽहङ्कारश्च पुरुषभोगसाधनार्थमखिलविषयान् बुद्धौ समर्पयति। तदुक्तञ्च –

**एते प्रदीपकल्पाः परस्परविलक्षणा गुणविशेषाः।**
**कृत्स्नं पुरुषस्यार्थं प्रकाश्य बुद्धौ प्रयच्छन्ति।।**[25] इति।।

**उपसंहृतिः**

बुद्धिः, अहङ्कारः, मनश्चेति नामकान्तःकरणत्रयस्य भूमिकाऽस्मदीयजीवनेषु अनुपेक्षणीया। सर्वादौ इन्द्रियाणि विषयान् गृह्णन्ति, तत्परं मनस्तद्विषयेषु 'इदमित्थम्' 'इदमित्थं नैव' चैवम्प्रकारेण संकल्पविकल्पं साधयति, ततोऽहङ्कारः 'अहमधिकारी' 'इत्येतन्मम' चेति अभिमानं करोति, तत्पश्चात् बुद्धिः सर्वान्तिमे 'गौरेवायम्' 'पुरुष एवायम्' इति निश्चयात्मकवृत्तिं निश्चिनोति। अत एव एवम्प्रक्रियापूर्वकं जीवाः कञ्चित् विषयमाश्रित्य निश्चयात्मकज्ञानमाप्नुवन्ति तथा च वस्तुनो यथार्थोऽयथार्थश्चेति भेदं निर्णेतुं शक्नुवन्ति। तथा च कठोपनिषदि बुद्धेः मनसश्च विषये उक्तवान् –

**आत्मानं रथिनं विद्धि शरीरं रथमेव तु।**
**बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च।।**
**इन्द्रियाणि हयानाहुर्विषयास्तेषु गोचरान्।**
**आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः।।**[26] इति।।

अस्मदीयभोगायतनं रथम्, तत्र विद्यमानः आत्मा च रथी, बुद्धिः सारथिस्वरूपा, इन्द्रियाणि अश्वस्वरूपाणि, मनः प्रग्रहमिति च।

*

## सन्दर्भाः


1. सांख्यकारिका, 10-11
2. तदेव, 21
3. तर्कसंग्रहः, 30

4. सांख्यकारिका, 33
5. तदेव, 22
6. अध्यवसायो बुद्धिः, सांख्यकारिका, 23
7. सांख्यप्रवचनभाष्यम्, अ. 1-17
8. योगसूत्रम् , 4.19
9. सांख्यकारिका, 20
10. धर्मोऽभ्युदयनिःश्रेयसहेतुः। सांख्यतत्त्वकौमुदी, 23
11. वैशेषिकसूत्रम्, 1.1.2
12. सांख्यतत्त्वकौमुदी, 23
13. तदेव, 23
14. योगसूत्रव्यासभाष्यम्, 2.7
15. सांख्यतत्त्वकौमुदी, 23
16. योमसूत्रम्, 1.15
17. योगसूत्रव्यासभाष्यम्, 2.45
18. सांख्यसूत्रम्, 2.16
19. सांख्यकारिका, 28
20. सांख्यतत्त्वकौमुदी, 22
21. वेदान्तसारः, 50
22. सांख्यकारिका, 38
23. तदेव, 27
24. तदेव, 35
25. तदेव, 36
26. कठोपनिषद्, 3.3-4

*

## संस्कृतप्रसारपरिषद्, आरा

### प्रकाशनम्

1. मेघदूतम् (सभूमिका-हिन्दीपद्यानुवादसहितम्) - स्व. पण्डित कमलाकान्त उपाध्यायः
15 रूप्यकाणि
2. भोजपुरी नीतिसतक (भर्तृहरि 'नीतिशतक'स्य भोजपुरी-पद्यानुवादः)
-श्री देवकुमार मिश्रः 'अलमस्त'
15 रूप्यकाणि
3. पण्डित दीनदयाल उपाध्याय के 'एकात्ममानवदर्शन' की मीमांसा -श्री नर्मदेश्वर ओझा
15 रूप्यकाणि
4. माण्डूक्योपनिषद्-'नलिन-भाष्य' - पं. जगदीश्वर प्रसाद मिश्र 'नलिन'
35 रूप्यकाणि
5. भरतचरितम् (महाकाव्यम्) - स्व. भवानीदत्त शर्मा
51 रूप्यकाणि
6. राष्ट्रियता : सांस्कृतिक अवधारणा - श्री नर्मदेश्वर ओझा
51 रूप्यकाणि
7. संस्कृतनिबन्धसञ्चयनम् - पं. व्रजभूषण मिश्र 'आक्रान्तः'
41 रूप्यकाणि
8. ईशावास्योपनिषद् एवं केनोपनिषद्-'नलिन-भाष्य'
- श्री जगदीश्वर प्रसाद मिश्र 'नलिन'
51 रूप्यकाणि
9. आध्यात्मिकनिबन्धसंग्रह - श्री जगदीश्वर प्रसाद मिश्र 'नलिन'
51 रूप्यकाणि
10. उपेन्द्रविज्ञानदर्शनम् (वेदान्तग्रन्थः) - स्व. पं. उपेन्द्रनारायणदत्त शर्मा
41 रूप्यकाणि
11. भावनाविलासशतकम् - स्व. पं. उपेन्द्रनारायणदत्त शर्मा
21 रूप्यकाणि
12. हनुमच्चरितम् - स्व. पं. व्रजभूषणमिश्र 'आक्रान्तः'
51 रूप्यकाणि
13. उपनिषदों की भूमिका - पं. जगदीश्वर प्रसाद मिश्र 'नलिन'
51 रूप्यकाणि
14. महाभारतसारसंग्रहः (प्रकाश्यः) - स्व. पण्डित वचन मिश्रः
15. चरितरत्नत्रयी - स्व. पं. व्रजभूषणमिश्र 'आक्रान्तः'
51 रूप्यकाणि
16. जगन्नाथचरितम् - डॉ. बनमाली बिश्वालः
60 रूप्यकाणि
17. कृत्-प्रत्ययविश्लेषण - डॉ. गोपबन्धु मिश्रः
204 रूप्यकाणि
18. सोमश्रद्धार्णव - डॉ. गोपबन्धु मिश्रः
1000 रूप्यकाणि